M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 71

Title: Shiva Purana

71

Shiva Purāna		Title
		Author
		Editor
	Jan. 1866 Shaka 1731	Year, Vols.
		Publisher
71	(पौराणिक)	Remarks

॥श्रीगणेशायनमः॥ ॥श्रीसदाशिवायनमः॥ ॥जगतःपितरंशंभुं
जगतोमातरंशिवां॥ तत्पुत्रंचगणाधीशंनत्वैतद्वर्णयाम्यहं॥१॥ वागीशा
यस्यवदनेलक्ष्मीर्यस्यचवक्षसि॥ यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभ
जे॥२॥ एकदामुनयःसर्वेनैमिषारण्यवासिनः॥ अपृच्छन्परयाभक्त्याव्यास
शिष्यंगुणान्वितं॥३॥ ऋषयऊचुः॥ सूतसूतमहाभागचिरंजीवीसुखी
भव॥ पिबंतस्त्वन्मुखांभोजाच्च्युतंज्ञानामृतंवयं॥४॥ अवितृप्ताःपुनःकिं
चित्प्रष्टुमिच्छामहेवयं॥ व्यासप्रसादात्सर्वज्ञोजातोसिकृतकृत्यतां॥५॥ ना
ज्ञातंविद्यतेकिंचित्भूतंभव्यंनविद्यते॥ गुरोःकृपांसमासाद्यसर्वसार्थं
कृतंत्वया॥६॥ कथयत्वंप्रसादेनशिवरूपमनुत्तमं॥ नत्वाजोपरमांदिव्यां २
तच्चरित्राण्यनेकशः॥७॥ अगुणोगुणवान्यातोकथंलोकेमहेश्वरः॥ शिवत

त्त्वंवयंसर्वेनजानीमोविचारतः॥८॥ सृष्टेःपूर्वंकथंदेवस्सन्मध्येचकथंपुनः
यच्छतिसर्वलोकेभ्यःसर्वंकथयसुव्रत॥९॥ सचप्रसन्नोभगवान्भवतीत्यनुमु
क्रम्॥ एतत्सर्वंतथाचान्यत्कथनीयंत्वयानघ॥१०॥ इतिपृष्टस्तदासौसूतु
श्रुत्वाहर्षसमन्वितः॥ उवाचवचनंतत्रऋषीणांशृण्वतांमुदा॥११॥ इतिश्री
शिवपुराणेपरिपाटिनामाध्यायःप्रथमः॥ सूतोवाच॥ सम्यक्पृष्टंभवद्भि
स्तुयथावत्कथयाम्यहं॥ कपोलकल्पितंनैवकथयिष्येमुनीश्वराः॥१॥ भव
द्भिःपृष्टमेतद्यत्पुरानारदेनवै॥ पृष्टंपित्रेस्वयंतत्रज्ञानायपरमात्मनः॥२॥
कस्मिंश्चित्समयेविप्राःनारदोऋषिसत्तमः॥ दृष्ट्वाव्योमदनंकर्त्ताशिवरू
पाण्यनेकशः॥३॥ दृष्ट्वानत्वाचसंपूज्यततोज्ञानेमहात्मनः॥ पप्रच्छब्रह्मणो
नत्वाशिवरूपमचिंतकः॥४॥ नारदोवाच॥ ब्रह्मन्ब्रह्मविदांश्रेष्ठपितामह

शिव० २

जगत्प्रभो ॥ त्वत्प्रसादात्मयासर्वं विष्णोर्मत्तात्समुत्तमं ॥ ५ ॥ भक्तिमार्गंतपोमा
र्गंज्ञानमार्गंसुदुष्करं ॥ दानमार्गंचतीर्थानांमार्गंचश्रुतवानहं ॥ ६ ॥ नज्ञातंशिव
तत्वंचपूजांचविधिवक्रमात् ॥ चरित्रंविविधंतस्यनिवेदयममप्रभो ॥ ७ ॥ सुसं
दिग्धंकथंचान्यंविज्ञायपरमेष्ठिनं ॥ प्रष्टव्यंपरमंतत्वंनैर्गुण्यंपरमेश्वरं ॥ ८ ॥ त
स्मात्वयाचवक्तव्यंमाहात्म्यंशंकरस्यच ॥ लोकानामुपकारार्थंव्रतानिचशि
वस्यच ॥ ९ ॥ संतुष्टोवक्तुमर्हस्त्वंकिंकिंयत्कृतिवैफलं ॥ तदुत्पत्तिंविवाहंचगि
रिजायाःसविस्तरं ॥ १० ॥ वक्तुमर्हस्यशेषेणतंपूर्वंनतत्प्रोस्मिजगत्प्रभो ॥ इतिश्रु
त्वावचस्तस्यनारदस्यांगजस्यच ॥ ११ ॥ उवाचवचनंतत्रब्रह्मालोकपिताम
हः ॥ ब्रह्मोवाच ॥ ब्रह्मन्वतेसाधुपृष्टोहंलोकानांहितकाम्यया ॥ १२ ॥ यच्छ्रुत्वासर्व २
लोकानांसर्वपापक्षयोभवेत् ॥ तत्वंतेवममयारब्ध्यातंविष्णुनाप्रभविष्णुना

१३ ॥ शिवस्यपरमंब्रह्मन्ज्ञानंरूपमद्भुतं ॥ इदंदृश्यंयदानासीत्सदसदा
त्मकंचयत् ॥ १४ ॥ तदाब्रह्ममयंतेजोव्याप्तिरूपंचसंततं ॥ नस्थूलंनचसूक्ष्मं
चशीतंनोष्णंचपुत्रक ॥ १५ ॥ आद्यंतरहितंदिव्यंसत्यंज्ञानमनंतकं ॥ योगिनांत
रदृष्टिगम्यंध्यायंतिनिरंतरं ॥ १६ ॥ तद्रूपंसकलंह्यासीत्ज्ञानविज्ञानदंमहत् ॥
कियताचैवकालेनतस्येच्छासमपद्यत ॥ १७ ॥ प्रकृतिर्नामसाप्रोक्तामूलका
रणमित्यत ॥ अष्टौनुजावयस्यासन्विचित्रवसनाशुभा ॥ १८ ॥ एकाचैकसह
स्या स्रस्यवक्त्रेनैवनिस्पृहा ॥ नानाभरणसंयुक्तानानाज्ञानसमन्विता ॥ १९ ॥ ना
नायुधधरादेविप्रफुल्लपंकजाक्षिका ॥ अचिंत्यतेजसायुक्तासर्वयोनिसमु
द्भवा ॥ २० ॥ एकाकिनीयदामायासंयोगाद्बुध्यनेकिका ॥ यतोवैप्रकृतिर्देवी
ततोवैपुरुषस्तदा ॥ २१ ॥ उभौचमिलितौतत्रविचारंतस्तोमुने ॥ आवाभ्यां

शि॰व॰ ३

।किं प्रकर्तव्यं ध्यायतस्म परस्परं ॥२२॥ एतस्मिन्नंतरे वाणी समुत्पन्ना शुभाश्रु
ता ॥ तपश्चैव प्रकर्तव्यं संशयस्यापनुत्तये ॥२३॥ ततस्ताभ्यां च तच्छ्रुत्वा तपस्त
प्तं सुदारुणं ॥ कियत्कालं तदा ब्रह्मन् ध्यानमार्गपरायणौ ॥२४॥ प्रकृतिपुरु
षश्चैव प्रबुद्धौ ध्यानमार्गतः ॥ प्रबुध्वा विस्मयं प्राप्तौ कियत्न महो इति ॥२५॥
तदंगाज्जलधारा हि संजाता विविधा मुने ॥ तानिव्याप्तं च सकलं ब्रह्मरूपम
नल्पजलं ॥२६॥ अनंतं ह्यनवत्तच्च स्पर्शनात्पापनाशनं ॥ तदा श्रांतश्च पुरु
षः तया सह जलेस्वयं ॥२७॥ सुष्वाप परमः प्रीतः बहुकालं तया सह ॥ नारा
यणेति तन्नाम जातं तस्य महात्मनः ॥२८॥ नारायणी तदा नाम प्रकृतेः सं
मतं मुने ॥ नान्यत्किंचित्तदा ह्यासीत् प्रकृतिपुरुषं विना ॥२९॥ एतस्मिन्नं ३
तरे ब्रह्मन् तत्त्वान्यासन्महात्मनः ॥ प्रकृतेश्च महानासीत्महतश्च गुणा

स्त्रयः ॥३०॥ अहंकारस्ततो जातस्ततस्तन्मात्रकापरा ॥ पंचभूतान्यतो
भ्यासन् ज्ञानविज्ञानकान्यथ ॥३१॥ तत्त्वानामिति संख्यातं युक्तं ते ऋषिस
त्तम ॥ जडात्मकं च तत्सर्वं प्रकृतेः पुरुषं विना ॥३२॥ तान्येकीकृतं यच्च चतु
र्विंशतिसंज्ञिकं ॥ तद्गृहित्वा च सुष्वाप जले ब्रह्मस्वरूपिणी ॥३३॥ सुप्ते नाराय
णे देवे नाभौ पंकजमुत्तमं ॥ अनंतपत्रिकायुक्तं कर्णिकारसमन्वितं ॥३४॥
अनंतयोजनायाममनंतोच्छ्रायसंयुतं ॥ कोटिसूर्यप्रतिकाशं सुंदरं त
त्त्वसंयुतं ॥३५॥ तस्मात्स्वयमभूत्तो जज्ञे पुत्रोहं हेमगर्भकः ॥ तन्मायामोहित
श्चाहं नाविदं तु क्रमलं विना ॥३६॥ कोहं वा कुत आयातः किं कार्यं तु मदी
यकं ॥ कस्य पुत्रोहमुत्पन्नः केनेह निर्मितोप्यहं ॥३७॥ इति संशयमापन्नं

शिव॰ विधिमंसिमपद्यत । किमर्थं मोहमायामि यत्र वैकमलस्थलं ॥ ३८ ॥ मत्कर्णाविन
४ वेत्तत्र न विष्वलितसंज्ञया ॥ इति बुध्विं समास्थाय कमलादवरोहयत ॥ ३९ ॥
नालेनाले गतस्तत्र वर्षाणां शतकं मुने । न लब्धं तु मया तत्र कमलस्थानमु
त्तमं ॥ ४० ॥ संज्ञायत्वं पुनः प्राप्तो कमलंगं तु मुसकः ॥ आरुरोहाथ कमलं
नालमार्गेण वै मुने ॥ ४१ ॥ ऊर्ध्वलं कमलस्याथ जघ्रवान न विमोहिता ॥
नीलमार्गे तु च मनेगतं वर्षशतं पुनः ॥ ४२ ॥ क्षणमात्रे तदा तत्र शांतो तिष्ठ
विमोहितः । तदा वाणी समुत्पन्ना तपेति परमाद्भुता ॥ ४३ ॥ तच्छ्रुत्वा च तप
स्तप्तवद्वादशाब्दं प्रयत्नतः । तदावै भगवान् विष्णुश्चतुर्बाहुः सुलोचनः ४
४४ ॥ ममैवानुग्रहे कर्तुं पीतांबरधरः स्तनः ॥ शंखचक्रायुधस्तत्र गदा

पद्मधरः परः ॥ ४५ ॥ घनश्यामलसंतुष्टः प्रसन्नमुखपंकजः । मुकुटांगदहिन्नष
णो युक्तः कोटिकंदर्पसंमतः ॥ ४६ ॥ प्रकृत्या जनितः सोथ मया दृष्टः पुरा मुने
तं दृष्ट्वा सुंदरं रूपं विस्मयं परमं गतः ॥ ४७ ॥ कालात्मा कांचनाभश्च शुक्लः क्व
स्तश्च निर्गुणः । नारायणो महाबाहुः सर्वात्मा सदसन्मयः ॥ ४८ ॥ तथाभूतम
हं दृष्ट्वा हर्षितोद्य नवं स्तदा । मायया मोहितस्तस्य न मवोच मम मर्षितः ॥ ४९ ॥
कस्त्वं वदेति हस्तेन समुत्थाप्य सनातनं । प्रबुद्धो भगवान् स्तत्र कस्त्वं कथय
सुव्रत ॥ ५० ॥ इत्येतद्वचनं श्रुत्वा नाम तो नवान् हरिं । सत्वेन परमो विष्णुः नि
मंनीतव सुव्रत ॥ ५१ ॥ वत्स जानीहि नश्चेते सत्यमेतद्वदाम्यहं । तस्यैतद्वचनं
श्रुत्वास्मि तत्सर्वं महामुने ॥ ५२ ॥ मायया मोहितस्तत्वे परिज्ञस्य पुनस्तदा ॥ ना

धातारं ३

शिव० ५

एमेवस्त्वंवक्तेति मर्गसंसारपालक ॥ ५३ ॥ मामाहात्म्यमितं कृत्वा गुरुशि
ष्यमिवानघ ॥ कर्त्तारं जगतो साक्षात्स्कृतेश्च प्रवर्त्तकं ॥ ५४ ॥ सनातन मजं
विष्णुं विरंची विश्वसंभवे ॥ विश्वात्मानं विधातारं एकं जेक्षणं ॥ ५५ ॥ किमर्थं
माघमेमाहात्तवक्तुमर्हसि सत्वरं सोपि मामाह जगतां कर्त्ता त्वमिति लो
कपः ॥ ५७ ॥ नत्वाहं त्वां भवानं गादवतीर्णा स्वमायया ॥ विश्वतोसि जग
न्नाथं नानारायणमनामयं ॥ पुरुषं परमात्मानं मात्मानं जगतां प्रभुं
विष्णुमच्युतमीशानं विश्वस्य प्रभवोद्भवं ॥ ५८ ॥ तवापराधो नास्त्यत्र
ममायाकृतं त्विदं ॥ शृणु सत्यं परं ब्रह्म सर्वं तन्मम संभवं ॥ ५९ ॥ मया
स्त्रष्टपुरा व्यक्तं चतुर्विंशतितत्वकं ॥ इति श्रुत्वा वचस्तस्य ब्रह्मा क्रोधान्वि ५

तस्तदा ॥ ६० ॥ कोवा त्वमिति संभस्मी कश्चित्कर्त्ता न वेत्त्नव ॥ मायया मोहि
तश्चाहं युद्धं चक्रे सुदारुणं ॥ ६१ ॥ विवादश्च महानार्थं च प्रबोधार्थं द्वयोर ॥
पि ॥ ज्वालामालासहस्राढ्यं कालानलशतोपमं ॥ ६२ ॥ क्षयवृद्धिविनिर्मु
क्तमादिमध्यांतवर्जितं ॥ अनौपम्यमनिर्दिष्टमव्यक्तं विश्वसंभवं ॥ ६३ ॥
तस्य ज्वालासहस्रेण मोहितो भगवान् हरिः ॥ मोहितं प्राह मामत्र किम
र्थं स्पर्द्धसे धुना ॥ ६४ ॥ आगतस्तृतीयोत्रापि तिष्ठतां युद्धमावयो ॥ कुतए
वात्र संभूतः परीक्षावोग्निसंनिभं ॥ ६५ ॥ वायुवेगसमो भूत्वा गच्छोर्द्धं वि
श्वसंभव ॥ भवान्नेरद्ध्व प्रयत्नेन गंतुमर्हसि सत्वरं ॥ ६६ ॥ हंसरूपं तथाधा
र्यं वाराहं च मया पुनः ॥ एवं व्याकृत्य विश्वात्मा स्वरूपमकरोत्तदा ॥ ६७ ॥

शिव० ६
हंसश्चाहंतदाजातोसुंदरःपक्षसंयुतः।तदाप्रभृतिमामाहुर्हंसहंसवि
राडिति।६०।हंसहंसेतियोब्रूयात्सोहंसोथभविष्यति॥सुश्वेतोह्यनिलश्च
रश्चः विश्वतःपक्षसंयुतः।६९।मनोनिलजवोभूत्वाततःश्चोर्ध्वगतः पुरा
नारायणोपिविश्वात्मासुश्वेतोह्यभवत्तदा।७०।दशयोजनविस्तीर्णमाया
तंशतयोजनं॥मेरुपर्वतवर्ष्माणंतीक्ष्णनखाग्रदंष्ट्रिणं।७१।कालादित्य
समाभासंदीर्घघोणंमहास्वरं।कृष्णपादंविचित्रांगंजैत्रंदृढमनोजवं
७२॥वाराहंरूपमास्थायगतवानतदधोजवन्॥एवंवर्षसहस्रंचचर
न्विष्णुरधोगतः॥तदाप्रभृतिलोकेषुश्वेतवाराहकल्पकः।७३॥इ ६
तिश्रीशिवपुराणेद्वितीयोध्यायः।२।सूतोवाच॥तदनंतरंचयज्ज्ञातंश्रु

यतांऋषिसत्तमाः॥श्रांतंचबहुधाकालंविष्णुनाप्रभविष्णुना।१।नाय
१५ स्यदृष्टमप्यस्यमूलंलिंगस्यशंकरः॥तावत्कालंगतोप्यूर्ध्वमहमप्यरिंद
म।२।सत्वरंसर्वयत्नेनतस्यांतंज्ञातुमिछया॥श्रांतोनदृष्ट्वातस्यांत
महंकालादधोगतः।३।तथैवभगवान्विष्णुःश्रांतःसंभ्रांतविलोचनः॥
समागतोमयासार्द्धंप्रणिपत्यभवंविभुं।४।माययामोहितःशंभोत
स्थौसंविग्नमानसौ॥प्रणिपत्यमयासार्द्धंसस्मारकिमिदंत्विति।५।अ
निर्देश्यंचतद्रूपंमनामकर्मवर्जितं॥अलिंगंलिंगतांजातंध्यानमार्ग
प्यगोचरं।६।स्वस्थचित्तंतदाकृत्वानमस्कारपरायणौ॥जानीयावोन
तेरूपंयोसिसोसिनमोस्तुते।७।एवमाहृत्यतंजातंनमस्कारंप्रकुर्व

शिव०

७ तोऽनंतदासमभवत्तत्रमानंदंशाद्वलक्षणं ॥८॥ अमितिचमुनिश्रेष्ठमुख्य

कं श्रुतलक्षणं । किमिदंत्विति संचिंत्य मयातिष्ठनुमहास्वनं ॥९॥ यस्माच्छ

ब्दं समुद्भूतं तस्मैतुभ्यं नमोऽस्तुते । लिंगस्यपश्चिमे भागे तदापश्यत्सनात

नं ॥१०॥ आद्यं वर्णमकारं च उकारं चोत्तरं ततः । मकारं मध्यतश्चैव नादांत

तं तस्य ओमिति ॥११॥ सूर्यमंस्यमध्यतः तस्योपरि मंडलवद्दृष्ट्वा वर्णमाद्यं

तु दक्षिणे । उत्तरे पावकप्रख्यमुकारं ऋषिसत्तम ॥१२॥ शीतांशुमंडलप्र

ख्यमकारं तस्य मध्यतः । तस्योपरि तदापश्यत्स्फुटिकप्रभवं विभुं ॥१३॥

तुरीयातीतममृतं निष्कलं निरुपप्लवं । निर्द्वंद्वं केवलं तत्वं बाह्याभ्यं ७

तरवर्जितं ॥१४॥ आदिमध्यांतरहितमानंदस्यापिकारणं ॥ सत्यमानंद

ममृतं परं ब्रह्मपरायणं ॥१५॥ एकाक्षरान्मकाराख्यो भगवान्नीललोहि

तः । सर्गकर्त्ता उकाराख्या अकाराख्यस्तु पालकः ॥१६॥ मकाराख्यस्तु

योनिस्थमनुग्रहकरो भवः । अहमेवं हरिर्ब्रह्मन् विस्मयाविष्टमानसौ

॥१७॥ एतस्मिन्नंतरे यज्ञरूपमद्भुतसुंदरं । पंचवक्त्रं दशभुजं कर्पूरगौरकं

मुने ॥१८॥ नानाकांतिसमायुक्तं नानाभूषणसंयुतं ॥ महोदारमहावीर्यं

महापुरुषलक्षणं ॥१९॥ तं दृष्ट्वा परमं रूपं निर्मितास्त्वयमेव च ॥ ततो विज्ञा

यदेवशं यथावत् स्तुतिसंमतेः ॥२०॥ मंत्रैर्महेश्वरं देवं तुष्टाव सुमहोद

यं । आवयोः तुष्टिनाधुष्टो लिंगेस्मिन्नंतरं जनः ॥२१॥ दिव्यं शब्दमयं रूपं

मास्थाय प्रहसन्स्थितः । आकारस्तस्यमूर्द्धानं ललाटं दीर्घ उच्यते ॥२२

शिव० ८ इकारं दक्षिणं नेत्रमीकारं वामलोचनं ॥ उकारं दक्षिणं श्रोत्रं ऊकारं वाम
उच्यते ॥ २३ ॥ ऋकारं दक्षिणं तस्य कपोलं परमेष्ठिनं ॥ वामं कपोलं ॠकारं
लृलॄ नासापुटे उभे ॥ २४ ॥ एकारमोष्ठमूर्द्ध्वं तु ऐकारमधरं विभोः ॥ ओकारं
तथौकारं दंतपंक्तिद्वयं क्रमात् ॥ २५ ॥ अंअः ब्रह्मतालुनी तस्य देवदेवस्य धी
मतः ॥ कादिपंचाक्षराण्यस्य पंचहस्तांश्च दक्षिणे ॥ २६ ॥ चादिपंचाक्षराण्ये
वं पंचहस्तांस्तु वामतः ॥ टादिपंचाक्षरं वादौ तादिपंचाक्षरं तथा ॥ २७ ॥ प
कारमुदरं तस्य फकारं पार्श्वमुच्यते ॥ बकारं वामपार्श्वं तु भकारं स्कंध ८
उच्यते ॥ २८ ॥ मकारं हृदयं शंभोः महादेवस्य योगिनः ॥ यकारादि सका
रांतं विभोर्वै सप्त धातवः ॥ २९ ॥ हकारं नाभिरूपं हि क्षकारं नासा उच्यते ॥ ए

वं शंभुमयं रूपमगुणस्य गुणात्मनः ॥ ३० ॥ तं दृष्ट्वा तु मया सार्द्धं भगवंतं महे
श्वरं ॥ प्रार्थयंतौ पुनस्तं वै कृपा कार्या विभो त्वया ॥ ३१ ॥ इत्येवं वचनं श्रुत्वा प्र
सन्नं शंकरस्तदा ॥ उवाच वचनं तत्र प्रसन्नो भगवानिह ॥ ३२ ॥ तदीयं त
द्वचस्तत्र श्रुत्वा विष्णुर्मया सह ॥ उवाच यदि देवेश प्रसन्नो भगवानिह ॥
३३ ॥ आवयोः किंच कार्यं वै यदिच्छसि तथा कुरु ॥ इत्येतत्तु वचनं श्रुत्वा
शंभुर्वाक्यमथाब्रवीत् ॥ ३४ ॥ सृष्टिकर्ता भवेद्ब्रह्मा सृष्टेश्च पालको हरि
॥ महीयस्त्व तयाप्येशः भविष्यति त्वदंगजात ॥ ३५ ॥ इयं च प्रकृतिर्देवी या
नारायणमाश्रिता ॥ तस्याः भविष्यति शक्तिः ब्रह्मणो संभविष्यति ॥ ३६ ॥
अन्या शक्तिः पुनस्तत्र प्रकृतेः संभविष्यति ॥ समाश्रयिष्यते विष्णुं लक्ष्मी

रूपेण सा तदा ॥ ३७ ॥ पुनश्च कालीनाम्नी च मदंशं प्रापयिष्यति ॥ त्रयो देवास्त
थाप्येकाः शक्तयः परमास्तुता ॥ ३८ ॥ सृष्टिकार्यवसेन्यस्य कुर्वंतु ते मदाज्ञ
या ॥ इत्येवंतु वचः श्रुत्वा विष्णुर्वाक्यमथाब्रवीत ॥ ३९ ॥ श्रीभगवानोवाच ॥
नवङ्कर्म करिष्यामो नियताः सर्व एव हि किंचिद्विज्ञाप्यमस्त्येव तत्त्वं कर्तु
मिहार्हसि ॥ ४० ॥ ततो वचनमारब्धं शंकरेण परं स्तुतं ॥ यदनिष्टतमं त
न्वं दास्यामि हितकाम्यया ॥ ४१ ॥ विष्णोर्मायासहोवाच शंकरं लोकशंक
रं ॥ श्रीभगवानोवाच ॥ देवदेव नमस्तुभ्यं देहि तत्त्वं नमोस्तु ते ॥ ४२ ॥ ध्येयं
सेव्यं तथा पूज्यं वक्तुमर्हसि सुव्रत ॥ यत्कृत्वा सर्वसामर्थ्यं नविष्यति
नसंशयः ॥ ४३ ॥ इत्युक्तः शंकरस्तस्मै ददौ नादात्मकं शिवं प्रणवात्म

कं परं तत्त्वं लब्धवान् परमात्मनः ॥ ४४ ॥ हरिस्तत्र परं तत्त्वं ज्ञात्वा रूपम
पद्यत ॥ तदुपायं प्रवक्ष्यामि मंत्रतत्त्वं श्रुतात्ययः ॥ ४५ ॥ प्रणम्य भगवा
न् विष्णुः पुनश्चापत्रपहर्षितः ॥ ॐकारप्रणवं मंत्रं कलामेवकसंयुतं ॥ ४
६ ॥ ॐ तत्त्वमसीत्युक्तं महावाक्यं हरस्य च ॥ शुद्धस्फटिकसंकाशं मंत्ररू
पमनुत्तमं ॥ ४७ ॥ मेधाकरमतो भूयः सर्वकार्यार्थसाधकं ॥ पुनर्मंत्रं त
यात्मपश्च गायत्रीलक्षणं महत् ॥ ४८ ॥ चतुर्विंशतिवर्णाढ्यं चतुर्वर्गफलप्र
दं ॥ पुनर्मृत्युंजयं मंत्रं पंचाक्षरमतः परं ॥ ४९ ॥ चिंतामणिं तथा मंत्रं द
क्षिणामूर्तिसंज्ञिकं ॥ पंचमंत्रं तथा लब्ध्वा जजाप भगवान् हरिः ॥ ५० ॥
इति श्रीशिवपुराणे तृतीयोध्यायः ॥ जपतस्तस्य देवस्य प्रादुर्भूतो ह

हरः॥ स्वयंपुनप्रसन्नस्तत्रैवहरस्यपरमात्मने॥ १॥ निगमंस्थास्त्ररूपेणादद्दौ
तस्मैमहात्मने। नत्वमंत्राह्यमेकैवेतत्रकर्माण्यनेकशः॥ २॥ सर्वविद्यानि
धिर्देवोहरस्थासीन्महामुने॥ ईशानः सर्वविद्यानांश्रुतिरित्यासनातनी।
३॥ हरात्माप्यसस्वयंविष्णुर्हरिर्मह्यमदात्पुनः॥ पुरतः स्वात्मरूपेणाप्राप्तवा
न्निगमंतदा॥ ४॥ सोयंज्ञानमदात्तस्मैरहस्यंपरमात्मने॥ परमात्मापुन
र्मह्यंदत्तवान्रूपयामुने॥ ५॥ संप्राप्यनिगमंदेवः पप्रच्छपुनरेवतं॥ कथं
चतुष्पलेदेवमयाध्येयः कथंप्रभो॥ ६॥ क— नेचप्रकर्त्तव्यंशंकरंचकथं
प्रजेत॥ एतत्सर्वंमहाराजरूपांकृत्वाममोपरि॥ ७॥ कृपनीयंप्रयत्नेन १०
श्रृएवतांपापहारकं॥ इत्येतद्वचनंश्रुत्वाप्रसन्नोभगवान्हरः॥ ८॥ उवा

चहरयेनत्वंश्रृणुष्वावहितोहरे॥ इदंलिंगंमदापूज्यंध्यानंवैनात्रसंशयः॥ ९
इदानींसृष्टपतेयद्वत्तयाकार्यंत्वयासदापूजितो। लिंगरूपेस्मिन्नयत्नोवि
विधंफलं॥ १०॥ दास्यामिसर्वलोकेन्योमनोभिप्रायान्यनेकशः॥ यदादुःखेन
वेदत्वंपूजितेदुःखनाशने॥ ११॥ इतिदत्वाद्वरस्तस्मैवरानन्याननेकधा उ
वाचवचनंदेवविष्णवेप्रनविष्णवे॥ १२॥ अयंब्रह्मातयाकर्त्तास्त्रिष्टेःकार्यं
निरंतरं॥ पालयत्वंसदादेवमद्भक्तिंपरमांकुरु॥ १३॥ इत्युक्त्वानुपुनस्तस्मै
पूजाविधिमदाच्छुभं॥ येनेवपूजितःशंभुःफलंयच्छत्यनेकशः॥ १४॥ त
दहंकथयिष्यामिसर्वपापहरंपरं॥ ततःसर्वमयंदेवंविश्वरूपंमहेश्व
रं॥ १५॥ अनंतंनिष्कलंदेवंकृष्णमनुसामरूपिणं॥ सर्गस्थितिलयानां

हिकर्त्तारं परमेश्वरं ॥१६॥ तुष्टाव पुनरीष्टाभिर्वाग्भिर्वरदमीश्वरं ॥ हरिरुवा
च ॥ ॐ एकाक्षराय देवाय अकारायात्मरूपिणे ॥१७॥ उकारायादिदेवाय वि
द्यारूपाय ते नमः ॥ तृतीयाय मकाराय शिवाय परमात्मने ॥१८॥ जलाय ज
लजाप्याय नमस्ते जलव्यापिने ॥ चिंतयेचिंतरूपाय स्मृतिरूपाय ते नमः
१९ ज्ञानाय ज्ञानगम्याय नमस्ते परमात्मने ॥ हिरण्यबाहवे तुभ्यं नमस्ते
हेमरेतसे ॥२०॥ कपर्दिने नमस्तुभ्यं नागांगाभरणाय च ॥ वृषाकपये शर्वा
य कर्त्रे हर्त्रे नमो नमः ॥२१॥ शिवाय शिवरूपाय व्यापिने व्योमव्यापिने ॥
नमो निधीनां पतये लिंगिने लिंगरूपिणे ॥२२॥ तेजस्वि तेजसां मध्ये आव
र्यो ब्रह्मवर्चसे ॥ आत्मने ऋषये तुभ्यं स्वामिने विष्णवे नमः ॥२३॥ तेजसे

तेजसां नेत्रे नमस्ते सर्वरूपिणे ॥ शाश्वताय वरिष्ठाय वारिगर्त्ताय योगिने॥
२४॥ ॐकाराय नमस्तुभ्यं सर्वज्ञानेभ्यो नमः ॥ विररामेति तं स्तुत्वा ब्रह्म
णा सहितो हरिः ॥२५॥ इदं स्तोत्रं परं पुण्यं सर्वपापप्रणाशनं ॥ यः पठेच्छृणु
याद्वापि श्रावयेद्वा द्विजोत्तमान ॥२६॥ स याति ब्रह्मणो लोके पापकर्मरतोपि
सन ॥ कल्याणं वर्द्धते तस्य शुक्लपक्षे यथा शशी ॥२७॥ सर्वपापविमुक्त्यर्थं वि
ष्णुना परिभाषितं ॥ स्तोत्रं ॥ अथोवाच महादेवः प्रीतोहं सुरसत्तमौ ॥२८
पश्यतां मां महादेवं नयं सर्वं प्रमुच्यतां ॥ युवां प्रसूतौ ह्यङ्गतः मदीच्छायाः
महाबलौ ॥२९॥ ममात्र रूपं त्रिधा भिन्नं निर्गुणं सगुणीकृतं ॥ अयं मे दक्षि
णे पार्श्वे ब्रह्मा लोकपितामहः ॥३०॥ वामपार्श्वे च मे विष्णुर्विश्वात्मा हृदये

शिवपु०
१२

श्री

परः। प्रीतोऽहं [illegible] युवयोः सम्यक् वरं दास्यामि यदीप्सितं ॥३१॥ एवमुक्त्वा सुमां वि
ष्णुं कराभ्यां परमेश्वरः। पस्पर्श सुमुनाभ्यां च घृणया स घृणानिधिः ॥३२॥
ततः प्रहृष्टमनसा प्रणिपत्य महेश्वरं। प्राह नारायणो नाथं लिंगवर्जितं ॥३३॥ लिंगस्थं
यदि प्रीतिः समुत्पन्ना यदि देयो वरस्त्वया। भक्तिर्भवतु नौ नित्यं त्वयि चावि
निचारिणी ॥३४॥ देवः प्रसन्नवदनो भूत्वोवाच महामुने। कार्यार्थं निर्मितौ
देवौ नाद्येयं विद्यते मम ॥३५॥ जानुभ्यामवनीं गत्वा पुनर्नारायणः स्वयं। प्र
णिपत्य च विश्वेशं प्राह मंदतरं वचः ॥३६॥ आवयोर्देव [illegible] देवेन्द्र विवाद
मपि ज्ञानतं। इहागतोऽनवान् यस्मात् विवादद्भ्राम नाय नौ ॥३७॥ तस्य त १२
द्वचनं श्रुत्वा पुनः प्राह हरो हरिं। प्रणिपत्य स्थितं मूर्ध्ना कृतांजलिपुटं स्म

रन् ॥३८॥ महेश उ० ॥ मयि भक्तिर्दृढा भूयात् युवयोस्त्वच्च नुज्ञया। पार्थि
वीं चैव मन्मूर्त्तिं विधाय कुरुतं युवां ॥३९॥ सेवां च विधिवत् प्राज्ञौ कृत्वा सुखम
वाप्स्यथः ॥ उपास्थितं विधानेऽस्मिन् दुःखं हरो हर ॥४०॥ दृष्टौ वरानने कांश्चित
योर्हितचिकीर्षया ॥ ब्रह्मन् सृष्टिं कुरु त्वं हि मदाज्ञापरिपालकः ॥४१॥ वत्स व
स हरे त्वं च पालये तच्चराचरं। त्रिधा भिन्नो ह्यहं विष्णो ब्रह्मविष्णुहराख्यया ॥
४२ ॥ सर्गरक्षालयगुणैः निष्कलोऽहं सदा हरे। मद्रूपं परमं ब्रह्मन् ईदृशं न
वदंगतः ॥४३॥ प्रकटी भविता लोके नाम्ना रुद्रः प्रकीर्त्तितः। मदंशजस्य सा
मर्थ्यं न्यूनं नैव भविष्यति ॥४४॥ योऽयं सोऽहं न भेदोऽस्ति पूजाविधिविधानतः
यथा च ज्योतिषः संगात् जलादेः स्पर्शता न वै ॥४५॥ तथा ममागुणस्यापि

शिवपु.
१३

संयोगाद्बंधनं नहि । शिवरूपं ममैतच्च रूपोपि शिववत्तदा ॥४६॥ न तत्र परभेदो
वै कर्तव्यश्च महामुने ॥ वस्तुयाथेकधा भिन्नं रूपं हि त्रिजगत्सुत ॥४७॥ सुवर्ण
स्य यथैकस्य वस्तुत्वं नैव गच्छति । अलंकारकृतो देव नामभेदो न वस्तुतः ॥
४८॥ यथैकस्याः मृदो भेदो नानापात्रेन वस्तुतः । यथैकस्य समुद्रस्य विका
रो नैव वस्तुतः ॥४९॥ कारणस्यैव कार्यं च निदानं च निदर्शनं ॥ एवं ज्ञात्वा भव
भ्रांतुं न द्वंद्वं भेदकारणं ॥५०॥ वस्तुतः सर्वदृश्यं च शिवरूपं मतं मम ॥ अहं भ
वान् अयं चैव रुद्रोयं यो भविष्यति ॥५१॥ एकं रूपं न भेदोस्ति भेदे च बंधनं भ
वेत् ॥ तथापीदं मदीयं वै शिवरूपं सनातनं ॥५२॥ मूलीभूतं सदा प्रोक्तं सत्यं
ज्ञानमनंतकं ॥ एवं ज्ञात्वा सदा ध्येयं तत्वजिज्ञासुना त्वया ॥५३॥ विशेषात्क १३

प्रकृते ८

यं त्वमेतत् ॥ श्रूयतां कथयेन मया नवं तौ जातो नायं वै प्रकृतेः पुनः ॥५४॥ महाना
जायते तत्र ब्रह्मणोऽन्तकृटे रहं गुणोघ प्रियः प्रोक्तस्तामसः प्राकृतो हरे ॥५५॥
वैकारिकश्च विज्ञेयो योहं कारुद्राकृतः । नामतो वस्तुतो नैव नाम सः परि
चक्षते ॥५६॥ एतस्मात्कारणाद्ब्रह्मन् करणीयमिदं त्वया ॥ समोहं सर्वतत्वे
षु पालयैनं पितामह ॥५७॥ एतस्याः प्रकृतेर्लक्ष्मीः ह्येतदंशान् भविष्यति ब्र
ह्माणी च तदंशाश्च महाकाली तदंशका ॥५८॥ भविष्यति परा नूनं कार्यार्थं
नैकतां गता । तं च लक्ष्मीमुपाश्रित्य कार्यं कर्तुमिहार्हसि ॥५९॥ ब्रह्मन्त्व
च स्वरां देविं कर्तुं कार्यमनंतकं । अहं कालीं समाश्रित्य करिष्ये कार्यमु
त्तमं ॥६०॥ चतुर्वर्णमयं लोकं तस्य रक्षार्थमेव वै । तदन्यैर्विविधैः का

शिवपु॰
१४

र्थः कृत्वा सुखमवाप्स्यथ ॥ ६२ ॥ ज्ञानविज्ञानसंयुक्ताः लोकानां हितकारकाः
मुक्तिदोत्र भगवानप्यत्र लोके सनातन ॥ ६३ ॥ मद्दर्शने फलप्राप्तिस्तदेव दर्श
नं तव ॥ ममैव हृदये विष्णुः विष्णोश्च हृदये ह्यहं ॥ ६४ ॥ उभयोरंतरं यो वेन
जानीहि मतो मम ॥ इदं लिंगं सदा पूज्यं नवधा सुखदं तव ॥ ६५ ॥ मणिमयं
धातुः जन्यं हेमं वा पार्थिवं मुने ॥ एतस्माच्च विधेरन्यो वध्यो न मतो मम
एवमुक्त्वा स भगवानस्तत्रैवांतरधीयत ॥ ६६ ॥ तदा प्रभृति लोकेस्मिन् लिंग
पूजाविधिस्मृतः ॥ लिंगवेदी महादेवो लिंगं साक्षान्महेश्वरः ॥ ६७ ॥ यस्तु
लिंगसमीपे तु कार्यं किंचित्करोति च ॥ तस्य फलस्य संख्यानं न शक्नो १४
मि महामुने ॥ ६८ ॥ यस्तु लिंगसमाख्यानं पठ्यते शिवसंनिधौ ॥ पठमा

साक्षिवद्रूपो वै नांत्र कार्या विचारणा ॥ ६९ ॥ ॥ इति श्री शिवपुराणे शिवो
त्पत्तिवर्णनं चतुर्थोध्यायः ॥ ऋषय ऊचुः ॥ सूत सूत महाभाग लिंगोत्पत्तिश्च
ता श्रुता ॥ श्रुत्वा यस्याः प्रभावेन दुःखनाशो भवेदिह ॥ १ ॥ तदंतरं च यज्ञातं
महात्म्यं च शिवस्य च ॥ स्वरूपं चैव प्रकारं तु कथयस्व विशेषतः ॥ २ ॥ सूतो
वाच ॥ सम्यक्पृष्टं भगवञ्छिवस्य ज्ञातं तदनंतरं ॥ कथयिष्यामि संक्षेपा
त् यथापूर्वं श्रुतं मया ॥ ३ ॥ अंतर्हिते तदा देवे शिवरूपे सनातने ॥ ब्र
ह्मणा विष्णुना रूपं हंसवाराहयोस्तदा ॥ ४ ॥ संकृतं च ततस्ताभ्यां यत्कृ
तं श्रूयतामिति ॥ ऋषय ऊचुः ॥ अस्माकं संशयस्तावत्तन्नाशयितुम
र्हसि ॥ ५ ॥ हंसवाराहयोः रूपं ताभ्यां चैव धृतं कथं ॥ अन्यद्रूपं विहा

शिव
१५

येवकिमत्रकारणंवद ॥६॥ इत्येतद्वचनंश्रुत्वास्ततःपोराणीकोब्रवी
त् ॥ गगनेहंसरूपस्यगतिर्नवेतिनिश्चला ॥७॥ हंसस्यचविवेकोस्तिज
लदुग्धविभागयोः ॥ अज्ञानज्ञानयोस्तत्वंतद्विवेकायहंसकः ॥८॥ विवे
कोनेवलब्धश्चयतोहंसोव्यलीयत ॥ सृष्टिप्रवृत्तिकामोवैकथंज्ञानंप्र
जायते ॥९॥ वाराहंकारणंरूपंकल्पार्थंचप्रकल्पितं ॥ यद्दिनंहिसमारभ्य
रूपंचधृतवान्हरिः ॥१०॥ तद्दिनंप्रतिकल्पोवैकल्पोवाराहसंज्ञिकः ॥
तद्दीछावायथाजातानान्यांरूपंधृतंतथा ॥११॥ नैवात्रविस्मयःकार्यो
हंसवाराहरूपके ॥ प्रस्तुतंश्रूयतांपुत्रब्रह्मैवविकृतंचयत ॥१२॥ अ १५
नंतेनिष्कलेलिंगेनिर्गुणेगुणरूपिणि ॥ विष्णवेचैरानंदत्वागुणेषुसु
व

ख्यतांव्रज ॥१३॥ गुणाःसत्वादयश्चैतितेसर्वेहिविमोहिताः ॥ तस्मात्वं
सर्वलोकेषुमान्योपूज्योनविष्यसि ॥१४॥ ब्रह्मणानिर्मितेलोकेयँडुःखं ६
ते प्रजायँतदात्वंसर्वदुःखानां ॥ नाशनेतत्परोनव ॥१५॥ विविधानवतारां
श्चगृहीत्वाकीर्तिमुत्तमां ॥ विस्तारयहरेलोकेतरणायपरेश्वर ॥१६॥ गु
णरूपोऽहंरुद्रोअनेनवपुषापरं ॥ कार्यंकरिष्येलोकानांसर्वथाना
स्य त्रसंशय ॥१७॥ ममध्येयंनवांश्चैवतवध्येयमहंपुनः ॥ आवयोरंनैव तं
ह्यणुमात्रंविचारतः ॥१८॥ वस्तुत्वेवाप्येकलवरतोपितयेवच ॥ मद्भक्तो
यःपरोन्मूत्वातेनिंदांयःकरिष्पाति ॥१९॥ तस्याहंसकलंपुण्यंन्नमीक्ष
त्वाप्युरोपतः ॥ नरकेपातयिष्यामितद्वेषासुरुषोत्तम ॥२०॥ लोके।

शिव० स्मिन्मुक्तिदो नृणां भुक्तिदश्च विशेषतः ॥ ध्येयः पूज्यश्च सर्वेषां निग्रहा
१६ नुग्रहं कुरु ॥ २१ ॥ इत्युक्त्वैव ब्रह्माणं हस्ते धृत्वा स्वयं हरिः ॥ कथयामास शं
करं विष्णुः सहायो भव सर्वदा ॥ २२ ॥ सर्वाध्यक्षश्च देवेषु भुक्तिमुक्तिप्रदायकः ॥ टि०
भव त्वं सर्वथा श्रेष्ठ सर्वकार्यप्रसाधकः ॥ २३ ॥ सर्वेषां प्राणरूपश्च भव
त्वं च मम आज्ञया ॥ त्वां च समाश्रिता ये वै मामेव समुपाश्रिता ॥ २४ ॥ अंत
रं यश्च जानाति निरये पतते ध्रुवं ॥ इदं रूपं त्वया तावद्रक्षणीयं मदा
ज्ञया ॥ २५ ॥ यावच्च ब्रह्मणोप्यायुः शतवर्षमुदाहृतं ॥ चतुर्युगसहस्रा
णां समूहं दिनमुच्यते ॥ २६ ॥ रात्रिश्च तावती तस्य मानमेतत्क्रमेण तु १६
तावद्देहेश्च कार्यं वै कर्त्तव्यं विविधैर्गुणैः ॥ २७ ॥ गुणेषु च न वान्श्रेष्ठो

सतत्वा सुरुषोत्तमः ॥ इत्येतद्वचनं सर्वं तथेत्योमिति वै हरिः ॥ २८ ॥ उवाच ।
परमः प्रीतः शंकरः प्रियकाम्यया ॥ हरिरुवाच ॥ ॥ शंकरः श्रूयतामेतत्कृ
पासिंधो जगत्पते ॥ २९ ॥ सर्वं चैतत्करिष्यामि तव दाज्ञापरायणः ॥ मम ध्ये
यं सदा त्वं च न विस्मासि न चान्यथा ॥ ३० ॥ भवतः सर्वसामर्थ्यं लब्धं चैव तु
रामया ॥ क्षणमात्रमपि चेतध्यानं वै परमात्मनः ॥ ३१ ॥ चेतसो हरतो नैव
मा गच्छतु कदाचन ॥ मम भक्तश्च यो नित्यं तव निंदां करिष्यति ॥ ३२ ॥ त
स्यैव निरये वासं प्रयच्छ निरये ध्रुवं ॥ तद्भक्तो यो न वेत्ति त्वं मद्भक्तः समु
दाहृतः ॥ ३३ ॥ एवं यो वै विजानाति तस्य मुक्तिर्न दुर्लभा ॥ महिमा च महि
मा च मदीयो वधितो नव ॥ ३४ ॥ कदाचिद्देवगणानां च जायते क्षम्यतामिति

को

शिव० ततः शंभुस्तदीयं हि श्रुत्वा वचनमुत्तमं ॥३५॥ उवाच विस्मये विप्राः
स्तं तथा गणनायक ॥ इत्युक्तोऽत्र तदा धीरः शंभुः सर्वकल्याणकारकः ॥३६॥ अंत
र्हिते तदा देवे ब्रह्मलोकपितामहः ॥ तदीयं वचनं कर्तुं समाधानपरायणः
॥३७॥ नमस्कृत्य तदा विष्णुं ज्ञानेशं प्राप्य हेमस्तथा ॥ आनंदं परमं गत्वा स्व
ष्टिं कर्तुं मनो दधे ॥३८॥ विष्णुश्चापि तदा तत्र संतर्धानमुपागतः । पूर्वस
ष्टं जलं यच्च तत्रांजलिमुपक्षिपत ॥३९॥ अतोऽंडमनवत्तत्र चतुर्विंशतिसं
ज्ञिकं ॥ विराड्रूपमनं द्विप्रा जडरूपमपश्यत ॥४०॥ ततः संशयमापन्नो
तपस्तेपे सुदारुणं । द्वादशाब्दं पुनस्तत्र विष्णुर्ध्यानपरायणः ॥४१॥ त २७
स्मिन्समये विष्णुः प्रादुर्भूतो हरिः स्वयं ॥ प्रसन्नोऽस्मि वरं ब्रूहि नारदेये विघ
श्च

ते नव ॥४२॥ ॥ ब्रह्मोवाच ॥ ॥ पुष्टमेतन्महाराज त्वया हे शंभुना चते ॥ तद
कं वक्तुं तमेघजडीभूतं प्रदेवपते ॥४३॥ प्राणन्तो नवानघ नत्वा चैतन्य
मावह ॥ इत्युक्ते च तदा तेन शंभोनाराज्ञापरायणः ॥४४॥ अनंतरूपमास्था
य प्रविवेश हरिस्त्वयं ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात ॥४५॥
सभूमिं सर्वतः स्पृष्ट्वा तदंडं व्याप्य वानिति ॥ इति श्रीशिवपुराणे ब्रह्मां
डनिर्माणो नाम पंचमोऽध्यायः ॥ ॥ सूतोवाच ॥ ॥ शृयतां ऋषयः श्रेष्ठा
कथं पापप्रणाशनीं ॥ प्रविष्टे विष्णुना तस्मिं ब्रह्मणा संस्तुते नवै ॥१॥ स
चेतनं तं तत्र चतुर्विंशतिसंज्ञिकं । पातालादिसमारभ्य सप्तलोका
वधिकायं ॥२॥ राजते स्म हरिस्तत्र वैराजः पुरुषः प्रभुः ॥ स तं पदस्तुपा

कं

शिव० १८

श्रियास्थितोसौ पुरुषोत्तमः।३।तपोलोकंसमास्थाय वर्त्तते तिष्ठत्तपोध
नः॥अन्येषु सर्वलोकेषु यथायोग्यमवस्थितिः।४।ततश्चमानसाःपु
त्रानिर्मितब्रह्मणापुरा।तेचोर्द्धरेतसःसर्वे पश्चात्तेरूपीरेनुः।तेवि दया
रक्ताश्चसंजाताः पश्चात्क्रोधमेधधापसः।तेनैवरोद्रतंचक्रेततश्चैवाप्नव
द्रः।६।रोदनाद्रुद्रनाम्नेतिप्रसिद्धोभगवान्भवः।ब्रह्मन्दुःखंकिमुत्प
न्नं स्फेटयामिनमस्राय ः।७।इत्येतद्वचनंश्रुत्वाब्रह्मावचनमब्रवीत्॥
साधुकृतंचत्वयादेवसृष्टौविघ्नोदयोनवेत।८।तपोर्वित्वयानिसंसृष्टि को ६
स्यात्तेनपायिनी॥इत्येवंवचनंश्रुत्वालोकानांदुःखदाहरः।९।वचमंग्र १८
कवांस्तत्रस्रष्टुःप्रियविकीर्षया॥अहंचैवकरिष्यामिसृष्टिरेषासना

स्त

तनी॥१०॥इत्युक्त्वाब्रह्मणोरुद्रःगुणरूपाहरंस्वयंकैलासमचलंयाव
त्निर्मितंरूपिसत्तम॥११॥ततोब्रह्मारूपीनुसभन्नगवाद्दान्निर्मिमे
तदाउत्संगान्नारदश्चैवछायायांकर्दमंपुनः।१२।अंगुष्ठाच्चतथादक्षं
ग्रं४ एवंद्रव्याक्रमेणातु।न्तश्चैवतयाजातोमरीचिर्नामवैऋषिः।१३।ततश्च
कश्यपोजज्ञेतेनैवपूरितंजगत्।षष्टीकन्यातयाजाताःदक्षस्यैवम
हात्मनः।१४।त्रयोदशानयकन्याकश्यपायमहात्मने।दत्ताक्षेदणना:
कन्याःविधिवद्दर्षिसत्तमा।१५।ततःप्रसूतिर्निर्मितासांचकश्यप
स्यच।देवाश्चदनुजाश्चैवदैत्याश्चविविधास्तदा।१६।वृक्षाश्चपक्षिणा
श्चैवसर्पपर्वतवीरुधः।प्रसूतादक्षकन्याभिर्व्याप्तमेतच्चराचरं॥१७॥

शिव. १९ पातालं च तथा रम्यं सत्यलोकावधि ध्रुवं । ब्रह्मांडं सकलं व्याप्य संस्थितं नै
व कदाचन ॥ १८ ॥ सतीनाम तया कन्या रुद्राय च महात्मने । दत्ता दक्षेण सा
देवी भवानीति प्रकीर्त्तिता ॥ १९ ॥ ब्रह्मा विष्णुश्च रुद्रश्च गुणास्त्रय उदाहृताः
विष्णुः सत्त्वं रजो ब्रह्मा तमो रुद्र उदाहृतः ॥ २० ॥ तया गुणमयी देवी लक्ष्मी
सत्त्वमुपाश्रिता । रजसा च तथा ब्राह्मी तमोरूपा तु सा सती ॥ २१ ॥ गुणारू
पा महाकाली या वै रुद्रमुपाश्रिता । पुनश्च पार्वती जाता सा शैवं समुपा
श्रिता ॥ २२ ॥ ततो नामान्यनेकानि जातानि ऋषिसत्तमाः । कालिका चंडि
का भद्रा चामुंडा विजया जया ॥ २३ ॥ नामधेयान्यनेकानि प्राप सा पर्व १९
तात्मजा ॥ गुणमय्यस्त्रयो देव्यः देवाः गुणमयास्त्रयः ॥ २४ ॥ मिलिता

विविधास्सृष्टिं च कुर्वन्ति कार्यमुत्तमं ॥ इत्येवं वचनं श्रुत्वा ऋषयस्ते मलाश
याः ॥ २५ ॥ नारदश्चैव योगेन्द्रो हर्षनिर्भरमानसः । अपृच्छत्परमां दिव्यां क
थां चैव पुरातनीं ॥ २६ ॥ अप्राप्य तृप्तिं ते सर्वे प्रपच्छुः पुनरेव ते ॥ ऋषय ऊचुः
॥ सूत सर्वं हि जानासि प्रसादाच्च गुरोरिह ॥ २७ ॥ त्वन्मुखांभोजसंभूतां पीत्वा
हरकथामृतं ॥ न तृप्यामः पुनः स्तां च पातुमिच्छामहे वयं ॥ २८ ॥ प्रथमं दक्ष
पुत्री च पश्चात्त्वं पर्वतात्मजा । कथमेकशरीरेण द्वयोः पुत्री प्रजायत ॥ २९ ॥
कथं वै पार्वती पुण्या पुनः शिवमुपागता ॥ एतत्सर्वं तथान्यच्च सत्त्वं कथयितु
मर्हसि ॥ ३० ॥ तदुक्तं तु तदा श्रुत्वा सूतो वचनमब्रवीत् ॥ ३१ ॥ ॥ इति श्री
शिवपुराणे रहस्ये सृष्टिनिरूपणं नाम षष्ठोऽध्यायः ॥ ॥ सूत उवाच ॥

वि

शिवपु० २० श्रूयतां ऋषयः श्रेष्ठाः कथयामि शुभां कथां । यच्छ्रुत्वा सफलं जन्म मनुष्या-
२० णां न संशयः ॥१॥ पूर्वं दक्षस्य रुद्रस्य स्पर्धा जाता महात्मनोः । ततो दक्षः स्वयं
यज्ञं कृतवान् देवसंनिधौ ॥२॥ अनाहूय तया रुद्रं पूर्वं ऋषिसत्त्विनः ततो
देवी सती नाम्नी पित्रा नाकारिता यदा ॥३॥ तया गत्वा पुनस्तत्र नाहूता पि पि-
तुर्गृहे ॥ साप्यावज्ञां तु सा तत्र देहत्यागमथाकरोत् ॥४॥ यज्ञध्वंसे तदा जाते
देवलोके यजिविते ॥ रुद्रस्यानुचरैस्तत्र वीरभद्रादिकैः कृते ॥५॥ रुद्रे क्रुद्धे
कथं लोके सुखं भवति सत्तमाः । पश्चात्तुद्भ्रसन्तोषात् तद्देवानां स्तवनाद-
पि वा ॥६॥ सर्वं वस्तु कृतं तेन कृपालुत्वान्महात्मना । रुद्रश्च पूजितस्तत्र देवैर्वेद- २०
वचरस्तदा ॥७॥ सतीदेहसमुत्पन्ना ज्वाला लोकभयावहा । पतिता पर्व-

तेयत्र पूजिता सुखदायिनी ॥८॥ ज्वालामुखीति सा प्रोक्ता सर्वकामफल-
प्रदा । इदानीं पूज्यते लोके सर्वकामफलाप्तये ॥९॥ सा देवी शैलराजस्य
पत्नी मेनेति विश्रुता पितॄणां मानसी कन्या तस्यां जन्म सदा बुधे ॥१०॥
ततश्च पार्वती नाम प्रसिद्धमभवत्तदा । सा पुनः शिवमाराध्य भर्तारं स-
मुपाश्रिता ॥११॥ भजतां सर्वलोकानां फलं यच्छत्यनेकशः ॥ एतत्सर्वं स-
माख्यातं यत्पृष्टोऽहं पुरातनाः ॥१२॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र सं-
शयः । इति श्रुत्वा वचस्तस्य नैमिषारण्यवासिनः ॥१३॥ पप्रच्छुः ऋषयः
श्रेष्ठाः कथां पापप्रणाशिनीं । ऋषय ऊचुः ॥ सूत सूत महाभाग कथा
पापप्रणाशिनी ॥१४॥ श्रुत्वा तु त्वन्मुखाद्देवं तृप्ताः स्म वयं प्रभो ॥ पुनः

न

कथयतत्सर्वं शिवस्याराधनक्रमं ॥१५॥ यस्य यस्य विधिः प्रोक्तो येनैवारा
धितः शिवः ॥ प्रसन्नेन शिवेनैव कस्मै दत्तं फलं तु यत् ॥१६॥ पार्वत्याश्च त
पश्चैव विवाहश्च तथानघ ॥ त्रिपुरस्य वधश्चैव ज्योतिर्लिंगसमुद्भवः ॥
१७॥ ज्योतिर्लिंगानि कतिधा किं तेषां दर्शने फलं ॥ ब्राह्मणैः क्षत्रियैर्वै
श्यैः शूद्रैर्वा शिवपूजनं ॥१८॥ कथं कार्यं तथा ब्रूहि यथा व्यासमुखा
च्छ्रुतं ॥ तच्छ्रुत्वा वचनं तेषां वचनं प्रकृतिसंमतं ॥१९॥ उवाच सकलं तत्र
प्रश्नस्यानुक्रमेण तु ॥ सूत उवाच ॥ सम्यक् पृष्टं भवद्भिश्च यदहं स्वमु
नीश्वराः ॥२०॥ तदहं कथयाम्यद्य यथा बुद्धि यथा श्रुतं ॥ भवद्भिः पृष्ट
तेयद्वत्तथा व्यासेन वै पुरा ॥२१॥ पृष्टं सनत्कुमाराय तच्छ्रुतं ह्युपमन्यु

ना ॥ ततो व्यासेन वै श्रुत्वा शिवपूजादिकं च यत् ॥२२॥ मह्यं च पाठितं ते
न लोकानां हितकाम्यया ॥ यच्छ्रुतं चैव कृष्णे[illegible]न ह्युपमन्योर्महात्मनः ॥
२३ तदहं कथयिष्यामि शृण्वंतामृषिसत्तमाः ॥ वक्ष्यामि शृणु संक्षेपाल्लिं
गार्चनविधिक्रमं ॥२४॥ वक्तुं वर्षशतेनापि न शक्यो विस्तरेण तु ॥ एवं च
शंकरं रूपं सुखमिष्टं सनातनं ॥२५॥ पूजयेत्परया भक्त्या सर्वकामव
राप्तये ॥ दरिद्ररोगदुःखं च संकटं शत्रुसंभवं ॥२६॥ पापं चतुर्विधं तावद्या
वन्नार्चयते शिवं ॥ संपूजिते शिवे देवे सर्वं दुःखं प्रलीयते ॥२७॥ यो वै मा
नुषमाश्रित्य सुखसंतानकामुकः ॥ तेन पूज्यो महादेवः सर्वकामार्थ
साधकः ॥२८॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च विधिवत्क्रमात् ॥ प्रातः का

भा

शिव· लेसमुत्थाय मुहूर्ते ब्रह्मसंज्ञिके ॥ २९ ॥ विष्णोश्च स्मरणं कृत्वा गुरोश्चै
२२ व यथा पुनः ॥ तीर्थानां स्मरणं कृत्वा ध्यानं चैव हरेरिति ॥ ३० ॥ मेघश्याम
चतुर्बाहो नक्षत्रानामन्यय । प्रदत्तं रूपं सुंदरं सर्वं ह्लादिवसत्तु निसज्ञाः ३
१ ॥ ततस्तत्र शुभे नाम गृहीत्वा विधिपूर्वकं । ततो त्थाय मलोत्सर्गं द
क्षिणस्यां दिशि क्रमात् ॥ ३२ ॥ एकांते तु तदा कृत्वा मलोत्सर्गविधिं पुनः
क्षालयेत् हस्तपादौ च मृदानि विधिवत्क्रमात् ॥ ३३ ॥ शुद्धां मृदं समानी
य पंचवारं विशुद्धयेत् ॥ क्षत्रीयस्य चतुर्वारं वैश्यो वारत्रयं तथा ॥ ३४ ॥
शूद्रस्यैव द्विवारं च मृदानुग्रहणं क्रमात् ॥ हस्तौ पादौ च प्रक्षाल्य पूर्वव २२
न्मृदमाहरेत् ॥ ३५ ॥ स्त्रीणां तु शुद्धवत्कार्यं मृदादिग्रहणं शुभं ॥ दंतका

ष्ठं ततः कुर्यात् द्वादशांगुलमानतः ॥ ३६ ॥ एकादशांगुलं राजा वैश्यो द
शांगुलं तथा ॥ शूद्रो नवांगुलं कुर्यात् स्मर्तेर्मानमिदं तत ॥ ३७ ॥ कालदो
ष विचार्यैवमनुचिष्ठं विवर्जयेत् ॥ स्नानं तु विधिवत्कार्यं तीर्थादिषु क्र
मेण च ॥ ३८ ॥ देशकालाविरोधेन स्नानं कार्यं समंत्रकं ॥ आचमनं प्रथमं
नत्र धौतं वस्त्रं च धारयेत् ॥ ३९ ॥ एकांते सुस्थले स्थित्वा संध्याविधिं स
माचरेत् ॥ यथायोग्यं विधिं कृत्वा पूजाविधिं समाचरेत् ॥ ४० ॥ मनस्तु सु
स्थिरं कृत्वा पूजागारं प्रविश्य च ॥ पूजाद्रव्यं समादाय क्रमेण पूजयेद्द
रं ॥ ४१ ॥ प्रथमं च गणाधीपं क्षारपालं ततः परं ॥ दिक्पालस्तु ततः पूज्याः
पश्चात् पीठं प्रकल्पयेत् ॥ ४२ ॥ अथवा पट्टलं कृत्वा पूजाद्रव्यं समीपतः

उपविश्य ततस्तत्र उपलक्ष्य शिवं स्मरेत् ॥४३॥ आचमनं च त्रयं कृत्वा प्र
क्षाल्य च पुनः पुनः प्राणायामत्रयं कृत्वा ध्यायेद्देवं च त्र्यंबकं ॥४४॥ पंच
वक्त्रं दशभुजं शुद्धस्फटिकसंनिभं ॥ सर्वाभरणसंयुक्तं व्याघ्रचर्मोत्त
रीयकं ॥४५॥ तस्य मानस्यमाश्रित्य देहेत्वापं नरस्तदा ॥ शैवं तत्त्वं समा
स्थाय पूजयेत्परमेश्वरं ॥४६॥ देहशुद्धिं ततः कृत्वा मूलमंत्रं न्यसेत्क्र
मात् ॥ सर्वत्र प्रणवेनैव षडंगन्यासमाचरेत् ॥४७॥ कृत्वाद्यादित्रयेणं
च पूजां समारभेत्ततः ॥ तथाद्याचमनीयार्घ्यकल्पितं पात्रमेव च ॥४८॥
स्थापयेद्विधिनाधीमान् वकुं यथाविधि दर्भेराच्छाद्य तेनैव संस्था
प्यास्फाल्य वारिणा ॥४९॥ तेषु तेषु च सर्वेषु क्षिपेत्तोयं सुशीतलं ॥ प्रण

वेन क्षिपेत्तेषु दृष्ट्वा एवालोक्य बुद्धिमान् ॥५०॥ उशीरं चंदनं चैव पाद्ये तु
परिकल्पयेत् जातिकंकोलकर्पूरबकुलमालतमालकं ॥५१॥ चूर्णयित्वा
यथान्यायं क्षिपेदाचमनीयके ॥ एलां सर्वेषु पात्रेषु स्थापयेच्चंदनं तथा
॥५२॥ पार्श्वतो देवदेवस्य नंदीशं तु समर्चयेत् ॥ गंधैः पुष्पैस्तथा धूपै
र्विविधैः पूजयेच्छिवं ॥५३॥ लिंगशुद्धिं ततः कृत्वा मुद्रायुक्तो नरस्तदा
जप्त्वा सर्वाणि मंत्राणि प्रणवादिनमोंतकं ॥५४॥ कल्पयेदासनं पश्चा
त्पद्माख्यं प्रणवेन तु ॥ तस्य पूर्वदिशं साक्षादणिमामयक्षरं ॥५५॥ ल
घिमा दक्षिणं चैव महिमा पश्चिमं तथा ॥ प्राप्तिं चैवोत्तरं पत्रं प्राकाम्यं
पावकस्य च ॥५६॥ ईशात्वं नैरृतं पत्रं वशित्वं वायुगोचरे ॥ सर्वज्ञत्वं तथै

शान्यां कार्णिका सोम उच्यते ॥ ५७ ॥ सोमस्याधस्तथा सूर्यस्तस्याधः पावकः
स्वयं ॥ धर्मादयोपि दृक्ष्यंते अनंतं कल्पयेत्क्रमात् ॥ ५८ ॥ अव्यक्तादिच
तुर्दिक्षु सोमस्यांते गुणत्रयं ॥ सद्योजातं प्रपद्यामि त्यावाह्य परमेश्वरं
५९ ॥ वामदेवेण मंत्रेण तिष्ठेद्वासनोपरि ॥ सान्निध्यं रुद्रगायत्र्या अ
घोरेण निरुध्य वै ॥ ६० ॥ ईशानः सर्वविद्यानामिति मंत्रेण पूजयेत्
पाद्यमाचमनीयं च विनोश्चार्घ्यं प्रदापयेत् ॥ ६१ ॥ स्नापयेद्विधिना रु
द्रं गंधचंदनवारिणा ॥ पंचगव्यविधानेन गृह्य पात्रे निमंत्र्य च ॥ ६२ ॥ प्र
णवेनैव गव्यैस्तु स्नापयेत्पयसा च तं ॥ दध्ना च मधुना चैव तथ चेक्षु २४
रसेन च ॥ ६३ ॥ घृतेन च तथा पूज्यं सर्वकामहितावहं ॥ पुण्यैः द्रव्यैर्म

हादेवं प्रणवेनाभिषेचयेत् ॥ ६४ ॥ जलभांडैः पवित्रैस्तु मंत्रैस्तोयं क्षि
पेत्ततः ॥ शुचिं कृत्वा यथान्यायं सितवस्त्रेण साधकः ॥ ६५ ॥ तावद्दूरं न
कर्तव्यं यावच्चंदनं क्षिपेत् ॥ तंडुलैः सुंदरैस्तत्र पूजयेच्छंकरं मुदा ॥
६६ ॥ अपामार्गकर्पूरजातिचंपकपाटलैः ॥ कणवीरैः सितैश्चैव
मल्लिकाकमलोत्पलैः ॥ ६७ ॥ आपूर्य पुष्पैर्विविधैश्चंदनाद्यैश्च तन्म
लं ॥ जलेन जलधारां च कल्पयेत्सरमेश्वरे ॥ ६८ ॥ पात्रैश्च विविधै
र्देवं स्नापयेच्च महेश्वरं ॥ मंत्रपूर्वं प्रकर्तव्या पूजा सर्वफलप्रदा ॥ ६९ ॥
मंत्राणि ते प्रवक्ष्यामि शृणुष्व सर्वार्थसिद्धये ॥ ये लिंगं सकृदभ्यर्च्य वै स्ना
प्यवार्च्य तिमानवाः ॥ ७० ॥ ॥ इति श्री शिवपुराणे सं० ज्ञा० शिवस्न

नविधौमंत्रमोध्यायः॥ ॥पवमानेनमंत्रेणतथावाऽग्नीयकेनच
रुद्रेणनीलरुद्रेणश्रीसूक्तेणशुभेनच॥१॥रजनीसूक्तकेनैवचमकेन
नमस्तेनच॥अथज्येष्टेनसाम्नावातथादेवव्रतेनच॥२॥रथंतरेण
पुष्पेण।सूक्तेनपुरुषेणतु॥मृत्युंजयेनमंत्रेणपंचाक्षरेणवापुनः
३॥जलधारासहस्रेणशतेनैकोत्तरेणवा।कर्तव्यावेदमार्गेणनाम
निर्वापिवापुनः॥४॥ततश्चंदनपुष्पादिरोपणंचशिवोपरि।दापये
त्वणवेनैवमुखवासादिकानिवै।५।ततःस्फटिकसंकाशंदेवंनिष्क
टमक्षरं॥कारणंसर्वलोकानांसर्वलोकमयंपरं॥६॥ब्रह्मेंद्रविष्णु २५
रुद्राद्यैरपिदेवैरगोचरं॥वेदविद्भिर्हिवेदांतेवागोचरमितिस्मृतं

त्व
७॥आदिमध्यांतरहितंभेषजंसर्वरोगिणां॥शिवत[illegible]मितिख्यातं
शिवलिंगव्यवस्थितं॥८॥प्रणवेनैवमंत्रेणपूजयेल्लिंगमूर्द्धनि॥धू
पैर्दीपैश्चतांबूलैरारात्रिकविधानतः॥९॥नमस्कारस्तवैश्चान्यैर्मं
त्रैर्नानाविधैरपि॥स्तोत्रंजपंचविधिनानमस्कारप्रदक्षिणां॥१०॥
५ पु अर्घंदत्वातुपुष्पाणिपादयोस्तुविकीर्यचप्रणिपत्यचदेवेशमात्मना
राधयेच्छिवं॥११॥हस्तपुष्पंगृहीत्वातुसमुत्थायकृतांजलिः॥प्रार्थये
त्पुनरीशानंमंत्रेणानेनवैशिवं॥१२॥अज्ञानाद्यदिवाज्ञानाज्जपपू
जादिकंमया॥कृतंतदस्तुसफलंकृपयातवशंकर॥१३॥पठित्वै
वंतुतस्तुंशिवोपरिन्यसेत्तदा॥स्वस्त्यय[illegible]ततःकृत्वार्घंशिवो

शिव विधिर्यस्तथा ॥ १४ ॥ मार्जनं तु ततः कार्यं शिवस्योपरि वै पुनः । नम
२६ स्कारं ततः कृत्वा तिपुनरागमनाय च ॥ १५ ॥ अघोरं च रणमुच्चार्य नमस्का
रं प्रकल्पयेत् ॥ प्रार्थयेच्च पुनस्तत्र सर्व[illegible]भावसमन्वितः ॥ १६ ॥
शिवे भक्तिः शिवे भक्तिः शिवभक्तिर्भवे भवे । अन्यथा शरणं नास्ति
त्वमेव शरणं मम ॥ १७ ॥ इति संप्रार्थ्य देवेशं सर्वसिद्धिप्रदायकं
पूजयेत्परमानन्दयागदानादिविशेषतः ॥ १८ ॥ नमस्कारं ततः कु
र्यात्परिवारगणैः सह । प्रहर्षमतुलं लब्ध्वा कार्यं कुर्याद्यथासुखं
१९ । एवं यः पूजयेन्नित्यं शिवं भक्तिपरायणः । तस्य वै सकला २६
सिद्धिः जायते तु पदे पदे ॥ २० ॥ षण्मासाज्जायते तस्य मनोनि

छफलं ध्रुवं ॥ रोगे दुःखं च शोकं च उद्वेगं तस्य मं तथा ॥ २१ ॥ कोटिस्त्वं च
गरं चैव यद्दुःखमुपस्थितं । तद्दुःखं नाशयत्येवं शिवः शिवकरः पा
रः ॥ २२ ॥ कल्याणं जायते तस्य शुक्लपक्षे यथा शशी वर्धते तद्गुणास्त
त्र शिवस्य पूजना ध्रुवं ॥ २३ ॥ एवं ते तु मया प्रोक्तं श्रुतं व्यासमुखाद्धि
ह ॥ अतः परं प्रवक्ष्यामि कथां पापप्रणाशिनीं ॥ २४ ॥ या पृष्टा ते त्वया द्वि
ष्वतामहं विधिपूर्वकं ॥ इति श्रीमच्छिवपुराणे शिवपूजनं नामा
ष्टमोऽध्यायः ॥ ॥ ऋषय ऊचुः ॥ ॥ व्यासशिष्य महाभाग सम्यगु
क्तं त्वयानघ ॥ त्रिपुरस्य जयं ब्रूहि कथं वै त्रिपुरं हतं ॥ १ ॥ किं रूपं त्रिपु
रस्य ह कुत्र वा विकृतिं गतः ॥ किं सैन्यं तस्य दुष्टस्य शिवस्य च महद्बलं

२। एतत्सर्वं प्रयत्नेन अन्यत्त्वाविविधं मुने ॥ कथनीयं त्वया सम्यक् धन्य
त्वं बुद्धिमानसि ॥ ३॥ एवं वचस्तदाकर्ण्य सूतस्तेवाब्रवी मुनः ॥ सूतोवाच ॥
साधु पृष्टं महाभागाः लोकानां हितकाम्यया ॥ ४॥ यथैतासर्वलोकानां
दुःखहानिर्भविष्यति ॥ तारापुत्रो महामायी मायीनामपि मोहकृत ॥ ५
॥ सर्वदेवजयं कार्यं तपस्तेपे सुदारुणं ॥ मधोर्वनमुपाश्रित्य गुर्वाज्ञापरि
पालकः ॥ ६॥ ऊर्ध्वबाहुश्चैकपादः रविं पश्यन् स चक्षुषा ॥ शतवर्षं तथा
तस्थावातमंगुष्टकेन च ॥ ७॥ शतमेकं जलेनैव शतमेकं तु वायुनुक् ॥
शतमेकं तु हस्तस्य तलेन च नुवं स्पृशन् ॥ ८॥ शतमेकं तु वृक्षाणां शाखा
मालंव्य वै मुने ॥ अधोमुखं तु वृक्षाणां शतमेकं गतं तदा ॥ ९॥ एवं कष्टत

रं तप्तं श्रावनामपि दुःसहं ॥ तस्यैव शिरसस्तत्र तेजश्च निःसृतं महत् ॥ १०
तेनैव देवलोकस्ति दग्धप्रायाबभूविरे ॥ इंद्रं भयमापदे स्वपदं कर्षयिष्य
तेनेव देवलोकस्ति दग्धप्रायावभूविरे ॥ अकांडे चैव ब्रह्मांडे सं
ति ॥ ११॥ अत्यंतं दुःखमापन्नाः सर्वदेवास्तदा विनो ॥ अकांडे चैव ब्रह्मांडे सं
हरिष्यति वै प्रभुः ॥ १२॥ इति संत्रासमापन्ना निश्चयं नोपलेभिरे ॥ एतस्मिन्न
मये ते वै ज्ञातं वंतो न कारणं ॥ १३॥ ब्रह्माणं च समुद्दिश्य तपस्तस्यातिदारु
णं ॥ इति निश्चयमापन्नादेवाश्चैव परस्परं ॥ १४॥ यदि ब्रह्मा वरं तस्य न ददा
स्यति सदुष्करं ॥ तथापि सर्वलोकानां नाशश्चैव न विष्यति ॥ १५॥ सर्वथा दुः
खमुत्पन्नं यदि ॥ नैव प्रदास्यति ॥ दास्यति वा वरं तस्मै दुःखं वै सर्वथाधि
वं ॥ १६॥ यदि न दीयते तस्मै वरं दुःखहरं नृणां ॥ तयदीनां च लोकानां नाशो

शिवपु० २८ नवितुमर्हति ॥१७॥ यदिदैत्योवस्तस्मैकालेनाशोनविष्यति ॥ एतस्माच्चव
रंयच्चदीयतेनात्रसंशयः ॥१८॥ इतिकृत्वामतिंदेवाःब्रह्माणंसमुपस्थिताः
नमस्कृत्यस्थिताः ॥ तास्तत्रतस्मैसर्वंनिवेदयत ॥१९॥ ब्रह्मासर्वंसुनिश्चित्यदे
वाज्ञापरिसाधकः ॥ वरंदातुंतदातत्रजगामहंसवाहनः ॥२०॥ यत्रवैतारको
नामतपस्तप्यतिदारुणं ॥ उवाचवचनंतस्मैवरंब्रूहिमनोप्सितं ॥२१॥ तप
स्तप्तंत्वयाघोरंनादेयंविद्यतेतव ॥ इत्येवंतुतदाश्रुत्वातारकाख्योम
हासुरः ॥२२॥ ब्रह्माणंप्रणिपत्यैवंवरंवव्रेसुदारुणं ॥ दैत्योवाचत्वयिप्र
सन्नेवरदेकिमसाध्यंभवेन्मम ॥२३॥ यदिप्रसन्नोदेवेशत्वयादेयोव २८
रोमम ॥ वरंद्वयंतदादेयंश्रूयतांचपितामह ॥२४॥ त्वयाचनिर्मितेलो

केमत्तुल्योबलवान्नहि ॥ शिववीर्यसमुत्पन्नःपुत्रोसेनापतिर्यदा ॥२५॥
भूत्वाशस्त्रंक्षिपेन्मह्यंतदामेमरणंभवेत् ॥ इत्युक्तेचतदातेनब्रह्मालोक
पितामहः ॥२६॥ वरंचतारकायादाद्दत्वादेवान्नापरायणाः ॥ जगामभवनंस्वी
यंतदाहःश्रांतिमुपागतः ॥२७॥ दैत्योपितपसस्तस्माद्विरराममहामु
ने ॥ वरंलब्ध्वाश्रुतेतत्रशोणिताख्यंपुरंगतः ॥२८॥ इतस्ततश्चयेदैत्याः
मिलितास्तेतथाब्रुवन् ॥ प्रजानवतामस्माकंत्रिलोक्यांतारकासुरः ॥
२९ ॥ अनिमिषिकोसवैराजादैत्याधीशोभवत्सुराः ॥ आज्ञांप्रवर्त्तया
मासपृथिव्यांनान्यशासनं ॥३०॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चा
न्यविजातयः ॥ सर्वेवापीडितास्तेनतारकेणदुरात्मना ॥३१॥ देवावाद

शिव० नवाश्चान्येयक्षाः किंपुनर्यास्तदा। पीडिताः सर्व एवैते तेनेव्यो रत्नानु
२९ पादद। ३२। इंद्रादिभिश्चादिक्पालैः स्वीयं रत्नं समर्पितं। इंद्रेणोच्चैःश्रवा
स्तस्मै धर्मेणादंडरत्नकं। ३३। कुबेरेण गदा तस्मै निधयो नव एव च॥
वरुणेन हयाः शुभ्राः कूपिभिः कामधुक् तथा॥ ३४॥ यत्र यत्रास्तु नेदृष्टं
तत्तदानीनवान्तदा। समुद्रश्च तथा रत्नान्यदात्तस्मै पुरा मुने॥ ३५॥ सू
र्यश्चातपनेतावत्तथावद्दुःखं न जायते। चंद्रस्तत्र सदा हृद्येपावासु सर्वा
नुकूलवान्॥ ३६॥ देवानां चैव तद्दव्यं पितॄणां कव्यमेव च॥ तत्सर्वं समु
पादत्तमसुरेणाबलीयसा॥ ३७॥ त्रैलोक्यं चैव तत्सर्वं तारकाज्ञापराय २९
णं॥ ते देवाश्च सदा तत्र सेवामार्गपरायणा॥ ३८॥ कश्यपश्च तदा सर्वे

तस्याज्ञापरिपालकाः॥ यक्षाः किंदूषाश्चान्ये किंपुनर्मानुषा इमे। ३९
॥देवोद्यानानि सर्वाणि तीर्थान्यपि महामुने॥ आनीतानि गृहे तेन नाकै
विद्वक्षोपितं॥ ४०॥ एवं वर्षाण्यनेकानि गतानि पीडितास्तदा॥ सर्वे देवा
मिलित्वा च ब्रह्माणं शरणं गता॥ ४१॥ ॥इति श्री शिवपुराणे तारकमये
देवागमनो नाम नवमोध्यायः॥ ॥ते सर्वे च तदागत्य ब्रह्माणं जगतः
प्रभुं॥ नमस्कृत्य स्थितास्तत्र नम्रीभूताः कृपीश्वराः॥ १॥ तान्विषण्णान्त
दा तत्र दृष्ट्वा वाच पितामहः॥ यूयमत्र कथं प्राप्ताः किं दुःखं भवतां पुनः॥
२॥ तद्बृहस्फेरयामप्ययघसाध्यं न वेदिह॥ इत्येतद्वचनं श्रुत्वा वचने
परमर्षयः॥ ३॥ देवाः सानुचराः सर्वे वचनं चेदमब्रुवन् देवा ऊचुः॥

शिव॰ पु॰ ८

न्नवतोकिमविज्ञातंकुरुध्वंचयदुपस्थितं।४।तारकाद्वैवयंदुःखंसंप्रतं
परमेश्वरः।तदुःखेनाद्यायत्वंचवयंसर्वेसमागताः।५।इत्येतद्वचनंश्रु
त्वाब्रह्मावचनमाददे।मत्तोनैववधोयोग्योमत्तोवृद्धिमुपागतः।६।उ
पायंवदिष्याम शृणुतोऋषिसत्तमाः॥ ॥ब्रह्मोवाच॥ ॥शिववी
र्यसमुत्पन्नःपुत्रश्चैनंहनिष्यति।७।तच्चैवदुर्लभंदेवाःविचारंयेहंनि
रंतरं।बुद्धिरेकासमुत्पन्नातथाचक्रीयतेयदि।८॥हिमवच्छिखरेरम्ये
शंभुस्तप्यतिनिस्तन्द्रः।सखिभ्यांसहितातत्रपरिचर्यांशिवस्यह।९॥
वचनान्नारदस्यैवमुमापित्रानुमानिता।करोतीहऋषिश्रेष्ठाःतस्या ३०
संयोगतांव्रजेत॥१०।यदिशिवस्तदातत्रतस्यांवीर्यसमा — तत्र
दधे

श्चैवात्रवःकार्यंनविघ्नंतिनचान्यथा।११।शिववीर्यंसमाधातुंक्षमाना
न्यापराशिवा।यथावीर्यंमहीयतेनलरूपधरःशिवः॥१२ समाधातुंसम
र्थास्तितस्मादन्यानवैपुनः॥तथापापंकरिष्यध्वंतदासिद्धिर्नविष्यति।
१३॥इत्येवंवचनंतस्यश्रुत्वातेसर्वएवहि।नमस्कृत्यपरंतत्रविचार्यतः
परस्परं॥१४॥तेसर्वेतुमरुत्वंतंब्रह्मणोक्तंन्यवेदयत॥यथातथाशिवायां
वैरूचिरुत्पद्यतेतथा।१५।मघवन्त्वयाचकर्त्तव्यंब्रह्मोक्तंसर्वमेवतत
इत्येवंसकलंदेवाःनिवेद्यविधिवत्ततुनः।१६।जग्मुस्तेस्तुनयोदेवाःस्वं
स्थानेमुदान्विताः॥गतेषुतेषुदेवेंद्रःसस्मारमकरध्वजं॥१७॥आगत
स्तत्क्षणाद्देवारत्यायुक्तःस्वयंप्रभुः।प्रणामंचततःकृत्वास्थितःसां

शिव० ३१ जलिरब्रवीत॥१८॥ किंकार्यंतेसमुत्पन्नंस्मृतोहंकेनहेतुना। तत्वंकथ
यदेवेशातत्कर्तुंसमुपागतः॥१९॥ इत्युक्त्वातुमहेशायस्थितस्तस्थौश्रीयास
र। इंद्रोपिवचनंश्रुत्वाकंदर्पस्यमहात्मनः॥२०॥ उवाचवचनंतंवैसुप्रसन्नंसुयुक्त
मितिस्तुवन॥ इंद्रोवाच॥ त्वयासाधुसमारंभियन्मेकार्यमुपस्थितं॥
२१॥ तत्कर्तुमुद्यतोसित्वंधन्यस्त्वंमकरध्वज। प्रस्तुतंशृणुमद्वाक्यंक
थयामितवानघ॥२२॥ मदीयंचैवयत्कार्यंतत्त्वदीयंनचान्यथा। मित्राणि
ममसंत्येवत्वत्तुल्यंनकदाचन॥२३॥ जयार्थंममदेवानांनिर्मितंवज्रमु
त्तमं। अन्यदस्त्रंनवान्येनेवदेवेननिर्मितःपुरा॥२४॥ वज्रंहिसात्मकं ३१
सिद्धि। नवानसुखकरमतं। द्वयोरपिनवानघश्रेष्ठः सर्वपुत्तम॥२५

ॐ

वज्रंचनिष्फलंस्याद्वैत्वंतुनैवकदापिहि। यतोहित्वंप्रजायेततनःको
नुप्रियःकरः॥२६॥ तस्मान्मित्रवरस्त्वंचकार्यंकर्तुमिहार्हसि। ममदुः
खंसमुत्पन्नमसाध्यंबहुकालजं॥२७॥ केनापिनैवतच्छक्यं। हरीकर्तुं
त्वयाविना। संतुष्टश्चैवपरीक्षावैदुर्भिक्षेज्ञायतेनरः॥२८॥ शूरं[illegible]वतु स्ये४
संग्रामेमित्रस्यचतथापदि। अशक्तौचतथास्त्रीणांविनयेसुकुलस्य
च॥२९॥ स्नेहस्यपरोक्षेणसत्यस्यसंकटेगते। परीक्षातुत्वदीयाद्या
मित्रवर्यनविद्यति॥३०॥ नकेवलंमदीयंचकार्यंदेवसुरावहं। व
यंचयाचितारस्मकार्यंत्वाश्रुतयाश्रुतं॥३१॥ इत्येवंमघवद्वाक्यंश्रु
त्वातुमकरध्वजः। उवाचप्रेमगंभीरंगजदंस्मितसूर्वकं॥३२॥ कामा

शिव० ३२

वाच ॥ किमर्थं मापसे देव नंतरंस्थावयोरिह । उपचारः कृतिमं लोके
दृश्यते कथनेन च ॥ ३३ ॥ कष्टेनैव वचयोर्ब्रूते स किं कार्यं करिष्यति । तथा
पि च महाराज कथयामि शृणुव्रतेत ॥ ३४ ॥ मुक्तिमार्गसमापन्ने ते शत्रु
पातयाम्यहं । नेपदंकर्षितुं यावै तपस्तप्यतिहृद्रुपं ॥ ३५ ॥ क्षणेन पात
याम्यद्य कटाक्षेण स्त्रियस्तथा देवा दानवं वापि ऋषिं वा देवसत्त
मा न ॥ ३६ ॥ मनुष्याणां न वै मेघगणानापातनेमता । वज्रे तिष्ठतु दूरे
वै शास्त्राण्यपन्यान्यनेकशः ॥ ३७ ॥ किं ते कार्यं करिष्यंति मयि मित्रे स्थि
ते सनो ॥ अन्येषां गणनानास्ति पातयामि हरं यदि ॥ ३८ ॥ एवं तु वचनं
तस्य श्रुत्वा हर्षमुपागतः ॥ उवाच प्रणयन्वाचं कामं कांनासुरनायकं ॥ ३२

३९ ॥ इंद्रोवाच ॥ यत्कार्यं मनसो दिष्टं तत्कार्यं कथितं त्वया । शृणु का
मं प्रवक्ष्यामि यदर्थं स्मरणं तव ॥ ४० ॥ तारकाख्यो महादैत्यः । ब्रह्मणो
वरमुत्तमं ॥ संप्राप्य पीडिते लोकान् नष्टाधर्मस्त्वनेकशः ॥ ४१ ॥ दुःखि
ताः देवताः सर्वाः ऋषयश्च तथामलाः । देवानां वासुधान्यत्र विकला
न्यनवन्सनो ॥ ४२ ॥ मरणं नैव तस्यैकं न विद्यति कदाचन । एतस्य मर
णं प्रोक्तं शंभुना वा यदि कुरात्मनः ॥ ४३ ॥ एतत्कार्यं त्वया साध्यं देवानां पर
मं सुखं । ममापि हिततरं लोके कर्तुमर्हसि सांप्रतं ॥ ४४ ॥ शंभुना स्वगि
रिराजे वै तपः परमगास्थितः । तत्समीपे वसेत्वार्यं पार्वती सखि
संयुता ॥ ४५ ॥ तिष्ठति च महाराज पित्राज्ञया मया श्रुतं । यथा तस्यां

कृचित्तस्यशिवस्यपरमात्मनः।४६।नायतेनितरांकाम।तथाकार्यं
त्वयाध्रुवं।इतिकृत्वाकृतीस्यात्त्वंदुःखंचैवगमिष्यति॥४७॥लोकेस्वा
स्थ्यंप्रतापात्रेनविष्यतिनचान्यथा।इत्युक्तःसतुकामोवैप्रफुल्लमुख
पंकजः॥४८॥अब्रवीत्तंतदातत्र।हितमुत्पादयन्प्रभुं।प्रेमणास्निग्धंच
देवेशाकरिष्यामिनसंशयः।४९।इत्युक्त्वावचनंतस्मै।तथेत्योमितित
द्वचः॥गृहीत्वाशिरसाकामःसदारःसवसंतवः॥५०॥यत्रैवहरःसा
क्षात्तत्पतेपरमंतपः।तत्रगत्वामधुश्चादौ॥धर्मंविस्तारयन्स्थितः
५१।वसंतस्यचयेधर्मा।सहसास्तद्वनेगताः॥वनानिचप्रफुल्लानिमा
ल्लाशानोमहद्वने॥५२॥पुष्पाणिसहकारेषु।अशोकवनिकासुच॥

वकुलेषुचपुष्पाणि।भ्रमराकुलितानिच।५३।तिलकेषुतथैतेषुको
किलाकलकूजितं।भ्रमराणांतथाशब्दःस्वनेकोन्नमहामुने।५४।चं
द्रस्यविशदाध्यामनकिरणाहृतिकाइव।मानिनःप्रेषयामासुर्हृदको
लेकामदर्पितान्।५५।मारुतस्यांश्चसुखास्त्रवाताविराहृणांश्रि
याः।वनौकमांतदातत्रमुनीनांदुःसहोह्यभूत्।५६।प्रचेतनानांत
त्रैवकामासक्तिःसचेतसां॥अकालिनीप्रवृत्तिंच।सधोवीक्ष्यहरस्त
दा।५७।आश्चर्यंपरमंगत्वातपःपरमदुःष्करं।तापयामासतत्रैव
हरोदुःखहरःपरः॥५८॥वसंतेप्रस्तुतेतत्र।कामोरतिसमन्वितः
चूतपुष्पंसमाकृष्यस्थितःपार्श्वेतुवामतः॥५९॥रत्यायुक्तंतदा

शिव०
३४

कामं॥ दृष्टा कोवा न मोहितः॥ एतास्मिन्नंतरे देवी पुष्पाणां नरनृपित
६०॥ सखिभ्यां संयुता तत्र यत्रातिष्ठद्धरः स्वयं। जगाम शिवपूजार्थं ना
त्वा पुष्पाण्यनेकशः ६१॥ दृष्ट्वा यां यादृशीं लोके सौंदर्यं विविधं महत्॥
तत्सर्वं चैकतस्तस्यां पार्वत्यां तु मुनिश्चितं ६२॥ आनीतानि च पुष्पाणि
धृतानि च तथा यदा। तत्सौंदर्यं कथं वर्ण्यं मया वर्षशतैरपि ६३॥ यदा
शिवसमीपे तु गता सा पर्वतात्मजा॥ तां दृष्ट्वा कर्षयच्चापं रुच्यर्थं शूल
पाणिनः ६४॥ तत्रापि पतितं हस्तात् पार्श्वे च तस्यैव तदा। महत्सुख
कथं क्षुद्रो। विस्मितं न कदाचनः ६५। यया निरंतरं सावैशागछतत
या तदा॥ तया गत्वोत्पलाक्ष्या वै दृष्टः शंभुः स्वयं यदा॥ ६६॥ नमस्कृत्य ३४

तदा पूजां॥ कृत्वासीत्सुरतः स्थिता। सा दृष्टाश्च तु या तत्र। सुंदरांगं विर
हवति ६७। शिवोपि वर्णयामास तदंगं सुंदरं तदा। किमुखं किशशांक
श्च किं नेत्रं चोत्पलेनते ६८॥ नक्रदौ धनुषी चैते कंदर्पस्य महात्मनः
अधरः किं च विंबं व। किं नासा शुकचंचुका। ६९। किं स्वरः कोकिलावा
पः किं मध्यं किं च वेदिका। किं गतिं वर्ण्यते ह्यस्याः किं रूपं वर्ण्यते मु
हुः ७०। पुष्पाणि वर्ण्यते किं च वस्त्राणि च तथा पुनः॥ जालिसं चैव वस्त्र
श्चायत्तदेकत्र विनिर्मितं॥ ७१॥ इत्येवं वर्णयित्वा तु तपसो विरराम ह
हस्तं वस्त्रां चलेयाव। तावत् हरतो गत॥ ७२॥ वीक्ष्य नावात्तदा तावा॥
लज्जिता सुंदरी स्वयं॥ विरहवती तत्यागनीं॥ पश्यंति च मुहुर्मुहुः। ७३

शिव० एवं चेष्टां तदा दृष्ट्वा ॥ शंभुर्मोहमुपागमत् । यद्यालिंगनमेतस्याः करो
३५ मि किं पुनः सुखं ॥ ७४ ॥ क्षणमात्रं विचार्यैवं । किमहं मोहमागतः । ईश्वरो
ऽहं यदीच्छेहं परांगस्पर्शने तु दा ॥ ७५ ॥ तर्हि कोऽन्यतमः क्षुद्रः किं किं नै
व करिष्यति । एवं विवेकमासाद्य । पर्यंकबंधनं दृढं ॥ ७६ ॥ रचयामास
सर्वात्मा ईश्वरः किं पतेदिह ॥ ॥ इति श्री शिवपुराणे शिवतपश्चर्या
नोनाम द्वितीयोध्यायः ॥ ऋषय ऊचुः ॥ सूत सूत महाभाग किं
जातं च ततः परं । कथय त्वं प्रसादेन कथां पापप्रणाशिनीं ॥ १ ॥ सूतो
वाच ॥ श्रूयतां ऋषयः श्रेष्ठाः यज्ज्ञातं तदनंतरं । धैर्यस्य च्यवनं दृ ३५
ष्ट्वा विचारे तत्परः शिवः ॥ २ ॥ कारणं किंचिदुत्तत्वे नान्यथैर्यं दृनवेदिति

वामभागे स्थितं कामं द
दिशो विलोकयामास परितः शंकरस्तदा ॥ ३ ॥ वामभागे स्थितं कामं द
दर्श बाणकर्षिणं । तं दृष्ट्वा क्रोधसंयुक्तः संजातस्तत्क्षणादपि ॥ ४ ॥ अहो
दुष्टेन कामेन न मुक्तोहं कुमासह । इत्येवं मनसा क्रुद्धः शिवः परमकोप
नः ॥ ५ ॥ तृतीयानस्य नेत्राद्वै निःससाराग्निरुच्छिखः भस्मसात्कृतवा
न्तेन मदनं तावद्देवहि ॥ ६ ॥ यावच्च मरुतो वाचः क्षम्यतां वै प्रभो त्वया ॥
नवति वत न पूर्वं हतो सोमकरध्वजः ॥ ७ ॥ हते तस्मिन्महावीर्ये देवा दुः
खमुपगताः । शिवोपि तत्क्षणादेव विहायाश्रममन्यतः ॥ ८ ॥ वेददि
धीकृतात्मा च गिरिराजसुतां तदा समादाय सखीयुक्तां जगाम मंदि
रं स्वयं ॥ ९ ॥ क्षणमात्रं रतिस्तत्र विसंज्ञा घनवत्तदा । नर्तजन्यंचयद्दुः

शिव॰ रवंनज्ञातंरूपिसत्नमा॥११॥जातायांचैवसंज्ञायांरतिर्दुःखसमन्विता।
३६ विललापतदातत्रवनमामीत्सुदुःखिता॥१२॥~~दैवमंत्रायांरतिर्दुःखसमन्वि~~
~~ता।विललापतदातत्रवनमामीत्सुदुःखिता~~।मयूरानेवनृत्यंतिवृक्षाश्च
त्वनेजडाः।मृगाश्चरमणीयस्तनृत्यंगागुंजारवैपुनः॥१४॥पक्षिणश्च
नदाविप्राःमूकाश्चमुनयोयथा।वायवश्चवनंहित्वावांतिनैवदिशो
दश॥१५॥किंकरोमिक्वगच्छामिकिंकृतंदैवतैरिहस्वामिनंतुममाद्दृय
देहाप्रियाद्वियेतिच॥१६॥हस्तौपादौनयास्फाल्यकेशानुन्मोट्यनदाव
स्रणामदृग्योयोगेनसोत्रंममकर्मणा॥१७॥सुखदातानकोप्यस्तिदुः ३६
खदातानकश्चन।सर्वेपिस्वकृतंतुलोकैर्वाःभोच्याःमयाद्या॥१८॥

तद्विलापंतदाश्रुत्वादेवाश्चसमुपायसुःस्तुत्वादेवंप्रपद्येवचननेनैव
मक्रवत॥१७॥देवा उवाच॥भगवन्श्रूयतामेतत्वचनंचशुभंप्रभो।का
मेनैवंकृतंयच्चनस्वार्थेलोकशंकरः॥१८॥दुष्टेनपीडितैर्देवैः॥कारितंनदि
नान्यथा॥रतिस्त्वेकाकिनीदेवविलापंदुःखितासती॥१९॥करोतिशोक
रत्नंचप्रभन्नोनवसर्वथासंहारंकर्तुकामोसिदैवतैःसहसंहर॥२०॥दुःखं
तस्मात्तदाहन्नानायाप्रायाश्चदैवता॥तस्मात्त्वयाविकर्तव्यं।रत्याशोका
पनोदनं॥२१॥नमस्कृत्यतदादेवाःस्तुतिंकृत्वाविधानतः।प्रसन्नंकृत
वंतस्तेशिवंलोकसुखावहं॥२२॥प्रसन्नोभगवांस्तत्रवचनंचेदमब्र
वीत्।शिव उ०।देवाश्चऋषयःसर्वेयज्ज्ञातंतेनान्यथाभवेत्॥२३॥अनंग

शिव० ३७

स्नाव देवस्याघाव च्च रुक्मिणी पतिः। द्वारकायांस्वयं स्थित्वा पुत्रानु
त्पादयिष्यति॥२४॥ तदा कृष्णस्तु रुक्मिण्यां काममुत्पादयिष्यति। प्रद्यु
म्ननामतस्यैव भविष्यति न संशयः॥२५॥ जातमात्रं तु तं देवं शंबरः
संहरिष्यति॥ हृत्वा प्राप्य समुद्रे वै नगरे स्वं गमिष्यति॥२६॥ तावत्त्वं न
गरे तस्य रत्वा स्थेयं यथा सुखं। तत्र कामं मिलित्वा तु हत्वा शंबरमा
हवे॥२७॥ तदीयं चैव तद्द्रव्यं नीत्वा स्वं नगरं पुनः गमिष्यति स्वयं सार्व
देवाः स सैव चो मम॥२८॥ इत्युक्तानूं दधरु देवानांस्तु तां नदा॥ दे
वास्तां च समाश्वास्य रुद्रस्य वचनाऽऽदिति॥२९॥ उक्ता वच स्तदीयं च वस्त्व ३७
सं तु वनमाययुः। कामपत्नी यथादिष्टं नगरे सा गता तदा॥३०॥

अतीक्षतीव तं कालं रुद्रादिष्टं मुनीश्वराः। देवाश्च दुःखिनाः सर्वे हाहा कि
च भविष्यति॥३१॥ तारकस्य कथं नाशो भविष्यति परस्परं। पितुर्गृहं तदाग
त्वा मिलित्वा मातरं मुदा॥३२॥ पुनर्ज्वलितं तदात्मानं मेने श्रापर्वतात्मजा
ति निंद्य च स्वकं रूपं हा हतास्मि तमब्रवीत्॥३३॥ स्वपंतिवचपिवीतै च
ह्यनति गच्छती तदाति ह्रतीव सखीमध्ये धिक् रूपं च मदीयकं॥३४॥
इति सा दुःखिता तत्र स्मरंति हर चेष्टितं सुखं न लेभे किंचि दै शिवाश्री
वेति वाब्रवीत्॥३५॥ एतस्मिन्समये तत्र नारदो [illegible] गमत्तदा॥ हनि स्था
नः सुखमासीनः हृष्टः प्राप्तो शिवस्य च॥३६॥ उक्तवान् वचनं ह्येतत्व
तपः साध्यो हरस्त्वयं नान्यथा जननते देवी देवैर्ब्रह्मादिकैरपि॥३७॥

शिव० ३९ इत्येवं वचनं तस्य नारदो भगवानृषिः॥ जगाम स हरेर्नाम गृणन्नाराय
णेति च॥ ३८॥ ॥ इति श्रीशिवपुराणे पार्वतीपरिसांत्वनं नामैकादशोध्या
यः॥ ब्रह्मोवाच॥ ॥ पार्वती च तदा श्रुत्वा वचनं नारदस्य च तपः साध्यं हरं
मेने तपोर्थमनु आरेभे॥ १॥ मातरं पितरं चैव सखीभ्यां पर्यपृच्छत॥ स
ख्यो तूवाच॥ हिमवञ्छ्रूयतां पत्न्याः वचनं कथ्यतेधुना॥ साफल्यं चैव देह
स्य रूपस्य च तथा पुनः। नवतस्य कुलस्यास्य साफल्यं कर्तुमिच्छति॥ २
तपसाराधनं योसौ नान्यथा वस्य तां व्रजेत॥ तस्माच्च पर्वतश्रेष्ठ देया तप
ज्ञानवताधुना॥ ४॥ इत्येवं च तदा पृष्ट गिरिराजेन्नब्रवीदिदं॥ हिमा उवा ३९
च॥ मत्स्यं वरोचते सख्यो मेनायै रुच्यतां पुनः॥ ५॥ यद्येवं च वितर्कं च

४० किमतः परमुत्तमं॥ साफल्यं च महाद्यस्य गृहस्य च न संशयः॥ ६॥ मात्रे च
रुच्यतां वे ततः श्रुत्वा नंतरं तु किं इत्येवं वचनं पित्रा पृष्टं श्रुत्वानुवदत दा
७॥ जगमतु मतिं सख्यो तदा राते मुनीश्वराः। गत्वा च मातरं तस्याः वच
नं प्रोचतुस्तदा॥ ८॥ तत्त्ववचनं पुत्र्याः श्रुत्वा कर्तुमिदं हितिः॥ तनु
कामास्ति ते पुत्री शिवार्थं परमं तपः॥ ९॥ सा मातानुज्ञा पितुश्चैव तु त्वं च प
रिपृच्छति॥ इयं च रूपं साफल्यं कर्तुकामा पतिव्रते॥ १०॥ त्वदाज्ञाय हिमा
ये तं तयाधुना समाकर्ण्य वचस्त्वेतन्न मेनादुःखमुपागता॥ ११॥ समा
हूय तदा पुत्रीं उवाच विकलासती दुःखितासि कथं पुत्री तपस्त्वं पु
रासदि॥ १२॥ प्राप्तं जन्म हे ह्यत्र किं न्यूनं तेन च वेदिदं॥ कुत्र यासि तप
× तप्यते च॥ ३ ग्र

स्कन्तुं देवाः संतिगृहेमम ॥ १३ ॥ तीर्थानिच विचित्राणि वसंतिने पितुर्गृहे
॥ त्वयात्रैव तपः कार्यं सिद्धिस्याद्वन पायिनी ॥ १४ ॥ साधितं किं त्वयागत्वा
पुनः किं साधयिष्यसि ॥ शरीरं कोमलं वत्से तपस्तु कठिनं महत् ॥ १५ ॥
एतस्माच्च त्वया कार्यं स्थित्वैतत्सुलभं नवैतत् । इत्येवं बहुधा पुत्री मात्रा
पित्रा निवारिता सती ॥ १६ ॥ सुखं नैवात्र संपेदे ह्युमाराध्य शिवं तदा ॥ दुःखं ज्ञा
त्वा नदीयं सा मात्राज्ञप्ता जगाम सा ॥ १७ ॥ मातरं पितरं चैव प्रणिपत्य पुन
स्तदा । सखिभ्यां संयुता तत्र तपस्तप्तुमुपाययौ ॥ १८ ॥ हित्वा नरणान्यने
कानि वस्त्राणि विविधानि च । वल्कलं च तदा धृत्वा मौंजीं बध्वा सुशो
भन ॥ १९ ॥ हित्वाहारं तदा चर्म मृगस्य परमं शुभं । जगाम तपसे तत्र गं

गस्पातीर्थमुत्तमं । २० । गौरीशिखरनामासीत्तत्तपसो कारणादिह । सु
दराश्च द्रुमास्तत्र पवित्राफललाजिन ॥ २१ ॥ भूमिशुद्धिं ततः कृत्वा विधा
यवेदिकां शुभां तया तपः समारब्धं मुनीनामपिदुष्करं ॥ २२ ॥ चांचल्यं व
तदास्याप्य शरीरस्य विशेषतः । उपमास्थानके ह्यत्र चकार परमं तपः
स्रा २३ ॥ ह्रीं [illegible] नां च तया प्रिनामध्येस्थित्वा तु घर्मके ॥ वर्षासु स्थंडिले स्थि
त्वा शीतेजलसमीपगा ॥ २४ ॥ एवं तपः प्रकुर्वाणा वृक्षान्नारोपयत्तद
तिं विप्रिप्रसहं तत्र ह्यातिथ्यं वाप्यकल्पयत् ॥ २५ ॥ वातश्चैव तथा शी
तं वृष्टिश्च विविधा तदा ॥ दुःखं च विविधं तत्र गणितं न तया तदा ॥ २६
तथा तपस्तया नं संमुनि निश्च सुदुःकरं श्रुता च कुमपयस्तत्र विस्मि

यं परमं गताः ॥२७॥ दृशीनार्यः समाजग्मुः कीदृक्तत्तपसोऽनया महत्तां
धर्मवर्द्धिषु गमनं श्रेयउच्यते ॥२८॥ प्रमाणं वयसो नास्ति मान्यो धर्मः स
दा बुधैः ॥ श्रुत्वा दृष्ट्वा तपस्तस्याः किमन्यैः क्रियते तपः ॥२९॥ जल्पंतस्ते
सदा तत्र कटिनांगाश्च ये पुनः । तदाश्रमगता ये च विरोधरहितास्त
दा ॥३०॥ सिंहा गावस्तथान्ये च रागादिदोषसंयुताः ॥ तन्माहिम्ना च ते त
च्चनाबाधं तु परस्परं ॥३१॥ वृक्षाश्च सफलास्तत्र तृणानि विविधानि च
पुष्पाणि च विचित्राणि तत्रासन् ऋषिसत्तमा ॥३२॥ तद्वनं च तदा सर्वं
कैलाशेन समन्वितं ॥ जातं च तपसस्तस्याः सिद्धिरूपमनूनतदा ॥३३॥
॥ ॥ इति श्रीशिवपुराणे तपोवर्णनो नाम षादशोऽध्यायः ॥ ॥ एतस्मि

न्समये देवा ऋषयो नारदादयः । पार्वत्यास्तत्तपो दृष्ट्वा तेजसा व्यापिता
स्तदा ॥१॥ जग्मुस्ते च तदा तत्र यत्रास्ते वृषभध्वजः ॥ तत्र गत्वा च ते देवा ना
रदेश्च स्वयंस्तदा ॥२॥ नारदोपि तदा गत्वा देवानां पुरतस्तदा प्रणम्य
शंकरं देवं स्तुतिं चक्रुः परस्परं ॥३॥ ऋषयोवाच ॥ ॥ शंभूस्त्वं शंकरोसि
त्वं दयालुस्त्वं विशेषतः । पारवस्यास्तपसा तप्तं दारुणं लोकशोषणं ॥
४॥ कुरु कार्यं तथा शीघ्रं शिव त्वं परिपालकः । इत्युक्त्वा च तदा देवा
न् विसृज्य शंकरस्तदा ॥५॥ जटिलं रूपमास्थाय जगाम पार्वतीवनं ॥
अंगे पुलोमशं चैव वै दंड चर्मसमन्वितं ॥६॥ दृष्ट्वा चैव विस्मितं देवी पूजां
चैव तदाकरोत ॥ फलपुष्पादिभिस्तत्र पूजितं परया मुदा ॥७॥ पार्व

शिव०
४१

तीकृशालंतंच पप्रच्छत्वंकुतोगतः। इतिपृष्टेतयातत्र सुक्तास्वीयंव
तांपुनः॥८॥ दृष्टवान्कपटेनैवगोपयन्रूपमुत्तमं॥ अपिदेवीजले
ह्येतत्फलादिवनिरंतरं॥९॥ अन्वच्छिन्नमेवद्यत्रयथाशक्तितपस्यसि
नवेवयसितेदेविकृतंवैतपमुत्तमं॥१०॥ अतःकिंचित्प्रष्टेयंकथनी
यंत्वयाधुना॥ मुनाविविस्त्वयादेवीकृतावैसर्वयात्मना॥११॥ तस्मा
न्मैत्रीचसंजातारहस्यंगोप्यंत्वयानहि किंवांछसिवरंदेवीदृष्टुमि
च्छाम्यतःपरं॥१२॥ त्वयेवतपसोदेवीफलंसर्वप्रदृश्यते। वरार्थंचेत
पश्चेदेतिदृष्टुतपएवतत्॥१३॥ रत्नंतुगृहहतारंवैनपृच्छासिग्रहिष्य
सिदृष्टंचैवसौंदर्यंसर्वंव्यर्थीकृतंत्वया॥१४॥ हित्वानर्णान्यनेका ४१

निवमादिवधनंत्वयात्तत्सर्वंकारणंब्रूहिदृष्ट्वाहर्षमुपागमे॥१५॥ इतिपृ
ष्टातदातेनसखींप्रेरयतितदा॥ तन्मुखेनैवतत्सर्वंकथयामासमुं व
ता॥१६॥ ॥ इति श्री शिवपुराणे पार्वतीतपवर्णनोनामत्रयोदशोध्या
यः॥१३॥ ॥ सूतोवाच॥ श्रूयतांऋषयःश्रेष्ठाःकथांपापप्रणाशिनी॥ य
ज्जातंचततःपश्चात्पार्वतीशिवयोस्तदा॥१॥ तयाचप्रेरितातत्रसखि
जटिलमाहतत्॥ सख्योवाच॥ शृणुसाधोप्रवक्ष्यामियदित्वंश्रोतु
मिच्छसि॥२॥ यदर्थमेतयासख्याह्यारब्धंतपउत्तमं हित्वेद्रमुखा
न्देवानैश्वर्यसंयुतानपि॥३॥ पतिंपिनाकपाणिंवैप्राप्तुमिच्छति
सांप्रतं॥ इयंसखीमदीयावैवृक्षानारोपयंत्सुरा॥४॥ तेषुवृक्षेषुसंजातं

शि॰दं॰ फलं(प)रूपपुरःसरो मनोरथांकुरस्तस्याः प[...]त्स्यामि न कर्हिचित ॥५॥
४२ रूपहार्यं शिवं देवं मदनस्यानुहारिणं ॥ तस्माद्विनारदादेशात्ततपस्तस्य
तिदारुणं ॥६॥ यत्नेष्टं मया ख्यातं सखाश्च समनीक्षितं ॥ इत्येवं वचनं
श्रुत्वा जटिलो वाक्यमब्रवीत ॥७॥ जटिलोवाच ॥ सख्येदं कथितं सत्यं
परिहास उत्ता पिवा ॥ यथार्थेन कथं देवी मुखेन परिनापसे ॥८॥ इत्युक्ते
च तदा तेन श्रूयमाने सखीतदा ॥ उवाच पार्वती देवी नत्तथैव न चान्यथा
॥९॥ मनसा वचसा साक्षात् कृतो वेशं करो मया ॥ जानामि दुर्लभं वस्तु कथं
प्राप्यं मया न वेत ॥१०॥ तथापि मनसोत्सुकात् तन्प्यते च मयाधुना ॥ इ ४२
त्युक्तावचनं तस्मै स्थितासा गिरिजा तदा ॥११॥ उवाच ब्राह्मणात्स्तनम

पावगम्यते धुना ॥ एतावत्कालपर्यंतं ममेच्छा महती घृतूत ॥१२॥ किं
वस्तुकाम्यति देवीह ह्याद्यामि स्तुवन्प्रते ॥ अवगंतेतु मया सम्यकत्व
त्मुखात सुंदरी श्रुतं ॥१३॥ इतोगच्छाम्यहं देवी यथेच्छसि तया कुरु ॥ न
कथ्यते मया तुभ्यं मित्रत्वं निःफलं नवेत ॥१४॥ यथा कार्यं यथा नावि
कथनीयं कुते न च इत्युक्ता वचनं तस्मै यावत्[...]तुमीपसा ॥१५॥ ता
वद्धपार्वती देवी सुवाच किं गमिष्यसि ॥ इत्युक्ते च तया तत्र स्थितो वा
च सदं द्वधक ॥१६॥ टेड्धकूउवाच ॥ शृणु देवी प्रवक्ष्यामि मित्रत्वाद्
[...]तेमया ॥ इतश्च प्रथमं त्वं मे मान्या पूज्या सदा शुना ॥१७॥ इदानीं
तद्विपरीतं हि जातं मे नात्र संशयः ॥ इति कृतं त्वाद्येव तद्वैवंरूप

शिव॰ ४३ तामिति ॥१८॥ दत्वा सुवर्णमुद्रां च काचां ग्रहितुमिछसि । हित्वातु चंदनं
सुक्लं कर्दमं लेप्तुमीहसे ॥१९॥ नागं च वाहनं त्यक्त्वा बलिवर्द्दं च मिछसि
गांगं जलं परित्यज्य कूपोदकं समीहसे ॥२०॥ सूर्यतेजः परित्यज्य खद्यो
तं धर्तुमिछसि । चीनांशुकं विहायैव चर्मांबरमुपास्यते ॥२१॥ गृहेवा
सं च त्वं देवीत्यक्त्वा वनसमीहया करोति त्वं च देवेशेन युक्तं कर्तुमुद्य
तौ ॥२२॥ तथा त्वं सर्वदेवानां हित्वा च सन्निधं पुनः । इछसि त्वं सुराणां च
न युक्तं क्रीयते त्वया ॥२३॥ इन्द्रादिदिक्पालानां हित्वा शिवमनुव्रता नै
तद्युक्तं हि लोकेषु विरुद्धं दृश्यते धुना ॥२४॥ क्व त्वं कमलपत्राक्षि क्व ४३
चासौ वत्रिलोचनः । शशांकवदना त्वं च पंचवक्त्रः शिवः स्मृतः ॥२५॥

क्व वर्णश्चैव ते रूपं वर्णितं नैव शक्यते । जटाजूट शिवस्यैव प्रसिद्धः
परिचक्ष्यते ॥२६॥ वंदनं चलदीयांगे चिताभस्म शिवस्य च । क्व दुकूलं त्व
दीयं चैव गजाजिनमथांशुकं । क्वांगदानि च दिव्यानि क्व सर्पाश्चांकर
स्य च । क्व च रादेवताः सर्वे क्व च भूतावलिप्रिये ॥२८॥ क्व च मृदंगनादं च
क्वापि डमरुस्तथा । क्व च भेरिप्रलापश्च क्व च शृंगीरवः श्रुतः ॥२९॥
क्वचाढक्कमयः शब्दो गस्वनादः क्व चापि हि । न च साम्यं शिवस्यैव न मु दि
कं रूपमुत्तमं ॥३०॥ वपुश्चैव विरूपाक्षं जन्म नाज्ञायते कदा । यं धनं
नवेत्तस्य कथं दिगंबरो भवेत् ॥३१॥ वरेशुयेगुणाः प्रोक्ता एकोपि च शि
वे स्मृतः ॥ वाहनं बलिवरदश्च नसंतु नृपणां स्मृतं ॥३२॥ यद्दियाहि

शिव०
४४

मवेक्षो वै कथं च मदनं दहेत ॥ सहायास्तु विशाखाद्या विषकंठे गवि
राजते ॥ ३३ ॥ अनादरस्तदा दृष्टं हित्वा वनमुपागतः ॥ नातिर्नद्रूपतेत
स्य विद्याज्ञानं न लभ्यते ॥ ३४ ॥ एकाकी च सदा निसं विरागी च विशेष
तः ॥ तस्मात्वं तु शिवेनैव मनोयोक्तुं न चार्हसि ॥ ३५ ॥ क्व च हारस्तदीयो
वैक्क च वै मुंडमालिका ॥ सर्वविरोधरूपं च तवैव च शिवस्य च ॥ ३६ ॥ मद्यं
न रोचते दिवि यदीच्छसि ॥ तथा कुरु ॥ मम या विदितो देवः श्मशाने वा
समीहते ॥ ३७ ॥ असद्वस्तु च यत्किंचित्तत्सर्वं सेवते स्वयं ॥ निवर्तेयम
नस्तस्मात्त्वं नाचेच्छेः समीपतः ॥ ३८ ॥ इत्येतद्वचनं श्रुत्वा पार्वती क्रोध ४४
संयुता ॥ उवाच क्रुध्यमाना सा शिवनिंदापरं वचः ॥ ३९ ॥ पार्वत्युवाच ॥

एतावद्धि मया ज्ञातं कश्चिदन्यो नविप्यासि ॥ परंतु सकलं ज्ञातमवधे
हृद्रूपमधुना ॥ ४० ॥ श्रूयतां वचनं ह्येतत्कथयामि क्रमेण च ॥ त्वयोक्तं
विदितो देवस्त्वलीकं न चान्यथा ॥ ४१ ॥ यदि च विदितः स्यात्तैर्विरक्तं नो
च्यते त्वया ॥ कश्चित्तु वः प्रच्छन्नवेषधारी न संशयः ॥ ४२ ॥ ब्रह्मचारी
स्वरूपेण कश्चिद्धूर्तः समागतः ॥ शंकरस्य स्वरूपं तु प्रवक्ष्यामि शृणु
घतत ॥ ४३ ॥ वस्तुतो निर्गुणः साक्षात्सगुणो कारणेन च ॥ कुतो जाति
र्भवेत्तस्य निर्गुणस्य गुणात्मनः ॥ ४४ ॥ सर्वासामपि विद्यानामधिष्ठा
नं सदा शिवः ॥ उक्त्वा सरूपिणो वेदाः दत्तास्तु विष्णवे पुरा ॥ ४५ ॥ किं
तस्य विद्यया कार्यं पूर्णस्य परमात्मनः ॥ सर्वेषां चादिभूतस्य वयोमा

नेकृतः स्मृतं ॥४६॥ प्रकृतिस्तु ततो जाता किं शक्तेस्तस्य कारणं ॥ यो
वै भजति नित्यं तं तस्य शक्तित्रयं सदा ॥४७॥ यस्यैव भजनाद्यो को मृत्युं
जयति निश्चितं ॥ तस्मान्मृत्युंजयं नाम प्रसिद्धं जगतीतले ॥४८॥ यस्य
पूजाप्रभावेन आरोग्यं जायते नृणां ॥ तस्यारोग्यं कुतो पीह न विष्णु
ति सुदुर्मते ॥४९॥ यस्यैव पक्षपातेन देवा देवत्वमागताः ॥ दृष्टौ नार्थौ शि
वस्य हृयदा गच्छति देवराट् ॥५०॥ तदान्नृतपिसाज्ञात्राश्च द्वारपालाः
शिवस्य च ॥ दंडैश्च मुकुटे विद्धं खंडखंडं व्रजेद्भुवि ॥५१॥ किं तस्य वक
पक्षेण स्वयमेव प्रभुः सदा ॥ कल्याणरूपिणस्तस्य सेवया किं न वे
दिह ॥५२॥ किं नूनं देवदेवस्य मामिच्छति सदा शिवः ॥ सप्तजन्मद

रिद्रास्य सेवते यदि शंकरं ॥५३॥ तस्यैव दुर्लभा लोके लक्ष्मिः स्याद्दन
पायिनी ॥ यद्दृश्ये सिद्धयो ह्यष्टौ वन्नसंति प्रतिवासरं ॥५४॥ अर्वाङ्मुखः
सदा तन्न कुतो विघ्नं सुदुर्लभं ॥ यद्यप्यमंगला नीह सेवते शंकरः स
दा ॥५५॥ तथापि मंगलं तस्य स्मरणादेव जायते ॥ शिवेति मंगलं नाम
मुखे यस्य निरंतरं ॥५६॥ तस्यैव स्पर्शनादन्ये पवित्राः संति निस्वशः
यद्यप्युतं न वेदस्य चितायाश्च तपोदितं ॥५७॥ मृत्युस्यापगमे देवैः शि
रो निधार्यते कथं ॥ यस्यैव जगतश्चादि जगतश्चेश्वरो मतः ॥५८॥ ज
गत्संहारकर्त्ता च सज्ञेयो वै कथं भवेत् ॥ अगम्यं ब्रह्मणो रूपं शिवस्य
परमात्मनः ॥५९॥ कथं च तं विजानंति तादृशाय बहिर्मुखाः ॥ दुराचा

शिव· ४६ राश्चपापाश्चवेदेत्यस्तेविनिर्गताः॥६०॥ तत्वंतेचैवजानंतिशिवस्यागुण
रूपिणः॥ शिवनिंदांकरोतीह ततमज्ञाययः पुमान॥६१॥ आजन्मसंचि
तंपुण्यंतस्यनश्यतीनैविद्यति॥ त्वयानिंदाकृतात्यत्रहरस्यामिततेजसः
६२॥ तत्सृजाचकृतायस्मात्तस्मात्तापंनजाम्यहे॥ शिवविद्विषिणंदृ
ष्ट्वासचैलंस्नानमाचरेत॥६३॥ रेरेदुष्टत्वयाप्रोक्तंजानामिचमहेश्वरं
निश्चयेनैवनज्ञातः शिवएवसनातनः॥६४ यथातथात्वंवेत्सोवैम
मात्रीष्टतमोमतः॥ पुनर्वचनमाधातुमक्षमेतावदेवहि॥६५॥ त्वा
चगिरिजादेवीसखीदुष्टमनाः खसौ॥ वारणीयः प्रयत्नेनशिवनिं ४६
दांकरिष्यति॥६६॥ नकेवलंनजेत्यायंनिंदाकर्ताशिवस्यच॥ योवेश्न

णोतितांनिंदांपापमनाकुसनवेदिस॥६७॥ अयंदुष्टःपुनर्निंदांकरिष्य
तिशिवस्य॥ स्थलमेतत्तथाहित्वायास्यामोन्यत्रमाचिरं॥६८॥ इत्युक्त्वा
चलनायासोपक्रमुक्रिष्यतेयदा॥ तदासौचशिवःसाक्षात्आललं
वेप्रियांस्वयं॥६९॥ कृत्वासौयंस्वरूपंचयथाध्यातंतथातया॥ दर्शि
यित्वापुनस्तांचस्तुवाचावाक्तुरंबीशिवां॥ कुत्रयास्यसिमांहित्वानलं
त्वाज्यामयापुनः॥ प्रसन्नोस्मिवरंब्रूहिनादेयंविद्यतेतव॥ अद्यप्रभृ
तिनेदासस्तपोभिः प्रेमनिर्भरैः॥ क्रीतोस्मितवसौंदर्यात्क्षणमेकं
युगायते॥७०॥ त्यज्यतावत्त्वयालज्जाएहियामोगृहंमम॥ इत्युक्तोदेव
देवेनजहौदुःखंपुरातनं॥ तपसश्चैवयज्जातंमहादुःखंगतंतदा॥

शिव०
४७

फलेजातेश्रमःपूर्वंजातोनात्राप्नुयात ॥ ७८ ॥ इतिश्रीशिवपुरा-
णेपार्वतीवरप्रदानानामचतुर्दशोध्यायः ॥ ॥ ऋषयऊचुः ॥ व्यासशिष्यो
महामहानागनतोजातेचयत्सुनः ॥ तत्सर्वंकथयत्वंहिकथांलोकमंगला
पहां ॥ १ ॥ सूतोवाच ॥ ॥ मुनयःश्रूयतांसम्यक्कथयामिकथांमुदापा
र्वतीवचनंश्रुत्वाहरस्यपरमात्मनः ॥ २ ॥ उवाचप्रीतितादेवीवचःस्मृता
पुरातनं ॥ सखीमुखेनमातत्रशिवंसामान्यवस्थिते ॥ ३ ॥ एहियामोगृ
हेदेवकथंचैवंविलंबसे ॥ एवंब्रुवतिदेवेपार्वतीवचनात्सखी ॥ ४ ॥ स-
ख्युवाच ॥ यदिप्रसन्नोदेवेशकरोषिकरुणांयदि ॥ तदेवंचत्वयाकार्यंकृ
पांकृत्वाममोपरि ॥ ५ ॥ पितुर्गेहेमयासम्यक्गम्यतेतत्रतुत्वया ॥ यति ४७

देःक्रीयतेयत्रविवाहःपरमःशुभः ॥ ६ ॥ तथाचैवत्वयाकार्यंलोकेपुरखा
पयन्प्रयत्नः पितुर्मेसफलंसर्वंकुरुष्वैवगृहाश्रमं ॥ ७ ॥ विवाहस्ययथा
रीतिःकर्तव्यंतत्तथाध्रुवं ॥ जानामिहिमवान्सम्यक्कृतंपुत्र्याःश्रुतंम
म ॥ ८ ॥ इत्येवंवचनंश्रुत्वाशिवोपिचशिवांतदा ॥ उवाचवचनंतंचयदी
त्वमितयेतितत्त ॥ ९ ॥ इत्युक्त्वांतर्दधेशंभुर्गतायांशिवाविचारयत ॥ सस्मा
रत्वरूपेणसमविरहाविष्टमानसः ॥ १० ॥ पार्वत्यपिसखीयुक्तारूपं
कृत्वातुसार्थकं ॥ जगामचस्वकंधामपितुर्विरहकातरा ॥ ११ ॥ पिता
चैवतयामातासरम्यश्चैवाप्यतेकराः ॥ संबोधिनस्तयाश्चान्येसन्मुखा
संययुस्तदा ॥ १२ ॥ जयेतिचब्रुवंतस्तेदृष्टालिंगनमादधुः ॥ साधितेतु

शिवपु
५८

त्वयासम्यक्कृतावितास्मवयंत्वया॥१३॥ वेदतैःपूज्यवर्यैश्चपूजयित्वा
शिवांतदागृहंप्रवेशयामासवहुमानपुरःसरं॥१४॥ आश्रमंसफलं
मेनेकृपुत्रात्पुत्रिकावराहिमवान्।नारदंतत्रप्रस्तुवन्साधुसाध्वि
ति॥१५॥ ऋषयश्चैवतेसर्वेऽनुनाचास्मतायदांजग्मुःस्वयंसर्वक न८१४
ल्पवृक्षाऽद्रवापरः॥१६॥ परंब्रह्मगुणंतस्येहमवकलधारिणः॥मुक्ता
फलैर्विचित्रैश्चभूषिताःनृपणेःपरैः॥१७॥ अहंधन्यातयायुक्तासाक्षा
त्शिवप्रियापरार्थादृष्टासर्वसंकाशानजहौलक्ष्मीहरःस्वयं॥१८॥ स्थि
ताग्रेऋषयःश्रेष्ठाःनमस्कृत्यशिवंतदा।मेनिरेचतदात्मानंकृतार्थं ५८
तेतपस्विनः॥१९॥ सतंवास्वप्रभाभावानेत्रास्यांदृश्यतेतया।वयं

कार्यदर्शनंचाद्यशिवस्यदुर्लभंजनैः॥२०॥ इतिविस्मयमापन्नाःनमस्कृ
त्यस्थितापुरः॥प्रोचुःप्रांजलयस्तेवैशिवंलोकमलापहं॥२१॥ ऋषयऊ
चुः॥नमस्तुभ्यंभगवतेशिवायामिततेजसे॥कपर्दिनेनमस्तुभ्यंपं
चवक्त्रायतेनमः॥२२॥ हिरण्यबाहवेतुभ्यंशितिकंठायतेनमः।व्या
पकायनमस्तुभ्यंव्याप्यरूपायतेनमः॥२३॥ परायपररूपायसर्वेच्
छायतेनमः।शिवायशिवरूपायप्रणवायनमोस्तुते॥२४॥ इत्येवंच
स्तुवंतस्तेपुनस्तुःपरात्मनेसर्वोत्कृष्टमहाराजत्वाग्र्यंकिंवर्ण्यतेस्मा
नि॥२५॥ [illegible] :तपस्तत्रविधापूर्वंवेदाध्ययनमुत्तमं
अग्नयश्चहुताःपूर्वंयज्ञाश्चविविधाःकृताः॥ तपांसिचविचित्राणि

पर्वाण्यपि विशेषतः ॥ दानानि च तथा दृष्टं तीर्थानि विविधानि ॥ २८ ॥ वा
ञ्छनः कायजं किंचित्पुण्यं वा स्मरणात्मजं नवंतं सर्वं संगतं चाघस्मरणा
नुग्रहस्तव ॥ २९ ॥ यो वै न जानाति नित्यं त्वां कृतकृत्यो न वै न्नरः । किंनाग्यं व
र्ण्यते तेषां येषां च स्मरणं त्वया सर्वकृष्टा त्वया जाता स्मरणान्नेस
दाशिवमनोरथपर्यं नैव गच्छति त्वं वयं कृतः ॥ ३० ॥ वामनस्य फलं य
क्षु दज्ञन्माधस्य च [illegible] तावाचालत्वं च मूकस्य दरिद्रे निधिदर्शनं ॥ ३१
पंगोर्गिरिपरारूर्ति विंध्यस्य पुत्रका त्वया दर्शनेन वतो ह्येव जाते
तद्दुर्लभं प्रनो ॥ ३२ ॥ अद्य धन्यतिलोके पुमान्या पूज्या मुनीश्वराः ॥ ४९
जाता स्तेतु महादेव उच्चैः पदमुपाश्रिता ॥ ३३ ॥ अत्र किंव ऊनो केन

मान्यपात्रं वयं गताः ॥ रुणानां किं च कर्तव्यमस्ति चेत्त परमात्मपा
३४ ॥ सदृशं सेवकानां तु देयं कामं मुनं त्वया इत्येवं वचनं तेषां श्रुत्वा
वाक्यमुपाददे ॥ ३५ ॥ शिवोवाच ॥ ॥ दृषयश्च सदा पूज्याः कारणात्म
रणं कृतं मम वस्या न वद्दिश्च जायते स्युपकारका देवानां दुःखमुत्प
न्नं तारकासुरदुरात्मनः ॥ ब्रह्मणा च वरो दत्तः किं करोमि दुरासदः ॥ ३६
मूर्त्त्यो ह्येव च याचे कामदीयाः परमर्षयः ताः सर्वा उपकारार्थं नतु
स्वार्थ इति स्फुटं ॥ ३७ ॥ तथा च कर्तुं कामो हं विवाहं शिवया सह तथापि
च तपस्तप्तं मुदुष्करं परमर्षिभिः ॥ ३८ ॥ तस्याः फलं वरं देयमानिष्टं तदि
नावहं तस्मात न वर्ततो गच्छेतु हिमाचलगृहं ध्रुवं ॥ ४० ॥ तत्र गत्वा गि

रितं वै तस्य तं तु पुनस्तया कथनीयं प्रयत्नेन यया स्यात्तत्कार्यमुत्तमं
४१ ॥ उद्वाहं कर्तुमिच्छामि तस्याः सह सत्तमाः हिमाचलगृहे पुत्री
पार्वती च गुणान्विता ॥ ४२ ॥ अस्मदर्थे च तां तत्र प्रार्थनीयो हिमालयः
तं तथा च पञ्चवक्त्रं देवानां च हितं यथा ॥ ४३ ॥ नवद्भिः कल्पितो यो वै
विधिः स्यादविकल्पकः ॥ नवतां नेव कथ्येत नवंतः कार्यनाशिनः ॥ ४४
इत्येवं वचनं श्रुत्वा मुनयस्ते मलाशयाः ॥ आनंदं लेभिरे सर्वे प्रभुणानु
ग्रहीताः ॥ ४५ ॥ वयं धन्या महांतश्च कृतकृत्यास्तथा पुनः ॥ ब्रह्मणापि
शंभुना यो वै बंधः सर्वार्थसाधकः ॥ ४६ ॥ सोस्माभिरयमेषः कार्यो लो
कसुखावहे अयं वै जगतः ॥ स्वामी सोमापि जननी मता ॥ ४७ ॥ अयं

पुत्रश्च संबंधो वर्धतां च दिवस्पदा ॥ इत्युक्त्वा ऋषयो दिव्या नमस्कृत्य
शिवं तदा ॥ ४८ ॥ गता आकाशमार्गेण यत्र स्याद्धिमवत्पुरं चिंतयंतश्च ते
वै· व किं पुण्यं वै न विद्यति ॥ ४९ ॥ यस्मादेवं विधे कार्ये शिवेनाविनियो
जिताः ॥ दृष्ट्वा च तत्पुरं दिव्यं ऋषयस्ते तिविस्मिताः ॥ ५० ॥ ऊचुः परस्परं
सर्वे किमेतदिति सत्कुरं ॥ अलकायाश्चैव स्वर्गाच्च नोगवत्याः तथा
पुनः ॥ ५१ ॥ अमरावत्याः विशेषोत्र दृश्यते ऋषिसत्तमाः ॥ किं गृहाणि सु
रम्याणि स्फाटिकैर्विविधैरिह ॥ ५२ ॥ मणिभिर्विविचित्राणि रचितां
न्यंगणानि च ॥ सूर्यकांताश्च मणयश्चंद्रकांतास्तथैव च ॥ ५३ ॥ गृहे गृ
हे विचित्राश्च वृक्षाः स्वर्गसमुद्भवाः ॥ तोरणानां तथा लक्ष्मिर्दृश्यते च गृ

शिव०
५२

हेगृहे ॥५४॥ चित्राणि च विचित्राणि स्थूलैर्हंसैर्विमानकैः ॥ वितानानि वि
चित्राणि चैलपल्लवतोरणैः ॥५५॥ जलाशयाप्यनेके वै दीर्घिका विविधा
स्तथा उद्यानानि विचित्राणि पुष्पैश्च रचितान्यथ ॥५६॥ पक्षिणश्चाप्यने
केऽत्र कलकंठरवास्तथा नराश्च देवताः सर्वे स्त्रियश्चाप्सरसस्तथा ॥५७
परस्परविरुद्धास्ते तेषां रूपं तु किं पुनः ॥ काममार्गपरा नित्यं मदाये
वनत्राखिन्नः ॥५८॥ किं वर्ण्यते नगर्यश्च महिमा च ऋषिश्वराः ॥ अन्ये
च याज्ञिकाश्चैव पुण्यानि स्वर्गकाम्यया ॥ कुर्वते ते हृया सर्वे विहाय हि
मवत्पुरं ॥ यावन्न दृष्टमेतच्च तावत्स्वर्गपरा नराः ॥६०॥ इत्येवं ऋषिवर्यास्ति ५२
वर्णयंतस्तथा पुरं ॥ गता हिमालयस्याथ गृहे सर्वसमृद्धिमत् ॥६१॥ ता

न्दृष्ट्वा सूर्यसंकाशान् हिमवान् विस्मितस्तथा ॥ स्वर्याः सप्त कथं चा
त्र आयांति च प्रियां प्रति ॥६२॥ कार्या पूजा प्रयत्नेन गृहस्थत्वात् सदा प्रि
येव यं धन्याः गृहस्थाश्च सर्वेषां सुखदायिनः ॥६३॥ एतस्मिन्नंतरे ते
वै ह्याकाशादवतरंस्तथा सन्मुखो हिमवान् दृष्ट्वा ययौ मानपुरःसरं
६४॥ पूजां विधाय तेषां च दंडवत्प्रपपात ह ॥ हस्तैश्च हिमवंतं ते गृहि
त्वोचुः शुभं वचः ॥ अर्घाद्यतश्च तान् कृत्वा धन्यो मे च गृहाश्रमः ॥ इ
त्युक्त्वासनमानीय ददौ नत्किं पुरःसरः ॥६६॥ आसनेषूपविष्टेषु त
दाज्ञया स्वयं स्थितः ॥ उवाच हिमवान् तत्र ऋषीन् ज्योतिर्मयांस्त
दा ॥६७॥ हिमालय उवाच ॥ धन्योऽहं कृतकृत्योऽहं सफलं जीवितं मम

शिव०
५२

लोकेषु दर्शनीयोहं च कृतार्थस्समो मतः ॥६८॥ यस्माद्भवंतो मद्गेहे प्राग
ता विष्णुरूपिणः । पूर्णानां चैव किं कार्यं रूपया नो गृहेषु च ॥६९॥ तेषां
च दुःखनाशार्थं गृहेषु गमनं सतां मद्गेहे पावनार्थं च भवंतः सुसमा
गताः ॥७०॥ तथापि किंचित्कार्यं हि मत्तो सेवकस्य च । कथनीयं भवद्भि
श्च सफलस्तु ममाश्रमः ॥७१॥ महतामाज्ञया लोकः मान्यतां गच्छति
ध्रुवं ॥ तस्मात्त्वकुत्रचित्कार्यं योग्योहं ऋषिसत्तमाः ॥७२॥ एवं वचनमा स्मिता
कर्ण्य ऋषयस्ते सप्त हर्षिताः । ऊचुस्ते गिरिराजे च स्मृत्वा तु तद्वचः ॥७३॥
धन्योसि कृतकृत्योसि भाग्यवानसि भां प्रतं शिवः परोपकाराय कर्तु ५२
कामः प्रजासुखं ॥७४॥ अस्मन्मुखेन ते पुत्रीं याचति शंकरः स्वयं । ज

हा
गद्गुरोः गुरुं कृत्स्नं न विद्यति न संशयः ॥७५॥ जगन्माता तु ते पुत्री तस्मै
वानुगृह्णेवत ॥ जगत्पिता शिवः प्रोक्तः जगन्माता शिवा स्मृता ॥७६॥ तस्माद्दे
या त्वया कन्या प्रार्थिता तेन विद्यति ॥ एवं वचनमाकर्ण्य गिरिराजो ब्रवी
दिदं ॥७७॥ मदीयं च शरीरं वै पत्नी मेना तथा मता रिद्धिसिद्धिश्च धान्यं श्री
वै
महीयां न चान्यथा ॥७८॥ एवं ज्ञात्वा तदा पुत्रीं विलोक्य मातरं च तां ॥ न
मयित्वा तदंगं च ऋष्युत्संगे निवेशयत् ॥७९॥ इदं नैत्यमुमानाम दात
व्यं ऋषिसत्तमाः ॥ ऋषय उवाच ॥ ईदृशी भिक्षुका नेव दाता चैव न वान्
स्त्वयं ॥८०॥ नैत्यं च पार्वती प्रोक्तं किमतः परमुत्तमं ॥ हिमवान् शिव
राणां नेमन न सः सदृशो गतिः ॥८१॥ एवमुक्त्वा तु तां कन्यां ऋषयो वि

५३
शिव०
५४

मलाख्यायाः । आशिषः दत्तवंतस्ते शिवाय सुखदा नव ॥ ८२ ॥ स एवाक
रेणतां तत्र कल्याणे ते न विष्यति । शुक्लपक्षे यथा चंद्रो वर्द्धते तव गुणास्त
था ॥ ८३ ॥ मिलित्वा च शिवं ते च वर्द्धयिष्यति नित्यशः । इत्युक्त्वा ऋषयः
सर्वे गिरिराजे परस्परं ॥ ८४ ॥ पुष्पाणि फलयुक्तानि व्यक्तस्वयं च किरेत
दा ॥ अरुंधती तदा तत्र मेनां मातृमुखी तदा ॥ ८५ ॥ गुणैश्च लोभयामा
स शिवस्य परमासती । हरिद्राकुंकुमैस्तत्र स्वपाणिपरिमार्जयेत् ॥
८६ ॥ ततश्च ते चतुर्थे क्ति निधाय लग्नमुत्तमं । परस्परं च संदृश्य जग्मु ५३
स्ते शिवसंनिधिं ॥ ८७ ॥ महाकाश्यपाद्या ता स्ते यत्रास्ते शंकरः । स्वयं ५४
विवाहस्य विधिं सम्यक् चक्रुस्ते ऋषिसत्तमाः ॥ ८८ ॥ तदा ज्ञप्ताश्च ते त

त्र गतास्वगमनाय वै ॥ स्वयमथर्वबः प्रोक्ताः विवाहे च मया पुनः । ८९
अतः शीघ्रं न वक्तिस्तु ऋषयो ब्रह्मविनमाः ॥ आगंतव्यं स शिष्यैस्तु न
वेतः कार्यकारकाः ॥ ९० ॥ इत्युक्तास्ते गता यत्र तथेति परमं वचः । शिवो
पि सगणास्तत्र प्रसन्नमुखपंकजः ॥ ९१ ॥ कैलासमगमद्देवो विवाह
रचनाय वै ॥ सस्मार नारदं देवं स्मरणादागतः क्षणात् ॥ ९२ ॥ निवेदि
ते च तत्सर्वं श्रुत्वा हृष्टोथ नारदः ॥ शिवोपि कथयामास पार्वतीवचनं
तदा ॥ ९३ ॥ नयातमपस्तयातमेव च श्रीहृतो ह्यहं तदा ॥ एवं श्रुत्वा वचस्त
स्य नारदो वाक्यमब्रवीत् ॥ ९४ ॥ न वर्तते तु व्रतमिदं न क्रमवद्योन वाम्य
हं ॥ सम्यक् कृतं त्वया देव पार्वतीमनसेप्सितं ॥ ९५ ॥ कार्यमत्र त्वयां

शिव० ५५ किंचित्कथनीयं त्वया प्रभो ॥ इत्युक्तस्तु शिवस्तस्मै कथयामास वै
तदा ॥ १६ ॥ भवता च वचनं ब्रह्मन्कृतमेतान्न संशयः ॥ इदं त्वया तु कर्तव्यं
देवानां च निमंत्रणं ॥ १७ ॥ ब्रह्माणं च तथा विष्णुमन्यान्देववरांस्तथा
कथनीयं प्रयत्नेन ऋषिवर्यांस्तथापि च ॥ १८ ॥ सर्वान्नानागणांश्चै
व यक्षगंधर्वकान्नय ॥ नागमिष्यंति येऽत्र मदीया न कदाचन ॥ १९
इत्युक्तो नारदो ब्रह्मन्प्रणिपत्य सदाशिवं ॥ जगाम सर्वतो देवः यदु
क्तं शंभुना पुरा ॥ कथयित्वा पुनस्तत्र मनोवेगसमागतः ॥ २० ॥ इ
ति श्रीशिवपुराणे शिवनिमंत्रणो नाम पंचदशोध्यायः ॥ सूतोवाच ५५
॥ सर्वे देवास्तदा तत्र शिवसेवासमीहया ॥ स्वीयान्येवोपकरणानि

सेवार्थं तु शिवस्य च ॥ १ ॥ सर्वे ते प्रेक्षयामासुर्देवारिगारयस्तदा ॥
गंधर्वाप्सरसस्तत्र वाद्यं नृत्यं च चक्रिरे ॥ २ ॥ मातरः सप्त तास्तत्र शिव
न्हेषाविधिं परं ॥ चक्रिरे च मुदा युक्ता यथायोग्यं तथा पुनः ॥ ३ ॥ कर्तव्यं
किं बहूक्तस्य सर्वे प्रीतिविकिर्षया ॥ तस्य स्थाविनो कोवेषान्नृपावि
धिरन्हृत्तदा ॥ ४ ॥ तदेव कथयाम्यद्य श्रूयतां ऋषिसत्तमाः ॥ चंद्रस्तु मुकु
टस्थाने सान्निध्यमकरोत्तदा ॥ ५ ॥ तिलकं सुंदरं ह्यासीत्त्रिलकं तलीयं
चयत ॥ करणानरणानियान्यासन्तान्येवानरणानि च विन्हृति
स्वंदनं चासीत्तदुकूलं चर्म उच्यते ॥ नपाद्यानरणान्यासन्नगणायो
विविधान्यपि ॥ ७ ॥ नत्वा नावाल्लतदा सर्वप्राकृताविहृतिं गताः ॥ इ

शिव·
५६

दृष्ट्वा सुंदरं रूपं जातं वर्णनदुष्करं ॥ ९ ॥ ईश्वरोपि स्वयं साक्षात्तदैश्वर्यं
लघ्ववानहि ॥ गणास्तत्र च वाद्यानि चक्रिरे विविधान्यपि ॥ १० ॥ एतस्मिन्
समये देवाः आजग्मुः प्रभुसेवया ॥ ब्रह्मा तु हंसमारुह्य ऋषिभिः स
हितस्तदा ॥ स्वीयाटोपेन तेनत्र वृतानां पतिमीश्वरं ॥ नमस्कृत्य स्थि
तास्तत्र तावद्विष्णुः समागतः ॥ ११ ॥ वाहनं पक्षिराजस्थ निजसेवकसं
युतः ॥ स्वचिह्नैर्भूषितश्चासौ नमस्कृत्वास्थितः पुरः ॥ १२ ॥ तावद्दिक्प
तयो देवाः स्वीयाटोपसमन्विताः ॥ इंद्राग्नी च यमश्चैव कुबेरवरुणौ
तथा ॥ १३ ॥ अन्ये ते सर्वदिक्पालाः स्वीयचिह्नसमन्विताः ॥ वसवश्चात ५६
प्यास्सर्पा ऋषयश्च तथाश्विनाः ॥ १४ ॥ नद्यो गंगादयः सर्वाः समुद्राः स

र्व एव हि ॥ गंधर्वाप्सरसस्तत्र नागा सर्वे तथा विधा ॥ १५ ॥ सेवावसरमा
ज्ञाय समाजग्मुर्मुदान्विताः ॥ यदीयं चैव यत्कार्यं तत्तत्कार्यं च चक्रिरे
॥ १६ ॥ शिवाज्ञमास्तदा सर्वे मदीयमिति ॥ यंत्रिताः तस्मिन्दिने तदा त
त्रैव नानावसमन्विता ॥ १७ ॥ देवा मुहूर्तं तदाचक्रुः स्वीयं तु च विनागमः
निः समारं ततस्तस्मात्कैलासपर्वतोत्तमात् ॥ १८ ॥ शिवः परमसंतु
ष्टः देवान् कृत्वा पुरस्तदा ॥ ते देवाश्च तदाज्ञया यायोग्यं पुरःसराः ॥
१९ ॥ अनवं लस्त्ववादित्रैर्मुक्तानादं परस्परं ॥ न देवकथयामासुर्येन तु
ष्टश्च शंकरः ॥ २० ॥ हिमवानपि तत्रैव स्वानारूपसमुद्भवः ॥ विधिवत्
कारयामास मंडपादिविधिं क्रमात् ॥ २१ ॥ विविधानि विचित्राणि तोर

शिव·

णानि तथा पुनः ध्वजांश्चैव विचित्रांश्च चकार परया मुदा ।२२। पर्वताश्च
तथा रम्याः जंगमं रूपमास्थिताः तत्तन्यश्चैव तत्सुताः पुत्र्यश्चैव तथा
विधाः ।२३। वस्त्राद्यैकारसंयुक्ताः सर्वे हर्षसमाकुलाः । कार्यं चक्रुश्च तत्र
तु हिमवद्गृहसंनवं ।२४। तच्छोभां वर्णितुं नैव शक्याकामिकरूषिसत्तमाः
कन्या चैव तु दानार्थं सुसाध्या ले चकार सः ।२५। विवाहविधियोग्यं च वे
धं संपाद्य संस्थितः । देवतापूजनं कुलानानोपकरणानि च ।२६। संविधा
य तदा सर्वं प्रेषयन्गंधमादनं मेवकं च तत्पैवान्यं शीघ्रमायातु वै शि
वः ।२७। प्रतीक्षां च करोस्य कृत्वा च हिमवान्स्थितः । एतस्मिन्समये ५७
रुद्रः समीपस्य बलैर्हृतः ।२८। आजगाम महावीर्यः सर्वसिद्धिसम

न्वितः । समागतं तदा श्रुत्वा हिमवान्बलसंयुतः ।२९। जगाम सन्मुख
स्तत्र धन्योहमिति चिंतयन् । देवसेनां तथा दृष्ट्वा हिमवान्विस्मयं गतः
३०। देवाश्चैव बलं दृष्ट्वा विस्मयं परमं गताः पर्वतानां तथा सेनां देवानां
च तथा पुनः ।३१। मिलिता च तथा रेजे मन्यते सागराबुभौ । परस्परं मि
लितास्तु देवाश्च पर्वतास्तथा । कृतकृत्यं तथात्मानं मेनिरे परया मुदार
चित्ताशिबिरं सम्यकुसंस्थाप्य देवताबले ।३३। जगाम पर्वतस्तत्र यत्र
स्याद्विधिवेदिका । कारयिता विश्वकर्मेण चतुष्कं तोरणैर्युतं ।३४। स्नानदा
नादिकं कृत्वा प्रतीक्षामकरोत्तदा । मेनापि च तथा तत्र चेद्रशालानुपा
श्रिता ।३५। हष्यनारसमायुक्ता शिवं नक्तं सुरवावहे । हरं कामानव

तत्र नारदेन समन्विता ॥३६॥ प्रथमं च निरीक्ष्यामि हर्षनिर्भरमानसाः
कीदृशं शिवरूपं च यदर्थे तप उत्तमं ॥३७॥ इति ज्ञानपरा सा च दर्शनार्थं
शिवस्य च स्थिता शिरोगृहे देवी मेना मुनिवरस्तदा ॥३८॥ शिवोपि च तत
दात्तस्या ज्ञात्वाहंकारमात्मनः ॥ तथैव दर्शयामास बुद्धित्वंशोन वेघया
३९॥ एतस्मिन्न समये मेना देवानां परमात्मनां निरीक्षती तदा मेना
दृष्ट्वा हर्षसमाकुला ॥४०॥ एतत्पतिः शिवः साक्षात्कादृशो वैन विष्य
ति ॥ म्रनोवाच ॥ अक्षयतां द्रष्टव्यः श्रेष्ठाः कथा कौतुकावहा ॥४१॥ अथ
मे चैव गंधर्वाः सुंदराः सुनगास्तथा वस्त्रैश्च विविधैर्युक्ता नानालंका
रभूषिताः ॥ नानावाहनसंयुक्ताश्च नानावाद्यपरायणाः ॥ पताकाभिर्विचि

त्रामिरप्सरोगुणसंयुता ॥४३॥ दृष्ट्वा विश्वावसुं तत्र तत्पतिं परमं शुभं ॥
दृष्ट्वा तु हर्षिता मासीत् शिवो यमिति चाब्रवीत् ॥४४॥ देवानां गायकश्चा
यं कृतो देवः सनातनः ॥ इत्येव नारदस्तस्यै उवाच ऋषिसत्तमः ॥४५॥
एवं श्रुत्वा तदा मेना विचारे तत्परा भवेत् ॥ इतश्चाप्यधिको यो वै स च
कीदृक् न विष्यति ॥४६॥ एतस्मिन्नंतरे यक्षाः मणिग्रीवादयश्च ये ॥
तेषां सेना तया दृष्टा ज्ञानादि द्विगुणीकृता ॥४७॥ तत्पतिं च कुबेरं च
दृष्ट्वा सेनासमन्वितं ॥ अयं रुद्रस्तया नेति वरुणश्च समागतः ॥ ततो
पि द्विगुणां शोभां दृष्ट्वा रुद्रस्तथा न हि ॥ जगाम धर्मराजश्च सर्वशोभा
समन्वितः ॥४८॥ शोभा च द्विगुणा तस्याः दृष्ट्वा सोयं तथा न हि ॥ तावदिंद्रः

शिव०
५९

समायातः सर्वदेववरः प्रभुः ॥४२॥ किंवर्णयेत तदीयांच शोभां वै विष्णु
णीकृतां ॥ यां यां च ये समायाति शोभां नाथ विष्णुणीकृता ॥४३॥ तं दृष्ट्वा
करः सोयं नायं रुद्रस्य किंकरः ॥ तावत्तु सूर्यः समायातः सर्वदेवमयः
प्रभुः ॥४४॥ तेजसा दीप्तिमान् लोके दृष्ट्वा रुद्रस्तया नहि तावच्चंद्रः समा
यातो ग्रहैः सर्वैः समन्वितः ॥४५॥ ततश्च विष्णुणा शोभां रुद्रोयं नोन वेदि
ति । मेनामेने च तां पुत्रीं धन्यां कुलसुखावहां ॥४६॥५४॥ एतेषां यः प
तिः सा वै यस्याः पतिर्न विश्यति । तस्याः किं वर्णयेत भाग्यमपि वर्षशता
तैरपि ॥५५॥ तावद्ब्रह्मा समायातः तेजसां राशिरुत्तमः । ऋषिवर्यसुतः ५९
साक्षात्तु धर्मपुंज इवस्थितः ॥५६॥ अयं वै न वितानेतितावद्विष्णुः स

मागतः । मेघश्यामश्चतुर्बाहुः पीतांबरधरः प्रभुः ॥५७॥ श्रीवत्सव
क्षाः लक्ष्मी शंखचक्रादिलक्षणैर्युतः ॥ मुकुटादिभूषणैर्युक्तः सिध्व
ह्कसमन्वितः ॥५८॥ कोटिकंदर्पलावण्यप्रसन्नमुखपंकजः ॥ राजी
वलोचनः शांतः निजजनैः समन्वितः ॥५९॥ पक्षींद्रवाहनं श्रीमानप्रमे
यपराक्रमः । तं दृष्ट्वा चकिता ह्यासीत् धन्याहं यस्य संगतः ॥६०॥ सोयमि
तीनवै साक्षात्तु नेति तां नारदोब्रवीत् ॥ अतोधिकोन वैसो वै वर्णितुं
नैव शक्यते ॥६१॥ तावच्च ऋषयो याताः नृगवाद्याश्च मुनीश्वराः ॥ गंगादि
सर्वतीर्थैश्च शिष्यवर्गैश्च समन्विताः ॥६२॥ ज्ञायते कल्पवृक्षाश्च गं
छंतः कामपूरकाः । सुरम्यादिपरैर्युक्ताः स्तेजसां राशयः परे ॥६३॥ ग

शिव० णं तस्मै परं ब्रह्म सह्यनूतनाः सुखावहाः ।। तन्मध्ये वै ववागीशं दृष्टा सोयं
६० नविष्यति ।। ६४ ।। नायमन्यसमो याति निर्गुणो गुणवान् हरः ।। इत्येवं ना
रदाच्छ्रुत्वा मेनामानवती मुदा ।। ६५ ।। त्रैलोक्यसारं यश्चासीत् तत्रस्थं हिमया
पुनः ।। अतो रुद्रश्च यो वै स्यात् कीदृक् सोयं भविष्यति ।। ६६ ।। तावद्रुद्रः स
मायातो नारदस्तामुवाच ह ।। अयं वै शंकरः साक्षात् पश्यपतो सुंदरि त्वया
६७ ।। हर्षिता सा तदा तत्र ददर्श शंकरं मुदा ।। वात्यारूपधरां किंचित् आ
याताः मर्मरस्वराः ।। ६८ ।। अंगुल्या दर्शयामास नारदस्तां शुभाननां ह
रस्य सेवकान् पश्य पुनरन्यान् विलोकय ।। ६९ ।। तावदन्ये समायाताः ६०
भूतप्रेतपिशाचकाः ।। वक्रतुंडास्तथा केचित् विरूपाश्च परे तथा ७०

करालाः श्यामलाः केचित् खंडाश्च लोमशाः परे ।। दंडपाशधराः केचित्
केचित् मुद्गरधारकाः ।। ७१ ।। विरुद्धवाहना केचित् दुःशीलापकारकाः
रास्तथा ।। डमरुनवाद्यं तोपि गद्यनादं तथा परे ।। ७२ ।। तालकानाद
नं केचित् शृंगीनादं तथा पुनः ।। शृंगनादं तथा चान्ये शंखनादं तथा पु
नः ।। ७३ ।। गोमुखानां तथा नादं कुर्वंतस्तथा परे ।। असंख्यातास्तथा
याताः नानादृष्ट्वात्रास संयुता ।। ह्ह ७४ ।। नवंती तत्क्षणादेव तया दृष्टा
तया तदा तान् दृष्ट्वा हृदयं तस्याः श्रीणीमासीत् समाकुले ।। ७५ ।। तन्म
ध्ये शंकरं देवं निर्गुणं गुणवत्तरं वृष ।। नस्थं पंचवक्त्रं त्रिनेत्रं भूतिरूपितं
७६ ।। कपर्दिनं चंद्रमौलिं दशहस्तं कपालिनं ।। व्याघ्रचर्मोत्तरीयं च पि

शि॰ ६२ नाकयाणिनं शिवं ॥७७॥ खर्परेण तथा युक्तं शंखादिभूषणोर्युतं गजच
र्मवृषयस्पतीव्रमक्षिसमन्वितं ॥७८॥ निंदितं कंपयुक्तं च शिवो यं मुनिर
ब्रवीत् ॥ तदीयं च वचः श्रुत्वा वाताहतलतेव ॥७९॥ सा पपात तदा भू
मौ मेना दुःखनरा सती ॥ किमिदं च कृतं दुष्टे धिकृतां च मां च दुराग्रहे
८०॥ इत्युक्त्वा मूर्छिता तत्र विसंज्ञा ह्यभवत्क्षणात् ॥ प्रयत्नैर्विविधैः सा
वै संज्ञां लेभे मेनिका ॥८१॥ ॥ इति श्री शिवपुराणे ध॰ शिवविवाहदेवा
दिसेनावर्णनं नाम षोडशोध्यायः ॥१६॥ ॥ संज्ञां लब्ध्वा पुनः सा च ति
रस्कारमथाकरोत् ॥ नारदं चाद्य पुत्राश्चानिनंद च रितं तथा ॥१॥ प्रथमं ६२
नारदस्यैव कथया मा मम दुर्वचः ॥ मनोवाच ॥ प्रथमं तु लया ह्युक्तं शिव

श्चेमां वरिष्यति ॥२॥ पश्चाद्धिमवतः कृत्यं पूजार्थं विनिवेशिता ॥ ततो
दृष्टं ... फलं सम्यक्त्वयापि वेविता लया ॥३॥ पुनस्तपः स्ततस्तप्तं दुःख
रं मुनिनिश्चयत ॥ पुनर्लब्धं फलं ह्येतत्पश्यतां दुःखदायकं ॥४॥ किं
करोमि क्व गच्छामि हतं तु जीवितं मम ॥ कस्यापि किं गतं नैव ममापि
च हतं गृहं ॥५॥ हस्तेत्दीपं तथा गृह्य पतितं कूपके स्वयं ॥ किं वः छिन्न
मिदानीं च सर्वं व्यर्थी कृतं मम ॥६॥ क्व गता ह्यृषयो दिव्यास्तेषां श्मश्रु एका
त्रोटयाम्यहं ॥ तस्मात्र्वैव पापत्नी साधूर्नास्तिय मागता ॥७॥ केषां चै
वापराधेन सर्वं पुत्र्या कृतं स्वयं हेमदत्ता तया नीतं काचं च दुष्टया लं
या ॥८॥ हीला तु चंद्रनं त्यक्त्वा लेपितं कर्दमं तया ॥ हंसमुत्सृज्य काकोवेगृ

शिव०
६२

हीतोहस्तपंजरे॥९॥हित्वाब्रह्मजलंदूरेपीतंकूपोदकंतथा॥सर्पस्त्या
क्तातुखद्योतंगृहीतामुख्यमीदृतो॥१०॥तंदुग्धं[illegible]स्तुतयाहित्वाकृतंचउ
पनक्षणं॥घृतंत्यक्त्वातथातैलंएरंडंजाजितंत्वया॥११॥सिंहसेवांतथामु
त्वाशृंगालःसेवितस्त्वया॥यज्ञगृहविभूतिंचत्यक्त्वाभूतिमिहेप्सिता
१२॥दूरीकृतातयानम्रमर्चितासनवमिस्तुत॥सर्वान्देववरांस्त्यक्त्वा
शिवार्थेतपसंदृतं॥१३॥धिक्त्वांचतवबुद्धिंधिक्धिक्वयोन्नऋषिस
त्तमान्॥धिक्कुलंधिक्कराज्यंचसर्वंतुच्छीकृतंत्वया॥१४॥गरलंनक्ष्य
तुत्वेतन्मरणंतुममैवहि॥पर्वतानांतथाराजानेत्राद्दूरंकथंनहि॥१५॥ ६२
ऋषयश्चकिमर्थमिदर्शयंतिस्वकंमुखं॥साधितंकिंतुसर्वैस्तुमिलि

त्वाघातितंकुलं॥१६॥वंध्याहंनकदा[illegible]जातागर्भोनगलितःकथं॥अ
थवानमृतावाहंपुत्रिकानमृताकथं॥१७॥राक्षसैर्वाकथंनैवनक्षि
तागहनेवने॥हतावानकथंकेशिन्मतान्याघ्रवरान्तुकिं॥१८॥छेद्या
मिशिरस्त्वद्यकिंकरोमिकलेवरं॥सक्ष्यामिवाकुतोयामिहाहाचजीवि
तंहतं॥१९॥इत्युक्त्वापतितासावनायातिनतंसन्निधौएतस्मिन्नुसम
येब्रह्मा॥स्वाजगामस्वयंतदा॥२०॥नारदोपिवचस्तस्यैउवाचऋषिस
त्तमाः॥यथार्थंसुंदरिरूपंनज्ञातंशंकरस्यचतिष्ठदूरेतथातंचमेना
वचनमब्रवीत्॥ब्रह्मापुनस्तथागत्यकथयामासतांप्रति॥२१॥श्रोत
व्यंचत्वयामेनेमदीयंवचनंशुभं॥शंकरोलोककर्ताचहर्तापालयिता

शिव० ६३

स्वयं ॥ २३ ॥ न त्वं जानासि तद्रूपं कथं दुःखं ममीहसे ॥ इत्युक्त्वा तु तदा सा च
ब्रह्माणं वाक्यमब्रवीत् ॥ २४ ॥ किमर्थं तु न वै तत्र व्यथी कर्तुं समुद्यताः ॥
रूपेण त्वया परं नाम तदन्यत्तां वा स्वयं पुनः ॥ २५ ॥ न वक्तव्यो नवद्विस्तु शि
वाय दीयतामिति ॥ इत्युक्ते तु तदा देवा रिज्ञाद्यादिगधीश्वराः ॥ २६ ॥ स
मागत्य तथा सर्वे वचनं चेदमब्रुवन् अयं वै परमः साक्षात् शिवः परमसुखा
वहः ॥ २७ ॥ रूपया च त्वया सम्यग्दर्शनं शंकरस्य च जानता न चायरूपाद्दुर्नाम्य
या दर्शने कृतः ॥ २८ ॥ अथावाच पुनर्मेना हन्यतां पुत्रिका भुता नद्या च
मया सम्यक् शंकराय समर्पिता ॥ २९ ॥ इत्युक्ते च तदा तत्र ऋषयः सम्रा
वनेऽब्रुवंस्ते वचनं मुनयो मध्यवयसमुपागताः ॥ ३० ॥ विरुद्धं चैव यत्कार्यं ६३

वयं मन्यामहे कथं ॥ अयं वै परमो लाभो दर्शनं शंकरस्य यत् ॥ ३१ ॥ दान
पात्रं तथा प्राप्तस्त्वागतस्य मंदिरे तव ॥ अतः श्रुतं तरां किं तु शिवोऽकरमुपा
गतः ॥ ३३ ॥ इत्युक्ते च पुनर्मेना ऋषिवाक्यानि राकरोत् ॥ शास्त्रैर्वा घातयाम्य
घ न दास्ये शंकराय वै ॥ ३४ ॥ हिमालयः समागत्य दिकलासि कथं त्रि
ये ॥ के के समागता गेहं कथं चैतान् विकत्थसे ॥ ३५ ॥ शंकरस्तु मया ज्ञातः
सर्वेषां प्रतिपालकः ॥ निग्रहानुग्रहे कर्ता सृष्टिश्चो जगतामिह ॥ ३६ ॥ मुं
चस्व दुःखं त्वं तथा कार्यं कर्तुं महसि साम्प्रतं ॥ तेनोक्तेन तथा तस्मै मेनावा
क्यमुवाच ह ॥ ३७ ॥ हिमवन् श्रूयतां मे तत्स्मृता कर्तुं मिहार्हसि ॥ ग
हीत्वा तनुजां त्वं हित्वा बध्वा कंठे तु पर्वतान् ॥ ३८ ॥ गत्वा च सागरे स्वामि

शि॰व॰
६९

नक्षिप्ताऽत्वं च मुखी न च ॥ न देया च शिवे पुत्री निश्चितं मे वचः पुनः ॥३९॥
यदि दास्यसि पुत्रीं तत्त्यक्ष्याम्यहं तत्कलेवरं इत्युक्ते च तया तत्र पार्वती स्वय
मागता ॥४०॥ मातस्त्वं विपरीता वै बुद्धिस्त्वां समुपागता ॥ धर्मावलंबे त्वं ना
तु कथं कथं धर्मं प्रहास्यसि ॥४१॥ अयं वै परमः साक्षात्सर्वेषां योनि
रुच्यते ॥ शंभुश्च शंकरश्चैव देवानां प्रभुरीश्वरः ॥४२॥ अधिष्ठानं तया
कर्तापालकश्च सनातनः ॥ यदद्ये देवताः सर्वा आयाताः किंकरीकृताः
४३ ॥ नतः श्रुनतरः को नु वदत्वं हितकारिणी ॥ उत्तिष्ठ त्वं प्रयत्नेन जी
वितं सफलं कुरु ॥४४॥ देहि दानं शिवायैव ह्यात्मनं सार्थकं कुरु ॥ त्य ६९
ज दुःखं परं तापं हित्वा सुखमवाप्नुहि ॥४५॥ यदि न दास्यसि त्वं च न ह्

योन्यं तयोत्तमं सिंह नगिं कथं ते नेष्टे गालः परमः श्रुते ॥४६॥ मनसा व
चसा देविकर्मणा वा हरः स्वयं ॥ वृतो हृतो वृतश्चैव यदीच्छसि तथा कुरु
४७ ॥ उमा च वचनमाकर्ण्य गृहीत्वा तत्कलेवरं ॥ मुष्टिभिः कूर्परैश्चैव दंतान्
व घर्षति तया ॥४८॥ नाडयामास सा पुत्रीं विकलाऽवसा तदा ॥ येवान्येऽक्रू
व यश्चैव नारदाद्याश्च ये पुनः ॥४९॥ तद्धस्तात्तां परिच्छिद्य नीत्वा हरांतरं मेना॰
स्थिताः ॥ तां च तथाविधां दृष्ट्वा नर्त्तयामास वै तदा ॥५०॥ किं मनो करिष्या
मि दुहायस्त्ववती पुनः ॥ गरं ददामि वा पुत्रीं क्षिपामि वा य कूपके ॥५१॥ शस्त्रै
र्वा छिद्य याम्यत्तां सागरे वा क्षिपाम्यहं ॥ स्वीयं वाय शरीरं वै त्यक्ष्यामि वाऽप्य
किं पुनः ॥५२॥ व एक्षकी दृशो लोके न ध्व श्वदुष्टया पुनः ॥ न माता न पि

तावं धुर्नवाता नच गोग्रजः ।५३। न रूपं नच चातुर्यं न गृहं च शुभं पुनः । न
व संज्ञताप्यलंकारो न सहायाश्च धा शुभाः ।५४। वाहनं न शुभं चास्य न वयो
न धनं तथा । नचा वित्तं न वा विद्या किं दृष्ट्वा मेकमेव यत्त ।५५। किंचिल्लोके
मया पुत्री दीयते किं करोम्यहं । एतस्मिन्न् समये विष्णुः समागत्याब्रवी
दिदं ।५६। पितॄणां लेशु ना पुत्री मानसी गुणसंयुता । पत्नी हिमवतः सा
क्षात् ब्रह्मणः कुलमुत्तमं ।५७। महायाश्च दृश्यालोके धन्यासि किं ह्राम्य
हं । धर्मस्य सारं तु नासि कायं धर्मं महाद्युति ।५८। देवेश्वरस्यापि निश्चैव
ब्रह्मणा वामयान्तया विरुद्धं कथ्यते किं च त्वया शुभतरं तु किं ।५९। शि
वं त्वं च न जानासि निर्गुणः सगुणो ह्य नूतनेनैव निर्मिता देवी प्रकृति

तिर्मूलकारणं ।६०। न सा गर्भेव च तया तेन निर्मितः पुरुषोत्तमः ॥ ताभ्यां चा
हं तया ब्रह्मा तत्त्वगुण रूपतः ।६१। अवतीर्णः स्वयं शंभुर्लोकानां हित
कार । ततो वेदाश्च ताद्देवाः यत् किंचित्तु दृश्यते जगत् ।६२। स्थावरं जंग
मं यस्य तत्सर्वं शंकरादभूत । तद्रूपं वर्ण्यते केन ज्ञायते केन वा पुनः ।६३
मयान ब्रह्मणा यो वै वर्षाणां सहस्रं पुरा । भ्रांत्वा पारो न वै लब्धो ह्यनेन व
र्ण्यते कथं ।६४। सत्यज्ञानमयश्चैव व्याप्यव्यापक एव च ॥ अजरश्चाम
रश्चैव सर्वाध्यक्षः समीगत ॥६५॥ अहं ब्रह्मा हरिश्चैव ये देवाश्च पुरा
तनाः । सूर्यश्च चंद्रमाश्चैव ग्रहाः सर्वे शुभावहाः ।६६। पर्वताश्चैव वनघ
श्च वृक्षाश्च धनदास्तथा ॥ आब्रह्मस्तंब पर्यंतं यत् किंचित् दृश्यते

शिव०
६६

जगत् ॥६६॥ तत्सर्वमीश्वरो देव नात्र कार्या विचारणा ॥ अरूपश्च सरू
पश्च जायते शंकरः स्वयं ॥६७॥ बीजात्तु वृक्षप्ररोहश्च नानात्वमुपजायते
अंते च फलमेवस्यात् तस्मात् फलमुदाहृतं ॥६८॥ आदौ शिवः शिवो म
ध्यश्चांते शिव उदाहृतः ॥ सर्वं शिवमयं चैतत् शिवः सर्वमयस्तथा ॥७०
सूत्रे चैव तु पुष्पाणि पुष्पेषु सूत्रमुच्यते ॥ एवं शिवश्च सर्वेषु शिवे स
र्वं तथा स्मृतं ॥ अहं शिवः शिवश्चाहं त्वं चापि शिव एव च ॥ सर्वं शिवमयं
ब्रह्म शिवात्परं न किंचन ॥७२॥ अज्ञानादन्यथाभावः ज्ञानेभ्यः समुदा
हृतः ॥ कार्यकारणवस्तु ते एक एव न चापरः ॥७३॥ कारणं च शिवः सा ६६
क्षात् ॥ कार्यरूपमिमं बुधैः ॥ अज्ञानां चैव कार्यं च कारणं नेद दृश्यते

ज्ञानिनां नैव वै नेदास्ति सर्वं शिवमयं जगत् ॥ ॥ इति श्री शिवपुराणे मना
संबोधनो नाम सप्तदशोध्यायः ॥ ॥ इत्यस्माच्च शिवादन्यत् तद्रूपं नैववत
वेदिति वस्तु तस्तु शिव ईति प्रसिद्धं वेदसंमतं ॥१॥ अज्ञानादन्यथा भावो
ज्ञानेवस्तु प्रदृश्यते ॥ स्थाणौ तु पुरुषभ्रांति रज्ञानाद्युपजायते ज्ञानेजा
ततथा स्तंभो वस्तु ज्ञान प्रदर्शिनी ॥२॥ रज्जौ तु सर्पविज्ञानमज्ञानसंभवं
नृणां ॥३॥ [illegible] संपन्ने चैव विज्ञाने रज्जुरेव न चान्यथा
शुक्तौ तु रजतज्ञानं ध्यायन् पश्यति कश्चन ॥४॥ विवेके च समुत्पन्ने शु
क्तिरेव न संशयः तथैवाज्ञानजा बुधिः शिवादन्यत्र यान वेत् ॥५॥ ए
वं च ज्ञानदृष्टीनां शिवः शिवः शिवस्तथा ॥ अन्यन्निदर्शने देवि शून्यं ता

च वदाम्यहं ॥६॥ यथा च नरकः कश्चित्तद्वेषांतरसमीहया ॥ गृह्णाति विवि
धान् वेषान्वस्तुतो नट एव सः ॥७॥ अज्ञानीनां मनो हृत्वा प्रतार्य धन
मा हरेत् नाना विहस्यते न तत्र न टैनैव हृतं धनं ॥८॥ तथैव ज्ञानवान्दे
वि शिवादन्यं न पश्यति ॥ अज्ञाने विविधं रूपं पश्यतीति सुनिश्चितं
९ ॥ देही वस्त्राण्यनेकानि दधाति विविधेहया ॥ वस्त्राणि विविधानि ह
धारकस्त्वेक एव सः ॥१०॥ तथैव शिवरूपं तु संयोगान्न विविधं न वेत्
वस्तुतो बंधनं नास्ति यंकारस्य हनेशिवे ॥११॥ यावद्देहं प्रजायेत तावद्दे
बंधनं दृढं ॥ निवृत्ते चाप्यहंकारे कर्त्ता शिव उदाहृतः ॥१२॥ यथा च स्फ
टिकस्यैव संयोगाद्विविधो न वेत् तथा प्रकृतिसंयोगात् शिवस्यानं

कता मता ॥१३॥ तथा विवेकता तस्याग्रहणे मोचने शिवे प्रकीर्तितं परं
ब्रह्म यत्र शिवमुदाहृतं ॥१४॥ स एव गुणसंवतीर्णो हरः स्वयं तस्य त
त्वं न जानीमो न जानीमो वयं प्रभो ॥ तस्मात्त्वं हिमवत्सत्त्वीदुःखं मुंच
शिवं न जतस्याल्पकोमलं किंचित् मनो विस्तु प्रबोधितं ॥१६॥ एतस्मि
न्नंतरे रुद्रेण नारदेन प्रबोधितः ॥ तावन्मासो गतो यावद्रुद्रेण रूपमुत्त
मं ॥१७॥ यत्नं तु न कृतवान्सत्याक्रपालुत्वं प्रदर्शितं ॥ सुदर्शनं गंदहा
मोहं शाभायया पुरा शिवं पुनस्तत्र पश्यन्नारदो वाक्यमब्रवीत् साद
दर्शी शिवं तत्र स्मृयतां कीदृशः ॥ मनुः सूर्यकोटिसमं रूपं त्रिनेत्रं नृपणे
पुतं मुकुटेन विराजितं विचित्रवसनं शुभ्रं ॥१९॥ वाहनस्य तथा त्रो

रूपेण

शिव० नावर्णितुं केन शक्यते सुप्रसन्नं सुहासं च सर्वैर्देवगणैर्युतं ॥२१॥ स्व
६८ र्येण छत्रितं सोऽचंद्रेण विवीजितस्तथा गंगा च यमुना चैव चामरे दधतुः
शुभे ॥२२॥ सिद्धयोष्टौ प्रनृत्यं तु कुर्वंति स्म तदग्रतः ॥ ब्रह्मा चैव तथा वि
ष्णुरिंद्राद्या देवतास्तथा ॥२३॥ स्वीयं स्वीयं यथा वेषं संनह्य परतोऽचर
न् जयजयेति नाम्नां नो नानारूपिगणास्तथा ॥२४॥ परे ब्रह्मगणं तस्तेप
ताकाभिरलंकृताः ॥ विश्वावसुमुखास्तत्र अप्सरोगणसंयुताः ॥२५॥ गा
यंतोऽप्ययुस्तस्य ज्ञोणायुक्तापरस्परं गणास्तत्र तु वाद्यानि मृदंगादि
क्रमेण च ॥२६॥ अकुर्वंत परं तत्र तत्त्वानि पुरतोऽयमुः ॥ समुद्राश्च तथा न ६८
द्यो नानारूपा विभूषिताः ॥२७॥ तस्मिंश्च समये तत्र शोभा तस्य महात्म

नः ॥ जाता तां वर्णितुं को वा शक्नोति मुनिसत्तम ॥२८॥ तं दृष्ट्वा च तथा मेना
क्षणं चित्रगता इव पश्चाच्च वर्णितं देवैर्यद्रूपं तत्र यैर्वहि ॥२९॥ धन्या पुत्री
मदीया च पया सो परवान्कृतः ॥ वरणं च तदा तस्य कृत्वा लज्जापरा न
वत ॥३०॥ शिवोऽपि च तदा द्वारे गतो देवगणैः सह ॥ मेना तं पूजयामास स
ब्रह्मविष्णुसमन्वितं ॥३१॥ तावत्स्त्रियः समाजग्मुः हित्वा कामाननेकशः
मज्जनं कुर्वती काचिच्चूर्णेन संयुता ययौ ॥३२॥ काचित्तु स्वामिनः सेवां
विहाय सखिसंयुता ॥ चामरेण तथा युक्ता द्रष्टुं नाथं शिवस्य च ॥३३॥
काचित्तु बालकं हित्वा ह्यतृप्तं द्रष्टुमाययौ ॥ रशनां बध्नती काचित्तयैव
संयुता ययौ ॥३४॥ वस्त्रं च विपरीतं च धृत्वा काचिद्रुपाययौ ॥ काचिद्वस्त्र

मालाकांचध्वलांजनसमन्विता ॥३५॥ आदर्शं च तथान्यस्मिन्नोल्कानेत्रसु-
पाययौ ॥ काचित्तु नीजनार्थं च स्थितं च स्वामिनं तदा ॥३६॥ हित्वान्येन समा-
युक्ता दर्शनार्थं प्रनोरिति । दोहनार्थं स्थिता काचित्त्र हित्वा घय पराययौ
३७ ॥ काचित्तु कामिनी पादं रंगयंती यदा तदा । स्तुलोद्योयं च तद्धित्वा दर्श-
नार्थमुपागता ॥३८॥ इत्यादिविविधं कार्यं हित्वान्याः समुपाययुः । दृष्टू
तुश्चांकरं रूपं मोहं प्रापाश्च पुत्रिका ॥३९॥ यया चेतनास्ति हंते तथा ना-
स्थ्रं स्थितास्तथा क्षणमात्रं तयास्थिता वचनं चेदमब्रुवन् ॥४०॥ सम्य-
क्कृतं तु पार्वत्या नान्यथा तद्भवेदिह । अहो पश्यत किं रूपं वर्णनीयं क- ६८
थं भवेत् ॥४१॥ यथार्थं नाम सख्यस्तु दृश्यते नान्यथा क्वचित् । शिवई-

तिच विख्यातं दर्शनाद्धननेत फलं ॥४२॥ नेत्राणि सकलान्यासन् हिमवत्तु स्वा-
सिनां यो वै पश्यत्स्य तदा रूपं तस्यैव च सार्थकं भवेत् ॥४३॥ तस्यैव सफलं जन्म
तस्यैव सकलाः क्रियाः । येन दृष्टः शिवः साक्षात्सर्वपापप्रणाशकः ॥४४॥ पा-
र्वत्या साधितं सर्वं शिवार्थं यत्तयः कृतं । धन्येयं कृतकृत्येयं शिवं या प्राप्य पतिं स-
दा ॥४५॥ कौतुविष्वाति सा नित्यमचिंत्य सुखदे तवे । यदीदं युगलं ब्रह्मा संग-
मायाक्षमो भवेत् ॥४६॥ तदा च सकलो व्यस्य श्रमोनिः फलतामियात् सम्य-
त क्कृतं न स्वात्र मिलितं युग्ममुत्तमं ॥४७॥ अनयायत्तपस्तप्तं सार्थकं सकलं-
कृतं ॥ विनानु तपसा ह्येतत् प्राप्यं चैव सुदुर्लभं ॥४८॥ लक्ष्मि नारायणं ले-
ने स्वामिनं तथा शिवं सुवर्णमणियुक्तं च राजते तितरो यथा ॥४९॥ तथा

शिव० ७० सोपार्वती देवी हरं प्राप्य सुभूषिता । इत्येवं वचनं श्रुत्वा ताश्चंद्रेनेश्चाक्षतैरपि
५० । शिवं वर्द्धापयामासुर्धन्योयमिति चाब्रुवन् कन्यास्तथाविधाः शरवेनु शि
वोद्वारि समागतः ॥ ५१ ॥ सर्वे देववरास्तत्र श्रुत्वा ताश्चा शिवं प्रतिस्थितास्तत्र शि
वस्यार्थे कश्चित्कौतुकं पुनः ॥ ५२ ॥ करिष्यतीति तन्मत्वा सावधानतयातत
स्थाएतस्मिन्नंतरे देवी मेनाहर्षसमन्विता ॥ ५३ ॥ परिधाय शुभं वेषं लज्जि
ता देवसंनिधौ ॥ आगत्य शिवपत्नीं च कृत्वा शीघ्रमुपागता ॥ ५४ ॥ वस्त्रं
शिवस्य कंठे तु कृत्वा देवनियाः शुभाः । कर्षयंती क्षणं तत्र कृत्वा ह्यस्य संग
हं ययौ ॥ ५५ ॥ चतुष्के च तथा ब्रह्मा ऋषिनिर्दिष्टितः स्वयं ॥ ताभ्यां देवशिवस्त ७०
त्रह्याजगाम प्रहर्षितः । ५६ । तावद्धिमवान्स्नातास पत्नीकः स्वयं गतः

ब्रह्मा सर्वं च तत्रत्यं कारयामास वै तदा । ५७ । प्रयोगादि विधायेवं वेदोच्चारणा
त्तत्पराः ऋषयः पाठयामासु ॥ होत्राणि विविधान्यपि ॥ ५८ । हिमवानपि तत्रैव
वरायार्चितमाचरन् । पाद्यमाचमनीयं सर्वं च विधिपूर्वकं ॥ ५९ ॥ दुकूलं सुंदरं
तेन दत्तं तस्मै महात्मने । तिलकं पुष्पहारं च कांचनस्य यथाविधि । ६० । पुन
श्चतुर्घमासाद्य दंपती तौ मुदान्वितौ ॥ संस्थाप्याग्निं पुनस्तत्र वैवाहमक
रोद्विधि । ६१ । अक्षतारोपणं तत्र स्त्रियश्चक्रुस्तदाज्ञया । प्रदक्षिणं तथा
चाग्नेश्च तुर्धा च कृतं तदा । ६२ । ब्रह्मणः स्खलनं जातं शिवांगुष्ठदर्शना
त् ॥ तज्जोपि तं तदा तेन स्पृष्ट्वं अंगपातितं च तत्र ॥ ६३ ॥ ततो जाता ह्यसंख्याता
बटुका ब्रह्मसूत्रकाः । जटादंडधरास्ते च बद्धकच्छाः सहस्रशः । ६४ ॥ नम

स्कृत्यचब्रह्माणंस्थितास्तेतुनदीअग्रतः।शिवोपिवटुकान्दृष्ट्वाब्रह्मणोऽ
पितस्तदा।६५।संप्रार्थितस्तदादेवींगंगांदत्वातुपाविनः।अनुग्रहस्यपुनस्त
त्रस्यापितश्चपितामहः।६६।वटुकान्सर्यशिष्यांश्चकृत्वाकार्यमथा
करोत्।तेवटुकावर्द्धितास्तत्रसर्वसेवापरायणाः।६७।रथप्रष्ठेरथाग्र
वध्यायंतितेतपस्विनः।ब्रह्मचारिस्वरूपेणास्थितास्तेवेदपारगाः।६८।
अवशेषितंचयत्कृत्यंकारयामासवैतदा।अनुज्ञांचैवदत्वातुकन्यायै
सपितामहः।६९।ध्रुवस्यदर्शनंतत्रकारयामासवैतदा।पुनःस्थाप्यासने
देवंचकुस्वस्त्ययनंशुभं।७०।वेदोक्ताशाशिषोदत्वावर्धापयच्चपुनःपुनः।
तदेवाश्चतदादेवीजगतांमातरंशिवां।७१।नमस्कृत्यपुनस्तेवैस्थिता

स्तेशंकरंपुनः।नमस्कृत्याब्रुवंस्तत्रशिवत्वंजगतःपिता।७२।इयंचजगतो
माताधारन्यादिनमघतः।जयंतिचपुनर्देवागंधर्वाप्सरसस्तदा।७३।नृत्यं
गानंवाद्यंचवकुस्तेपरयामुदा।गिरिराजोपितत्रैवसंपाद्यविधिमुत्तमं।७
४।मेनेकृतार्थमात्मानंसफलंचगृहाश्रमं।तौदंपतीतदातत्रसंपूज्यकुल
देवतां।७५।कर्णिष्यमंडपंतत्रद्यकृष्णकौतकोषधीं।ऋषीन्प्रणम्यसर्वांस्ता
न्चकारानुग्रहंशिवः।७६।हिमवानपितत्रैवयथायोग्यमपूजयत्।सर्वा
न्देवगणांस्तत्रशिवार्थंयेसमागताः।७७।यथाचमेनिरेदेवावयंकेपर्वता
ग्रतः।तथापूजाचसेवाचकृतातेनमहात्मना।७८।यथाचमनसिस्लानिं
गतास्तेदेवसत्तमाः।समागतेषुतेष्वेवनकश्चिद्दुःखमागतः।७९।अहं

शिव०
७२

धन्यः शिवेनैव गिरिणा चानुमानितः। तथा न कोपि तत्रैव मानितश्च यदस्य
र॥८०॥ ते देवाश्च तथा सर्वे वदंतश्च तपोधनाः॥ गिरिराजस्तदा तत्र प्रार्थयां
मास तांस्तथा॥८१॥ ममाद्य सफलं जातं जीवितं धनमेव च॥ मेना चापि पुनस्त
त्र स्तुतिं चक्रे शुनातना॥८२॥ निंदां निवर्त्तयामास सर्वेषां प्रांजलिस्तदा ध
न्याहं नूतरू तारं यस्माच्च पुत्रिकाशुना॥८३॥ जातं मम कुलं धन्यं पावितं
त्वनया ध्रुवं॥ यदान पुत्रिका चेयं पूयं वा शिव एव वा॥८४॥ हूनस्ते रूषयोदि
व्या विष्णुश्चैव सनातनः॥ इयं वै पुत्रिका धन्या सर्वपापापनुत्तये॥८५॥ मदी
यं दुष्कृतं चक्षंतव्यं जगदीश्वराः॥ एवं संप्रार्थ्य तान्सर्वान्नमस्कृत्य
क्षमापयत॥८६॥ गिरिराजोपि तान्सर्वान्नमस्कृत्य तथावदत॥ ते ७२

देवाः पूजितास्तेन प्रसन्नाश्चेदमब्रुवन्॥८७॥ धन्योसि कृतकृत्योसि जीवितं
सफलीकृतं॥ येनैवं कन्यकादानं शिवायैव समर्पितं॥८८॥ इत्युक्त्वा च पुन
र्मेनामूचुस्ते विनयान्विताः॥ धन्यासि त्वं गिरिराजस्य पत्नी मेनेति विश्रुता
८९॥ यदुदरान्तसमुत्पन्नं शिवारत्नं शुभाननं॥ त्वदीयश्च तिरस्कारः सुख
रूपोनुमानितः॥९०॥ सौभाग्यं वर्द्धतां ते द्य गच्छामः सुखमस्तु ते॥ गिरिरा
जं तथैवात्र संप्राप्य देवतागणाः॥९१॥ दत्त्वा द्याशिषा तस्मै वंदितास्ते यथामु
दा॥ हिमवत्पुत्रिकां सर्वे वाद्यगानपरायणाः॥९२॥ अन्वगच्छंत ते तत्र गिरि
राजादयश्च ये॥ मेनाद्याश्चैव तत्सत्योगच्छंतिस्म शिवामनु॥९३॥ गंधमा
दनपर्यंतं गत्वानुज्ञामवाप्य च॥ सानुकाश्च परा जग्मुः स्वस्थानं ते गिरीश्च

शिव० र: ॥ ९४ ॥ तद्दिनं हि समारभ्य कृतार्था पर्वताईमे ॥ सुखं च परिवृद्धं च वशि
७३ तुं नैव शक्यते ॥ ९५ ॥ अच्युताद्याश्च ये देवा ऋषयो निर्मलाशयाः ॥ समाग
ताश्च ते तत्र वाद्यन्तस्य परायणाः ॥ ९६ ॥ समागत्य तु कैलाशं संस्थाप्य मंदि
रे शिवं ॥ पत्न्या युक्तं च संप्रार्थ्य दत्त्वानुज्ञाय सुश्चते ॥ ९७ ॥ मत्र्शं संतो विवाहं च
रूपं चैव शिवस्य च ॥ स्वपदं च तदा सर्वे य एते त्र समागताः ॥ दृष्ट्वा च शि
वयोर्योगं देवानां प्रीतिरुत्तमा वर्णितुं नैव शक्यं ते वर्षाणां च शतेन च ॥ ९९
एतच्चैव समाख्यातं यत्पृष्टोहं मुनीश्वराः ॥ विवाहस्य विधिः सम्यक् दे
वस्य परमात्मनः ॥ १०० ॥ यः एनं शृणुयान्नित्यं श्लोकं श्लोकार्द्धमेव वा ॥ त ७३
स्य वै विपुला लक्ष्मिर्जायते नात्र संशयः ॥ १०१ ॥ अज्ञानं नाशमायाति

वर्द्धते सुखसंपदः ॥ आरोग्यं जायते तस्य कन्यालाभो न वेदिहा ॥ १०२ ॥ इ
ति श्री शिवपुराणे सूतशौनकसंवादे पार्वतीविवाहवर्णनं नाम अ
ष्टादशोध्यायः ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सूत महाभाग किं जातं तु ततः प
रं ॥ तारकस्य वधश्चैव कथ्यतां तु त्वया नघ ॥ १ ॥ सूत उवाच ॥ ॥ श्रूयतां क
थयाम्यद्य कथां पापप्रणाशिनीं ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवा ध्रु
वं ॥ २ ॥ कैलाशमागत्य शिवां समेत्य शोणां प्रपेदे ति तरां शिवापि ॥ विचार
यामास च देवकृत्यं पीडां जनस्यापि स देवदेवः ॥ ३ ॥ विचार्य च कृतं तेन श्रू
यतां ऋषिसत्तमाः ॥ शिवोपि भगवान् साक्षात् कैलाशमगमद्यदा ॥
४ ॥ गणाश्च सर्वे तत्रासन् प्रमथा घोर महाबलाः ॥ वाद्यं च विविधं चक्रुर्हर्ष

निर्भरमानसाः॥ देवा अपि च ये तत्र गतास्ते हर्षमागताः॥ अतः परं शिवो
स्माकं कृपां चैव करिष्यति॥६॥ शिवश्च शिवया सार्द्धं नानारंगमथाकरोत्॥
देवाश्चापीडितास्तेन शिवः किं तु करिष्यति॥७॥ विलंबं क्रीयते तेन कथंचा
ग्निं समैरयन्। अग्निर्धृत्वा कपोतस्य रूपं तत्र जगाम ह॥८॥ गत्वा शिवसमी
पं च यदाग्निस्तं निरीक्ष्य तत्तावदग्निं शिवो दृष्ट्वा नोगादुपरतः स्वयं॥९॥
कस्त्वं कपटरूपोसि गृह्यतां शुक्रमेव मा॥ इत्युक्त्वाप्यग्नये तत्र वीर्यं दत्तं म
हात्मना॥१०॥ कपोतो वीर्यमादाय चंचुपुटगतं यदा॥ बहिर्गतो महावीर्यं
धर्त्तुमक्षम एव सः॥११॥ तद्वीर्यं चैव गंगायां प्रक्षिपद्दुःखपीडितः॥ गंग
यापि च तद्वीर्यं दुःसहं परमात्मनः॥१२॥ निःक्षिप्तं च शरस्तंबे तत्र स्तंबोवि

जायत॥ सुंदरं सुभगः श्रीमान् दर्शनात्सुखदायकः॥१३॥ एतस्मिन्नंत
रे तत्र राजकन्याः समागताः षट्संख्याकास्तु स्नानार्थं॥ ता निर्दृष्ट्वा च बाल
कः मदीयोयं मदीयोयं वदंत्यश्च परस्परं॥ स पाप षण्मुखानीह पीतस्तन्यं
स्वयं तदा॥१५॥ षाण्मातुर्त्तदा नाम प्रसिद्धं तु महात्मनः॥ पार्वतीनंदनो ना
म प्रथमं वान वत्तदा॥१६॥ अग्निभूश्च ततः पश्चात् ततः स्कंदो नवत्पुनः
गंगापुत्रस्ततो नाम शरजन्मा ततः परं॥१७॥ षाण्मातुरस्ततश्चैव नामानि
व कृधानवन्। ताः कन्यास्तु ततो गृह्य पुत्रं मलातु हर्षिताः॥१८॥ सर्वं चैवा
रहात्तज्ञात्वा शिवानुज्ञाम वाप्य च॥ ते देवाश्च ततो नीत्वा सेनां देवमयीं
तदा॥१९॥ स्कंदं च तत्सतिं कृत्वा ययुर्दैत्यास्ततश्च तैः॥ शोणितारख्यपुरं ग

शिव०
७५

त्वायुद्धं चक्रुः सुदारुणं ॥२०॥ दृष्ट्वा हे तु तदा जातं संमर्दं कष्टमुल्कटं ॥ ततो दै
त्याधिपश्चैव हतस्तेन महात्मना ॥२१॥ कियतश्च हतास्तत्र कियंतो वै पला
यिताः पातालं च गताः केचित्तु सर्वे ते च क्षयं गताः ॥२२॥ शोणिताख्ये पु
रे तत्र हत्वा दुष्टं सैन्यं चाननं तदा ॥ सर्वं निःकंटकं ह्यासीत् हते तस्मिन् दुरात्म
नि ॥२३॥ ते देवाः सुखमापन्नास्त्वं स्वं राज्यमकुर्वत आनंदं परमंगलानि
त्वा स्कंदं शिवायतनं ॥२४॥ आराध्य प्रणिपातं च स्तुतिं कृत्वा पुरःस्थिताः
अब्रुवन् पुनरेवात्र प्रफुल्लमुखपंकजाः ॥२५॥ देवा ऊचुः ॥ देवदेव
महादेव नक्वा नाम नयप्रद ॥ आवाहनं जानीमो गतिं नैव त्वनैव च ७५
अनंतक ॥२६॥ विश्वेश्वर परो देवयोसि सो सि नमोस्तु ते ॥ महादेवं
न

इति त्वां देवदेवं महेश्वरं ॥२७॥ नमो भवाय भव्याय भवनायोद्भवाय च ॥
अनंतबलवीर्याय भूतानां पतये नमः ॥२८॥ संहर्त्रे च पिशंगाय अव्ययाय
व्ययाय च ॥ गंगासलिलधाराय आधाराय गुणात्मने ॥२९॥ त्र्यंबकाय
त्रिनेत्राय त्रिशूलवरधारिणे ॥ कंदर्पाय हुताशाय नमोस्तु परमात्मने
॥३०॥ शंकराय वृषांकाय गणानां पतये नमः ॥ दंडहस्ताय कालाय पाश
हस्ताय वै नमः ॥३१॥ वेदमंत्रप्रधानाय शतजिह्वाय ते नमः ॥ भूतं भव्यं भ
विष्यं च स्थावरं जंगमं च यत् ॥३२॥ तव देहात् समुत्पन्नं देव सर्वमिदं
जगत् पासि हंसि च भद्रं ते प्रसीद भगवंस्ततः ॥३३॥ ऋषय ऊचुः ॥
नमो दिग्वाससे तुभ्यं विकृताय त्रिशूलिने ॥ विकटाय करालाय करा

शि०व०
७६

त्ववक्त्रायच ॥ ३६ ॥ निस्त्रंनीलशिखंडायश्रीकंठायनमोनमः । नीलकंठ
यदेवायचितामस्मांगधारिणे ॥ ३७ ॥ त्वंब्रह्मासर्वदेवानांरुद्राणांनीललोहि
तः । आत्माचसर्वभूतानांसांख्येपुरुषउच्यते । पर्वतानांमहामेरुर्नक्षत्राणां
चचंद्रमाः ॥ ३८ ॥ ऋषीणांचवसिष्ठस्त्वंदेवानांवासवस्तथा ॥ ॐकारःसर्ववे
दानांज्येष्ठंसामचसामसु ॥ ३९ ॥ आरण्यानांपशूनांचसिंहस्त्वंपरमेश्वर ॥
आपस्त्वंदुःखदग्धानांत्राताभवसुरेश्वर ॥ ४० ॥ त्वंचलोकहितार्थायभूता
निपरिषिंचसि । महेश्वरमहाभागशुभाशुभनिरीक्षक ॥ ४१ ॥ आज्ञापय
वयंनाथकर्त्तारोवचनंतव । सूर्यकोटिसहस्रेषुरूपकोटिशतेषु ॥ ४२ ॥ ७६
अंतंगंतुनशक्ताः । महादेवदेवनमोस्तुते ॥ इतिस्तुत्वातदादेवाःस्कंद

दत्तापुरःस्थिताः ॥ ४३ ॥ प्रसन्नोभगवान्रुद्रउवाचदेवसत्तमान् । यदाय
दास्त्वेदुःखंतदामांतुमुनीश्वराः ॥ ४४ ॥ देवाश्चसर्वएवैतेनजेतुंचममाज्ञ
या । इत्याज्ञप्तास्तदासर्वेशिवेनपरमात्मना ॥ ४५ ॥ कथयामिशृणुत्वंसम्यक्
त्वामात्विश्वासस्त्वकात् ॥ निहतेतारकेदैत्येतारपुत्रेसबांधवे ॥ ४६ ॥ स्कं
देनचाप्रयत्नेदेवाहर्षमुपागताः ॥ तस्यपुत्रास्तदासर्वेमहाबलपराक्र
माः ॥ ४७ ॥ तपउग्रंसमास्थायनियमेपरमेस्थिताः ॥ तपसाकर्षयामासु
र्देहान्स्वान्दानवोत्तमाः ॥ ४८ ॥ वर्षाणांशतकंचैवपदमेकंनिधायच
भूमौस्थितापरंतत्रतेपुस्तेबलवत्तराः ॥ ४९ ॥ तेसहस्रंतुवृक्षाणांवात
भक्षाःसुदारुणाः ॥ तपस्तेपुर्दुरात्मानःपरंतापमुपागताः ॥ ५० ॥ वर्षाणां

शिव०
७७

तु सहस्रं वै मस्तकेनास्थितास्तदा । वर्षाणां तु शतं नैव ऊर्ध्वबाहव आस्थि
ताः ॥५१॥ नैतदुःखं परं प्राप्ता दुराग्रहपरा इमे । तेषां पितामहः प्रीतो वर
दः प्रददौ वरं ॥५२॥ प्रसन्नोस्मि वरं ब्रूत दानवा बलदर्पिताः ॥ दानवा ऊचु
ः ॥ यदि प्रसन्नो देवेश यदि देयो वरस्त्वया ॥५३॥ अवध्यत्वं च सर्वेषां स
र्वभूतेषु सर्वदा ॥ ते सर्वे वरयामासुः सर्वलोकपितामहं ॥५४॥ तान
ब्रवीत्तदा देवो लोकानां प्रभुरव्ययः ॥ नास्ति सर्वामरत्वं हि निवर्तध्व
मतो सुराः ॥५५॥ अन्यं वरं वृणीध्वं वै यादृशं संप्ररोचते ॥ ततस्ते संहि
ता दैत्याः ॥ संप्रधार्य परस्परं ॥५६॥ ब्रह्माणमब्रुवन् दैत्याः प्रणिपत्य ७७
जगद्गुरुं ॥ वरं पुराणि त्रीण्येव समास्थाय महीमिमां ॥५७॥ वरिष्या

मो हि लोकेश त्वत्प्रसादाज्जगद्गुरो ॥ तथा वर्षसहस्रांते समेष्यामः प
रस्परं ॥५८॥ एकीभावं गमिष्यंति पुराण्येतानि चानघ यदा समानि चै
तानि यो हन्याद्भगवंस्तदा ॥५९॥ एकेनैवेषुणा देवः स नो मृत्युर्भविष्यति
एवमस्त्विति तान् देवः प्रत्यक्षं प्राविशद्दिवं ॥६०॥ आज्ञां दत्त्वा मयस्यापि कु
रु त्वं नगरत्रयं ॥ कांचनं राजतं चैव आयसं च त्रिधा कुरु ॥६१॥ इत्युक्त्वाव
तनो ब्रह्मा जगाम स्वयमेव च ॥ ततो मयश्च तपसा चक्रे धीरः पुराण्यथ ॥
६२॥ कांचनं दिवि तत्रासीदंतरिक्षे च राजतं ॥ आयसं चाभवद्भूमौ पुरं
तेषां महात्मनां ॥६३॥ एकैकं योजनायामं सुदृढं सुनगं पुनः ॥ कांचनं ता
रकाक्षस्य कमलाक्षस्य च राजतं ॥६४॥ विद्युन्मालेस्यायसं च त्रिविधं

दुर्गमुत्तमं ॥ मयश्चात्र बलवान् दैत्यदानवपूजितः ॥ ६५ ॥ दत्वा तेभ्यस्त्वयं
तत्र हितकामपरायणः ॥ पुरत्रयं प्रविश्यैव बभूवुस्ते बलाधिकाः ॥ ६६ ॥
कल्पकद्रुमसंकीर्णं गजवाजिसमाकुलं नानाप्रासादसंकीर्णं मणि
जालसमावृतं ॥ ६७ ॥ सूर्यमंडलसंकाशैर्विमानैर्विश्वतोमुखैः ॥ पद्मरा
गमयैश्चैव शशांकनिभैर्द्युमन्निभैः ॥ ६८ ॥ प्रासादैर्गोपुरैर्दिव्यैः कैलासशि
खरोपमैः ॥ दिव्यस्त्रीभिश्च संकीर्णं गंधर्वैः सिद्धचारणैः ॥ ६९ ॥ रुद्रालयै
र्प्रतिगृहं ह्यग्निहोत्रैर्द्विजोत्तमैः ॥ वापीकूपतडागैश्च दीर्घिकाभिः सुशो
भितं ॥ ७० ॥ मत्तमातंगयूथैश्च तुरंगैश्च सुशोभनैः ॥ रथैश्च विविधाकारैः
शिबिकाभिरलंकृतं ॥ ७१ ॥ सभाप्रपादिभिश्चैव क्रीडास्थानैः पृथक्पृथक्

वेदाध्ययनशालाभिर्विविधाभिः पृथक्पृथक् ॥ ७२ ॥ अदृष्टं मनसाप्यन्यैः
पुण्यवद्भिः प्रविश्यते ॥ पतिव्रताभिः सर्वत्र पावितं मुनिपुंगवाः ॥ ७३ ॥ दैत्ये
श्वरैर्महाभागैः सदारैः ससुतैर्द्विजैः श्रौतस्मार्तार्थधर्मज्ञैः स्वधर्मनि
रतैः सदा ॥ ७४ ॥ व्यूढोरस्कैर्वृषस्कंधैः सामयुद्धधरैः सदा प्रशांतैः कुपि
तैश्चैव कुब्जैर्वामनकैस्तदा ॥ ७५ ॥ नीलोत्पलदलप्रख्यैर्नीलकुंचितमूर्द्ध
जैः ॥ मयेन रक्षितैः सर्वैः शिक्षितैर्युद्धलालसैः ॥ ७६ ॥ अथ सस्मरर
तैश्चैतैः समंताद्धृजशिवपूजनया सुलब्धवीर्यैः ॥ रविमरुन्महेंद्र
संनिकाशैः सुरमथनैः सुदृढैः सुसेवितं तत् ॥ ७७ ॥ शास्त्रवेदपुरा
णानि ये च धर्माः सनातनाः ॥ तैस्तैरविरहितैश्च सेवितं तु सदाश्रितैः

शिव०
७९

७८॥ पृथिव्यां चैव ये धर्मास्ते धर्मास्तत्र नेत्ररः॥ तेषां च प्रनयाद्दृष्ट्वा देवासं
प्राद्स्तदा॥ ७९॥ दुःखितास्ते तदा सर्वे ब्रह्माणं शरणं ययुः॥ न तु ब्रह्माण
मागत्य सर्वे स्वं दुःखं न्यवेदयन्॥ ८०॥ ॥ इति श्रीशिवपुराणे त्रिपुरजयो
नामैकोनविंशोध्यायः॥ ॥ सूत उवाच॥ ॥ त्रिपुरस्य च तद्दुःखं श्रुत्वोवाच
पितामहः॥ मत्तो हि वर्द्धिता दैत्या वधं मत्तो न चार्हति॥ १॥ तथापि पुन्यं वर्त्ते
त नगरे त्रैपुरे पुनः॥ शिवं च प्रार्थयध्वं वै स वः कार्यं करिष्यति॥ २॥ तद्दु
कास्ते ययुस्तत्र यत्रासौ वृषभध्वजः॥ तत्र गत्वा च तद्दुःखं निवेद्यामं स्थि
ताः पुरः॥ ३॥ शिवोपि तद्वचः श्रुत्वा वचनं चेदमब्रवीत्॥ अयं देवत्रिपुराध्य ७९
क्षः पुन्यवान्वर्त्ततेधुना॥ ४॥ यत्र पुन्यं प्रवर्त्तेत न न हन्तव्यं बुधैः पुनः

तावत्स वै न हंस्यातव्यो यावत्पुन्यं विवर्द्धते॥ ५॥ तथापि विघ्नं वै देवा नि
वघकारणं॥ तिदं तदीयं तद्वचः श्रुत्वा देवा विष्णुं न्यवेदयन्॥ ६॥ ज्ञात्वा
वृत्तं च तेषां वै विष्णुर्वचनमब्रवीत्॥ इदं सत्यं वचश्चैव यत्र धर्मः सना
तनः॥ ७॥ तत्र दुःखं न जायेत सूर्ये दृष्टे यथा तमः॥ इत्येतद्वचनं श्रुत्वा दे
वा दुःखमुपागताः॥ ८॥ पुनरूचुस्तदा विष्णुं परिम्लानमुखांबुजाः॥ क
थं चैव प्रकर्त्तव्यं कथं स्यास्यामहे वयं॥ कथं धर्मा न विष्यंति त्रिपुरे जावि
तसंति॥ नो चेदकालिकी देवसंहृतिः क्रियतां ध्रुवं॥ १०॥ अथवा त्रिपुर
स्येह वधश्चैव विधीयतां॥ इत्युक्त्वा ते तदा देवा दुःखं कृत्वा पुनः पुनः॥
११॥ स्थिता नैव गतिं ते च चक्रुर्देववरा दिह तांश्च तथा विधान दृष्ट्वा वि

ष्णुर्विनयसंयुतः सोपि नारायणः श्रीमान् चिंतयामास चेतसा किंकार्यं
देवकार्यं पुनर्भगवानिति सुव्रतः। ततो यज्ञाः स्मृतास्तेन देवकार्यार्थमक्ष
याः ॥ यज्ञास्तं पुरुषं दिव्यं प्रणम्य तुष्टुवुस्तदा ॥ भगवानपि तान् दृष्ट्वा य
ज्ञान् प्राह सनातनान् ॥ सनातनस्तदा सेज्ञान् देवानां लोकपाच्युतः। अ
नेनोपसदा देवा यजध्वं परमेश्वरं ॥ पुरत्रयविनाशाय जगत्त्रयविभू
तये ॥ अच्युतस्य वचः श्रुत्वा देवदेवस्य धीमतः। सिंहनादं महत् कृत्वा य
ज्ञेशं संस्तुवन् सुराः। ततः संचिंत्य भगवान् स्वयमेव जनार्दनः ॥ पुनः
प्राहेति सर्वांस्तान् त्रिदशान् त्रिदशेश्वरः ॥ अपापा नैव हंतव्या पापा
यवन संशयः हंतव्याः सर्वयत्नेन कथं वध्याः सुरोत्तमाः ॥ उअमरा

दुर्महाः पापा अपि देवैर्महाबलैः। तस्मात्ते वध्या रुद्रस्य प्रभावात् परमेष्ठि
नः ॥ को वा ब्रह्माथवा दैत्या देवा वा रिपुसूदनाः। मुनयश्च महात्मानः प्र
सादेन विना प्रभोः। स एव सर्वदः शर्वः सर्वेषामपि शंकरः ॥ लीलया देव
देवश्च स वः कार्यं करिष्यति। तस्मांशंभुमेकं संपूज्य देवी देवत्वमागताः। ब्रह्मा
ब्रह्मत्वमापन्नो ह्यहं विष्णुत्वमेव च। तमपूज्य जगत्यस्मिन् कः पुमान्सि
द्धिमागतः ॥ तस्मात्तेनैव हंतव्या लिंगार्चनविधेर्बलात् ॥ रुद्रमिष्ट्वा यथा
न्यायं जेष्यामो देवसत्तमाः। एवमुक्त्वा हरं चेष्ट्वा यज्ञेनोपसदा प्रभुं ॥
मृन्मयं पार्थिवं कृत्वा लक्षसंख्याविधानकं गंधपुष्पाक्षतैश्चैव वि
ष्णुर्देवांस्तथापतत् ॥ उपातिष्ठन् ददृशुश्च भूतसंघाश्च सहस्रशः ॥

शिव· ८२ शूलशक्तिगदाहस्तान् ॥ दंष्ट्राचापशिलायुधान् नानाभरणोपेतान्
नानाविषधरांस्तथा ॥ कालाग्निरुद्रसंकाशान् कालसूर्योपमांस्तदा
प्राह देवो हरिं साक्षात् प्रणिपत्य स्थितान् सुरान् ॥ गच्छध्वा जित्वा च युक्ता
च गत्वा दैत्यपुरत्रयं पुनर्यथागतं तूर्णं तु मह्यं नृतये ॥ ततः प्रणम्य
देवेशं परमात्मानमीश्वरं ॥ तान् दृष्ट्वा चिंतयामास भगवान् पुरुषोत्त
मः ॥ किं कार्यमिति संतप्तः संतप्तान् सेंद्रकान् क्षणात् ॥ कथंच तेषां दै
त्यानां बलं हत्वा प्रयत्नतः ॥ देवकार्यं करिष्यामि प्रमादात् परमेष्ठिनः ॥
नाशो निवारितो नास्ति धर्मिष्ठानां न संशयः ॥ दैत्याश्चैते हि धर्मिष्ठाः ८२
सर्वे त्रिपुरवासिनः ॥ तस्माद्देवधर्मं नाशानान्यथा सुरपुंगवाः कृत्वा

समो

पि सुमहत्पापं रुद्रमभ्यर्चयंति ये ॥ मुच्यंते पातकैः सर्वैः पद्मपत्रमि
वांभसा ॥ पूजया भोगसंपन्नि रवद्यं जायते भुवि ॥ तस्मात्ते योगिनो दै
त्या लिंगार्चनपरायणाः ॥ ततः कृत्वा धर्मविघ्नं क्षणाद्देवात्ममायया
दैत्यान् देवकार्यार्थं हनिष्ये त्रिपुरं क्षणात् ॥ विचार्यैवं ततस्तेषां भ
गवान् पुरुषोत्तमः ॥ कर्तुं व्यवसितः पश्चात् धर्मविघ्नं सुरारिणां ॥
यावत्त्रवेदधर्मास्तु यावच्छंकरार्चनं ॥ यावच्च शुचिकृत्यादि स्ताव
न्नाशो न विद्यते ॥ तस्माद्देवप्रकर्तव्यं वेदधर्मास्थितो व्रजेत् ॥ इति निश्चि
त्य तेत विष्णुर्विघ्नार्थमकरोत्तदा ॥ दत्वा देवान् स्वयं तत्र आज्ञांमताग
ताहरे ॥ ततश्चैवाकरोत् विष्णुर्देवार्थे हितमुत्तमं ॥ तद्देवश्चयतामस

शिव.
८२

म्यकृसर्वपापप्रणाशनं॥ ॥इतिश्रीशिवपुराणेत्रिपुरवर्णनोना
मविंशोध्यायः॥ ॥सूतउवाच॥ ॥असृजच्चमहातेजाःपुरुषंस्वात्म
संभवं॥मायीमायामयंतेषांधर्मविघ्नार्थमच्युतः॥१॥मुंडंमलिनवस्त्र
चगुंफिमात्रसमन्वितं।दधानंपुंजिकांहस्तेचालयंतंपदेपदे॥२॥वस्त्र
युक्तंतथाहस्तंक्षिप्यमाणंमुखेसदाधर्मेतिव्याहरंतंतंनमस्कृत्य
स्थितंहरेः॥३॥उवाचवचनंतत्रहरयेप्रांजलिस्तदा॥अरिहन्नमच्युता
पूज्यकिंकरोमितदादिशं॥४॥इत्येवंभगवान्श्रुत्वावचनंचेदमब्रवी
त्॥यदर्थंनिर्मितोसित्वंनिबोधकथयामितत्॥५॥ममांगात्वंसमुत्प ८२
न्नोमत्कार्यंकर्तुमर्हसिमदीयस्त्वंसदापूज्योभविष्यतिनसंश

यः॥६॥मायिनंमायामयंशास्त्रंग्रंथंषोडशसहस्रकं।श्रौतस्मार्त्त
विरुद्धंचवर्णाश्रमविवर्जितं॥७॥एतत्वाशास्त्रंतयाग्राह्यंविस्तारंतजमिष्य
ति॥८॥ददामितवसामर्थ्यंनिर्माणेचभविष्यति॥९॥मायाचविविधास्ततो
वश्यावश्यपकरीध्रुवा॥रोधनारोधनंचैवभवतसंभविष्यति॥१०॥इ
ष्टानिष्टप्रदश्चंपंचनाने----कल्पना॥विचित्रंचेवयकृत्संततेस
र्वंभविष्यति॥११॥तच्छ्रुत्वावचनंतस्यहरेश्चपरमात्मनः॥नमस्कृत्यसखि
तंसूत्रकर्त्तव्यमादिशाधुना॥१२॥इत्युक्तोपाठयामासशास्त्रंमाया
मयंतदा॥तच्छास्त्रमुपदिश्यथवैपुरुषायाच्युतःस्वयं॥१३॥तमुवाच
पुनस्तत्रमोहनीयाश्रमेत्वया॥एतेदैत्यास्त्वयासर्वेपावनीयामहा

शिव०
८३

११२४ महीयोसवर्कं कश्चित नंतशुन तरस्तदा मदाज्ञायाः परंनान्यद्रक्षा
मात्रं चलेदिह ॥ १६ ॥ इति विचार्य सा देवी क[illegible]र्जलसंभवं । पंकमुत्राय
तेनैव निर्ममे पुत्रकं शुभं ॥ १७ ॥ सर्वावयवनिर्दोषं सर्वावयवसुंदरं प्रतिष्ठाप्य
तदा द्वारि निवार्यायि ह्यागमे नत ॥ १८ ॥ वस्त्राणि च तदा तस्मै दत्वा च विविधानि
च नानालंकारणं तस्मै दत्वाशिषमनुत्तमं ॥ १९ ॥ मत्सुतस्त्वं मदीयोसि ना
न्यथा कश्चिदस्ति मे । तथा ह्येवं कृते मातृदेवनमस्कृत्य शिवास्थित ॥ २० ॥ किं
कार्यं विद्यते ते घ करवामि तवादितं । इत्युक्ता माता तदा तेन तन्नारपालयन्वाघ २३ १२४
म ॥ २१ ॥ उक्त[illegible]पयामास यष्टिपाणिं गणाधिपं तद्रूपं सुंदरं तस्यवि

नै३ स्या।

लोक्य हर्षमागता ॥ २२ ॥ मुखमास्युंव्य सा तत्र ह्यालिंग्य स्नापयत्तदा स्थितो
द्वारि सदा तत्र पार्वती हितकाम्यया ॥ २३ ॥ स्वयं च मज्जनार्थं सा स्थिता न्वस
खी संयुता एतस्मिन्नेव काले तु शिवो द्वारि समागत ॥ २४ ॥ गणैः सार्द्ध समा
यातो द्वारि व प्रविशन्यदा । तदा निषिध्यस्तेनैव गम्यते च तया धुना ॥ २
५ ॥ मज्जनार्थं स्थिता माता क्व यासि माव्रजाधुना ॥ इत्युक्ता यष्टिकां तत्र
रोधनाय परामृात ॥ २६ ॥ तं दृष्ट्वा च शिवं प्राह शिवोहमिति नान्यथा ॥ इत्यु
क्ता गम्यमानं तं यष्ट्या वैवाप्य ताडयत ॥ २७ ॥ ते[illegible]कः शिवः कुत्रवासि त्वं
म किमर्थं गम्यते त्वया शिवोवाच । मूर्खोसि त्वं न जानासि शिवोहं गिरिजा
पतिः ॥ स्व ॥ इत्युक्त्वा प्रविशंतं तं नंदं डेना ताडयत्सुनः ततः शिवश्च संक्रोधाग

शिव
१२५

णानाज्ञापयन्नदा ॥२९॥ कोवायंवर्त्ततेकिंविक्रियतेपक्षतां पुनः ॥ इत्यु
क्त्वा तु शिवस्तत्रस्थितंक्रोधसमन्वित ॥३०॥ गणास्तेक्रोधमापन्नाः पप्र
च्छुर्द्वारपालकं ॥ कोसित्वंकुतआयातः किंवात्वंतु चिकिर्षसि ॥३१॥ तदीयं
तद्वचः श्रुत्वाद्वारपालोब्रवीदिदं ॥ यूयंकेकुतआयाताः नवंतः सुदृशाद्
मे ॥३२॥ यातदूरंकिमर्थंविस्थिताघत्रविरोधिनः ॥ एवंश्रुत्वावचस्तस्य
हास्यंकृत्वापरस्परं ॥३३॥ कथ्यायंवर्त्ततेकिंचब्रवीतिशत्रुवत्पुनः ॥
तमुत्सृज्यसदासर्वेश्रूयतांद्वारपालक ॥३४॥ वयंशिवगणाःसर्वेशिवा
ज्ञापालकाःसदा त्वांचैवतुगणंमत्वानहन्मोन्यथाहनः ॥३५॥ तिष्ठ १२५
दूरेघतस्त्वंचकिमर्थंमृत्युमीहसे ॥ इत्युक्तोपिगणेशश्च द्वारंनमुक्त

वान्तदा ॥३६॥ तेसर्वेपिगणास्तत्रशिवंगत्वातयाकथन् ॥ ततश्चैववचः
श्रुत्वागणानुचेयशंकरः ॥३७॥ दूरनःक्रीयतांद्येयः षंढाइवास्थितौक
थं ॥ स्वामिनोक्तागणास्तेवपुनरागत्यतत्रह ॥३८॥ रेरेद्वारेकथंकोयंस्थित
स्त्वस्थापितःकुतः ॥ अस्मानवगणान्यैवंकथंजिवितुमिच्छसि ॥३९॥ द्वार
पालवयंसर्वेस्थिताःकिंपरिनाशसे ॥ सिंहासनंगृहीत्वातुश्रृंगालःशिव
मीहते ॥४०॥ तावदुर्जीस्मिसृर्वतत्यावद्गणापराक्रमः ॥ नानुनूतस्त्वयाद्य
त्वद्यनम्भूत्वामरिष्यसि ॥४१॥ इत्युक्तः क्रोधमापन्नोहस्तामस्यांयष्टिकांत
दा ॥ गृहीत्वाताडयामासगणांस्तानुपरिचारिणः ॥४२॥ यातयातद्यतो
दूरेनोचेद्धदर्शयामिहः ॥ गणऊचुः ॥ किंकर्त्तव्यंक्रं…गंतेत्वंक्रीयतेनेन

किंपुनः॥४३॥मयीद्वारक्ष्यतेस्माभिरन्यथाकिंब्रवीतिच॥ततस्तेचगणाः
सर्वेशिवंहरेव्यवस्थितं॥४४॥कोत्रामात्रंतुकैलाशातगतातेचतथाब्रुवन्
गत्वातेचु शिवोविहस्यतान्सर्वान्गणाः किंनुनश्शूकरा॥४५॥एको
पिबहून्सर्वान्निःसर्सतिकिंपुनर्वदत॥गम्यतांताड्यतांवैघःयःकश्च
ननवेद्मिस॥४६॥नर्स्मितास्तेनदेवेनगतास्तेगणासत्रमाः॥गणाऊचुः॥रे
त्वंकस्यतांबालबालवत्परिभाषसि॥४७॥इतस्त्वंहरतोयाहिनोचेत्तं
पश्यसेधुनाइतिश्रुत्वावचस्तेषां॥किंकरोमितिदुःखितः॥४८॥एत
स्मिन्नंतरेदेवी॥तेषांतस्यचवैपुनः॥श्रुत्वातुकलकलंतत्रसखीपश्यप्रब्रवीत
दा॥४९॥समागत्यसखीतत्र॥वृत्तांतंपश्यतिसदाक्षणमात्रेणदारुह्णाः

र्पितासागतातदा॥५०॥तत्रगत्वातुतत्सर्वंकथितंगिरिजाग्रतः॥अस्मदी
यात्रवेत्रैवसर्वेद्यायांतिवैध्रुवं॥५१॥शिवश्चैवगणाःसर्वेविनावाचास्म:
कथंप्रविशंतिहहादेवनैतच्छुभतरंतव॥५२॥सम्यक्कृतंद्यनेनैवकेपि
प्रविशंतानहि॥दुःखंचैवानुरूपात्रतिरस्कारादिकंतथा॥५३॥अतःप
रंतुवाग्वादःक्रियतेचपरस्परंवाग्वादश्चकृतोनैवतद्यायातुसुखेननै
५४॥कृतेनैवात्रवाग्वादंजितावितयेनच॥प्रविशंतुतदासर्वेनान्यथाक
र्हिचित्सीये॥५५॥अयंचैवास्मदीयैर्विनर्स्मितेनर्स्मितावयं॥तस्माद्देवीत
यानदेनमाज्योमानउत्तम॥५६॥शिवोमर्कटवत्तेषुवर्ततेकिंकरिष्यति
तदीयंतरुद्वःश्रुत्वाःपार्वतीमानिनीतदा॥५७॥अहोक्षणंस्थितंनैवह

कात्कारः कथंकृतः कथं चैवात्र कर्त्तव्यो विनेयनायवा पुनः॥५८॥नवि
ष्यति नवते कृतं नैवोन्यथया पुनः॥इत्युक्त्वा तु सखीतत्र शोषितप्रिययातत
दा॥५९॥समागत्याब्रवीत्तावप्रिययाकथितं शृणु सम्यकृतं त्वयान दबला
त्प्रार्थितान हि॥६०॥नव दृष्ठेगणा एते जयंतिकिं नवान् पुनः॥कृतं चैवो
कृतं चैव कर्त्तव्यं क्रीयतां त्वया॥६१॥जिलायां तु पुनर्वा पिविनयैरथ
वाधवं॥इतिश्रुत्वा व वस्तस्य मातुश्चैव गणास्तया॥६२॥वद कतुस्तयोर्ली
धं वध्वाजे घोरूनादयन्॥उवाचगणान् सर्वानुक्ष्यतां गणा सतमाः॥६
३॥अहं च गिरिजा सत्तुः स्वयं शिवगणास्तथा॥उत्तये समतां प्रताः कर्त्त
व्यो क्रियतां पुनः॥६४॥नवं तेद्वारद्वारपालाश्च अहं चैव कथं न हि नवन्नि

श्चास्थितं ह्यत्र यदाम्नवतिनिश्चितं॥६५॥तदा न वह्निः कर्त्तव्यं शिवाज्ञापरि
पालनं॥इदानीं तु मया चाद्य शिवाज्ञापरिपालनं॥६६॥हगवाविनयेना
पि गेतव्यं मंदिरे पुनः॥इत्युक्त्वाश्च गणाः सर्वे ययुस्तत्र शिवसन्निधौ॥६
७॥जितं तत्र जितं ते तु नमस्कृत्य पुरः स्थिताः॥स्थित्वा निवेदितं सर्वं शिवा
ग्रे गणसत्तमैः॥६८॥तत्सर्वं तु तदा श्रुत्वा शंकरो वाक्यमब्रवीत् श्रूयतां च
गणाः सर्वे युधं योग्यं न वेन्न हि॥६९॥अहं चैवात्र स्वयं वै तत्र गौरीगण
स्तथा॥विनयः श्रियते चैवं वशो वै शंकस्त्रियाः॥७०॥कृतं चैवात्र कर्त्तव्य
मेकाकी किं करिष्यति नवंतश्च गणालोके युद्धे चैव विशारदाः॥७१॥म
दीयाश्च कथं युद्धं हित्वा यास्यथ लाघवं स्त्रियाग्रह कथं कार्यः कृताफ

शिव०
१२८
लमवाप्स्यति ॥ ४२ ॥ कर्तव्यं सर्वथा युद्धं यद्भावि तद्भवतीति ॥ ॥ इति श्री
शिवपुराणे गणपयुद्धो नाम द्वात्रिंशोध्यायः ॥ ॥ सूत उवाच ॥ ॥ इत्यु
क्तास्ते गणास्तेन निश्चयं परमं गताः ॥ सन्नद्धास्ते तदा तत्र जग्मुश्च शिवमं
शो दिरं ॥ १ ॥ गणोपि च तथा दृष्ट्वा ह्यायातान् गणदेवताः ॥ युद्धाटोपं विधायेव
स्थितश्चैवाब्रवीदिदं ॥ २ ॥ आयांतु गणपाः सर्वे शिवाज्ञापरिपालकाः ॥
अहमेकश्च बालश्च शिवाज्ञापरिपालकः ॥ ३ ॥ तथापि पश्यतां देवाः पार्व
तीसूनुजं बलं शिवस्यैव गणानां तु बलं पश्यंतु वै पुनः ॥ ४ ॥ बलवद्बालयु
द्धं च मानिनी शिवपक्षयोः भवद्भिश्च कृतं पूर्वं युद्धं विशारदैः ॥ ५ ॥ मया पूर्वं क्व १२८
तं नैव बालोस्मि क्रियतेद्युना नयापि भवतां लज्जा भविष्यति जयाज्ञये
चैव

ध ॥ मम मैवं तु भवेन्नैव वैपरीत्यं भविष्यति । ममैवं भवतां नैवं गिरिजाशि
वयोरिह ॥ ७ ॥ एवं ज्ञात्वा च कर्तव्यं युद्धं चैव गणेश्वराः ॥ भवद्भिः स्वामिनं दृ
ष्ट्वा मया च मातरं पुनः ॥ ८ ॥ क्रियते कीदृशं युद्धं भवितव्यं भवत्विति ॥ इत्ये
वं भर्त्सितास्तेन दंडघं दृढवाहय ॥ ९ ॥ विविधान्यायुधान्येवं धृत्वा वै ते
समन्वयुः ॥ घर्षयंतस्तथा दंतान् हुंकृत्य च पुनः पुनः ॥ १० ॥ पश्य पश्ये
त्युवंतश्च गणास्ते समुपागताः ॥ नंदी प्रथममागत्य धृत्वा पादं व्यकर्षय
त् ॥ ११ ॥ धावन् भृंगी द्वितीयं च पादं धृत्वा तथैव च ॥ यावत्पादं व्यकर्षतां ता
वद्धस्तेन वै गणः ॥ १२ ॥ आहत्य हस्तयोस्ताभ्यां मुक्त्वा च पादकौ स्वयं द्वार
स्थं परिघं गृह्य सर्वानापोथयन्नदा ॥ १३ ॥ केषांचित्तु करयोः भिन्नाः के

शिव· १२९

षांचित्स्पृष्टकानि वा केषांचिच्च शिरांस्येव केषांचित् मस्तकानि वा १४
केषांचित्तत्र जानुनि केषांचित्स्कंधकास्तथा सन्मुखं स्वगता ये ते सर्वे ते
हृदये हता: १५ केचिच्च पतिता भूमौ केचिच्च विदिशो गता: केचिच्च चरणा
न्त्वा केचिच्छिवांतिकं गता: १६ तेषां मध्ये तु कश्चिद्वै संग्रामे सन्मुखो
न हि । सिंहं दृष्ट्वा यथा यांति मृगाश्चैव दिशो दश ॥ १७ ॥ तथा ते च गणा:
सर्वे गताश्चैव सहस्रश: ॥ पराङ्मुखस्तथा सोपि वैरिवत्समुपस्थित: ॥ १८
कल्पांतकरणे कालो दृश्यते च तथाहि स: । एतस्मिन्नंतरे तत्र ब्रह्माद्यै
श्च देवता: ॥ १९ ॥ प्रेरिता नारदेनेह देवा: सर्वे समागमन् ॥ विष्णुश्चापि
समायात: शिवस्य हितकाम्यया ॥ २० ॥ समागतास्तदा सर्वे समाश्वास्य १२९

पुर: स्थिता ॥ ऋषयश्च तदा सर्वे अप्सरःसां गणास्तथा । २१ । शिवं वै
व नमस्कृत्य आज्ञां देहि प्रभो इति गणान्जितान् तदा दृष्ट्वा तेभ्य: सर्वं
निवेदितं ॥ २२ ॥ तेभ्य: सर्वं निवेद्यैव ब्रह्माणं समुवाच ह ॥ ब्रह्मंस्त्वयैव गं
तव्यं प्रसादोयं महाबल: ॥ २३ ॥ यथा न प्रलय: स्याद्वै तथा कार्यं त्वया
प्रभो इत्युक्त: स ययौ ब्रह्मा नंदिन: ग्रामसंकुलश्चैव सर्वै: ऋषिगणै: स
ह ॥ २४ ॥ समायांतं च तं दृष्ट्वा गणा रुद्रमस्कारपवाकिरत् ब्रह्मंतां क्षम्यतां
द्वंद्वयुद्धार्थं समागता: ॥ २५ ॥ इत्येवं ब्रुवति तस्मिन् तावत्परिघमाद
द्वे गृहीत्वे परिघं दृष्ट्वा पलायनपरास्तदा ॥ २६ ॥ यावत्यातक्रुवंतस्तेप
रिघेणाहतास्तदा स्वयं च पतिता: केचित्केचित्तेन निपातिता: ॥ २७ ॥

शिव० १३० केचिच्छिवसामीप्यं ॥ गतास्तत्क्षणमात्रतः ॥ तथाविधाश्च तां दृष्ट्वा शि-
वं कोपसमन्वितः ॥ २८ ॥ इंद्रादिकान् देवगणान् षण्मुखप्रवरान् गणा-
न् ॥ नूतने तपिद्राचांश्च सर्वाना देव्यायत्तदा ॥ २९ ॥ ते सर्वे च यथा ते पंग
नास्ते सर्वतो दिक्षु यस्य यस्यायुधं यच्च तत्तत्सर्वं विमोचितं ॥ ३० ॥ हयि
वा आकुला जाता संशयं परमं गता ॥ न जाते ब्राह्मणो ह्यायुर्ब्रह्मांडं स
हरन्ति च ॥ ३१ ॥ अकाले च तया नूनं शिवश्चेच्छावशः स्वयं ॥ ते सर्वे च गता
स्तत्र षण्मुखाद्याश्च ये पुनः ॥ ३२ ॥ सर्वे व्यर्थायुधा जाता आश्चर्यं पर
मं गता ॥ शक्तिद्वयं तया तत्र निर्मितं गणहेतवे ॥ ३३ ॥ एका प्रचंडरूपं च राम०
धृत्वातिष्ठन्महामुखी ॥ श्यामपर्वतसंकाशं विस्तार्य मुखगह्वरं ॥ ३४ १३०

एका विद्युल्लरूपा च वज्रहस्ता पुता सती ॥ आयुधानि च सर्वाणि सर्वे-
ष्वमोचितानि वै ॥ ३५ ॥ गृहीत्वा तन्मुखे सा च निक्षिप्य सकलानि वै ॥ दिवा
युद्धं न दृश्येत परिघः परिघः पुनः ॥ ३६ ॥ एकापि सकलं सैन्यं लोडयामा
स दुस्तरं ॥ यथा गिरिवरेणैव लोडितः सागरः पुरा ॥ ३७ ॥ एकेन निहिताः
सर्वे व्याकुला ह्यभवंस्तदा ॥ किं कर्त्तव्यं क्व गंतव्यं न ज्ञायंते हि ज्ञो दृशा ॥ ३८
परिघं भ्रामयामास सव्यापसव्यमेव च ॥ रंभा च मेनका चैव उर्वशी च ति-
लोत्तमा ॥ ३९ ॥ इत्याद्यप्सरसां श्रेष्ठाः पुष्पचंदनपाणयः ॥ ऋषयो नारदा-
द्याश्च ये च युद्धेतिलालसाः ॥ ४० ॥ सर्वे ते च समाजग्मुर्युद्धस्य दर्शनाय
वै ॥ तेपि विस्मयमापन्ना ह्यदृष्टं न कदापि हि ॥ ४१ ॥ गणरूपं तदा दृ-

कालो यमपरः कृतस्तु पृथिवी कंपिता देवी समुद्रसहि तावदा ॥४२॥ पर्व
ताः प्रतिमा देवबकुः संग्रामसंभवं ॥ घोषश्च समयदाश्शीर्णाः सर्वे व्याकुलतां
गता ॥४३॥ देवाः पलायिताः सर्वे गणाश्चैव पलायिताः षण्मुखश्च तदा
सर्वनाशाय पुरतः स्थितः ॥४४॥ शक्तिं दधेत मध्युद्धं सर्वं च निष्फलीकृ
तं ॥ येव स्थितास्त्वत्र ते सर्वे शिवस्यांतिकमागता ॥४५॥ ते समवेमिलिताश्चैव
नमस्कृत्य शिवं तदा ॥ अब्रुवन्नु वचनं सर्वे कोयं गणेश्वरः प्रभुः ॥४६॥ पु
रा चैव शक्रतं युद्धमिदानीं विरुद्धधावन ॥ रूपतेनेश्क्रतं दृष्टमीदृशं न
कदाचन ॥ किं विविधिं वार्यतां देवयघन्यथा प्रलयो भवेत् ॥ स्कंदैर्ववचनं श्रु
त्वा शिवं प्रमकोपनः ॥४७॥ कोपं जगाम तत्रैव गम्य तो चमयाग्नसह

देवसैन्यं च तत्सर्वं शिवस्यानुजगाम ह ॥४८॥ एतस्मिन्नंतरे देवं नमस्कृत्य सं
च घनारदः ॥ अयं जीवितश्चेत्स्मात् प्रलयं च करिष्यति ॥४९॥ यथा तथाप्ययं
देव हंतव्यः सर्वथा त्वया ॥ इत्युक्त्वा नारदस्तत्र ह्यंतर्धानं गतस्तदा ॥५०॥
शिवोपि सह सैन्येन युद्धं चक्रे यदा रुणां महादेवोपि तं दृष्ट्वा विस्मयं प
रं गतः ॥५१॥ छलेनैव वध्यं तद्योनान्यथा हन्यते पुनः ॥ इति बुद्धिं समास्था
य सैन्यमध्ये व्यवस्थितः ॥५२॥ शिवे दृष्टे तदा देवे निर्गुणो गुणरूपिणं
विष्णौ चैवायसंग्रामे आगते सर्वदेवता ॥५३॥ गणाश्चैव तथा तथाहं
जग्मुश्चैव परस्परं ॥ व्यमंत्रयामास विष्णुं सर्वं सुरात्रवहं ॥५४॥ अहं च
मोहयिष्यामि हन्यतां वत्सयाग्रतो ॥ छलं विना न हन्यादेत्ता मम सौयं ध्रुवं
सदः ॥५५॥ इति श्रुत्वा मनं तत्र विष्णुर्मोहपरायणं ॥ शक्तिं दधे यं तदा लीनं

हरिं दृष्ट्वा तथाविधं ॥५७॥ एकतश्च मुखं दृष्ट्वा शिवोपि चजगाम ह। त्रिशू
लं च समादाय गतः कोपसमन्वितः ५८ त्रिशूलं पतितं हस्तात्पिनाकेपु
नरादृढं। अहो दुःखतरं नूनं गणानां किंपुनर्नवेत ५९ परिघादिताश्च
ते देवाः गताश्चैव दिशोदश। विष्णुस्तं च गणं दृष्ट्वा धन्योयामिति चाब्रवीत्
६० बहवो देवताश्चैव मया दृष्टास्तथा पुनः दैत्याश्च बहवश्चैव यक्ष्यगं
धर्वराक्षसाः ६१ नैतेन सम तां यांति रूपशौर्यगुणादिभिः। एवं विष्णु
श्चुवंतं सः परिघं भ्रामयंस्तदा ६२ चिक्षेप विष्णवे तत्र चक्रे चूर्णं तरस्त
दा। यहीतुमुद्यतश्चक्रं युयुधाते परस्परं ६३ खंडं तु परिघस्यापि हर १३२
ये प्राक्षिपद्यदा। गरुडेनापि पक्षिणा विफलीकृतः ६४ य

त्र यत्र क्षिपेत्तं वै परिघं तत्र तत्र। शून्यं च कृतवान् सोवै विजयं चापसत्त
मः ६५ विष्णुश्चैव गणाश्चैव युयुधाते परस्परं। एतदंतरमासाद्य शूलपा
णिस्तथोत्तरे ६६ आगत्य च त्रिशूलेन तच्छिरो निरकृंतत। छिन्नेशिरसि
तस्यैवं देवसैन्यं सुनिश्चलं ६७ नारदोपि तदागत्य देव्यै सर्वं निवेदितं
मातर्निष्कृयतां मानः स्वास्योनैव त्वयाधुना ६८ इत्युत्क्रांतं दधे तत्र ना
रदः कलहप्रियः। जयजयेति नापं तां देवाः सुखमुपस्थिताः ६९ यत्रा धे
कारतदा देवी स्वकृयतामृषिसत्तमाः। इति श्रीशिवश्रीशिवपुराणे गणापु
त्रं गोनामाध्यायः ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ श्रूयतां कथयामद्य यज्ञा
नंतदनंतरं कोपयुक्तायथा देवी चकार स्म यतां तथा ॥ १ ॥ मदंगपदृशाश्च

शिव· १३३

श्चैव गणांनं चाप्सरसः । स्तदा शिवो पि नाद्रिरक्षितायावदुःखमुपाददे ॥२॥ ताव
द्वागिरिजादेवी क्रोध्यमानाच हाथ कं किं करोमि क्व गच्छामि प्रलयं वा करो
म्यहं ॥३॥ इत्येवं दुःखिता सा वै ग्राकाः सहस्त्र ग्रस्तदा । निर्मिमे निर्मितास्ता
श्च नमस्कृत्य शिवां तदा ॥४॥ नाज्वल्यमाना स्तास्सर्वा मातरा दिव्यता इति
प्रलयश्चात्र कर्त्तव्यो नात्र कार्या विचारणा ॥५॥ देवांश्चैव गणांश्चैव यक्षरा
क्षसकान्यपि । नास्मदीयः परश्चैव विद्यते नम मापि हि ॥६॥ तदाज्ञसाश्च ताः
सर्वाः संहारं कर्तुमुद्यताः । कल्पांतकाले संप्राप्ते संहारणार्थमुद्यताः ॥७॥
यथा चात्र गणानां हृद्यपि संहरते तदा । एवं ताः शक्तयः सर्वाः संहारं क १३३
र्तुमुद्यताः ॥८॥ नगणायंति देववाक्यं प्राणवाध्यं शंकरं । इंद्रं वायद्यपराजं

वस्कंदं वा सूर्यमेव च ॥९॥ सर्वास्ताश्चैव संहारं कुर्वंति स्म निरंतरं । यत्र य
त्र च पतेत्तत्र तत्रापि शक्तयः ॥१०॥ करालाः कुब्जकाः खंजा लंबशीर्षा
घनेऽकृशाः । हस्तेधृत्वा च देवांश्च मुखे चैवाक्षिपंस्तदा ॥११॥ तं संहारं तदा दृ
ष्ट्वा हरो हरिस्तथैव च ॥ ब्रह्मा च ऋषयश्चान्ये देवाइंद्रादयस्तथा ॥१२॥ किं करि
ष्यति सा देवी संहारं वाप्य कालतः सर्वे संशयमापन्ना जीवनाशादृताइन
१३॥ सर्वे च मिलिता देवे किं कर्त्तव्यं विचिंत्य तां इति विचार्य ते सर्वे ऊचुस्ते
च परस्परं ॥१४॥ यदि वा गिरिजा देवी प्रसन्ना च न वेदिद्य । तदा चैव न न वक्ता
स्वं नान्यथा न भवति ध्रुवं ॥१५॥ शिवो पि दुःखमन्नः कठिनेग्रायदा तदा
शिवा क्रोधमयी साक्षात्तं गंतुं न पुरउत्कंठहेतु ॥१६॥ स्त्रीयो वा परकीया

म।

शिव०
१३४

वा॥यक्षोवाकिंनस्त्वया।देवोवाचतयाविष्णुर्ब्रह्मावारुद्रस्त्वया॥१७
नकश्चितगिरिजायेतु॥स्यात्तुंशक्ताश्चकेचनः जाज्वल्यमानंतत्तेजोदृष्ट्वा
दूरतरंस्थिता॥१८॥एतस्मिन्समयेतत्रनारदोदेवदर्शनेः॥आजगामतदा
तत्रदेवानांसुखदेहतवे॥१९॥ब्रह्माणंचतयाविष्णुंशंकरमन्तेतीन्गणान्
समागत्यमिलित्वातुविचार्यकार्यमेवचा॥२०॥यावच्चगिरिजालोकेरूपां
नैवकरिष्यतितावन्नैवसुखंस्यादेनात्रकार्याविचारणा॥२१॥ऋषयो
नारदाद्याश्चगतास्तेशिवमंदिरं॥तदाप्रसादयामासुर्मातरंजगतः
प्रभुं॥२२॥नमस्कृत्यतयाकृत्वास्तोत्रैर्नानाविधैरपि॥जगदेवनमस्तु १३४
भ्यंप्रकृत्यैतेनमोस्तुवै॥२३॥अपर्णायैनमस्तुभ्यंगिरिजायैनमोस्तुते

भवान्यैतेनमश्चैवदुर्गायैतेनमोस्तुच॥२४॥भद्रायैतेनमस्तुभ्यंशिवा
यैतेनमोस्तुवैचंडिकायैनमस्तुभ्यंकल्याण्यैतेनमोस्तुते।२५।एवंस्तुता
तदादेवीऋषिभिर्नारदादिभिः॥उवाचदूतदातांचनोवाचकिंचदेविका
२६॥तदाचऋषयःसर्वेनत्वातच्चरणांबुजं॥क्षम्यतांक्षम्यतांदेविसंहा
रोजायतेधुना॥२७॥तवस्वामीवयंकेचइमेदेवास्तवैवहि।प्रजाश्चभवदीया
श्चक्षन्तव्यंपरमेश्वरि॥२८॥एवंकृतावचस्तेषांप्रसन्नाचंडिकातदा।मस्तु
श्चायदिजीवेततदामंहरणंनहि॥२९॥यथाचभवतांमध्येकृत्योयंसेतवि
ष्यति॥सर्वाध्यक्षोत्रवेदेयनान्यथासुखमाप्स्यथ॥३०॥इत्युक्तास्तेतदा
तेभ्योगत्वासर्वंनिवेदयन॥तेसर्वेचतयाश्रुत्वाशिवश्चायंतयापुनः॥३१

कर्त्तव्यंचतथासर्वलोकस्यास्यनवेदिह ॥ एतच्छिरःकृतोयालममस्मरोसि
श्चतद्धृतं ॥३२॥ एतत्कलेवरंचात्रप्रक्षाल्यसंपुमेन्यच ॥ उत्तरस्यांपुनर्यातिप्र
थमंयोमिलेदिह ॥३३॥ तच्छिरश्चसमाहृत्ययोजनीयंकलेवरे ॥ ततस्तैस्त
त्कृतंसर्वंशिवाज्ञापरिपालकैः ॥३४॥ कलेवरंसमानीयप्रक्षाल्यविधिवच्च
तत् ॥ पूजयित्वापुनस्तेवैगताश्चोदङ्मुखास्तदा ॥३५॥ प्रथमंमिलितस्त
त्रहस्तीचाप्येकदंतकः ॥ तच्छिरश्चतथाछित्वानीत्वातेनाप्ययोजयत ॥३६
॥ संयोज्यदेवताःसर्वाशिवंविष्णुंविधिंतथाऊचुरनंतरंकार्यंनवमांसा
वशेषितं ॥३७॥ ततस्तेतुवचःश्रुत्वाशिवोकंपर्यपालयत ॥ ऊचुस्तेचतदा
तत्रब्रह्माविष्णुहरस्तदा ॥३८॥ यस्माच्चतेजसःसर्वेवयंजातामहात्मनः

तत्तेजश्चसमायातुवेदमंत्राभियोगतः ॥३९॥ इत्येवमभिमंत्रेणामंत्रितं
चयदापुनः ॥ तदोत्तस्थौपुनश्चायंसुंदरःसुजगस्तदा ॥४०॥ अभिषिक्त
स्तदादेवैर्गणाध्यक्षैर्गजाननः ॥ तस्यैवदर्शयामासद्दूरूपसमन्वि
तं ॥४१॥ वस्त्राणिविविधानिह ॥ नानालंकारणंतथापूजयित्वातदादेवा
स्तिष्ठाप्यनेकशः ॥४२॥ करेणास्पर्शितःसोवैदुःखितोसीहपुत्रकधन्यो
सिकृतकृत्योसिसर्वपूज्योनवाधुना ॥४३॥ आननेनतवासिंदूरंदृश्यते
सांप्रतंयदि ॥ तस्मात्त्वंपूजनीयोसिसिंदूरेणसदानरैः ॥४४॥ पुष्पैर्वाचंद
नैर्वापिगंधेनैवशुभेनच ॥ नैवेद्येनपुनस्त्वांचकृतानीराजनाविधिं ॥४
५॥ तांबूलैरर्घदानैश्चकृत्वाप्रक्रमणंतथा ॥ नमस्कारविधानेनपूजां

चैवविधास्यति॥४६॥तस्यवैसकलासिद्धिर्नविघ्नंतिनसंशयः॥इत्युक्त्वा
चतदादेवीशक्तिशिवार्ययत्नदा॥४७॥ततःस्वास्थ्यंचदेवानांजातंकृत्स्नमा
त्रतः॥एतस्मिंश्चक्षणेदेवावासवाद्याःशिवांतदा॥४८॥स्तुत्वाप्रसाद्यतंदे
वींत्वाश्चैवंशिवांतिके॥प्रसाद्यगिरिजांपश्चात्तदुत्संगेसंन्यवेशयत्॥४९॥
शिवोपितस्यशिरसिकृत्वाचकरपंकजं॥उवाचवचनंदेवापुत्रोयमिति
चापरः॥५०॥गणेशोपितदुष्टायनमस्तुभ्यंशिवायवै॥पार्वत्यैचनमस्कृ
त्वाब्रह्माणंविष्णुमेवच॥५१॥नारदाद्यानृषीन्सर्वान्नमस्कृत्यपुर
स्थितः॥क्षंतव्यश्चापराधोमेमानश्चैवदृशोन्नृणां॥५२॥ब्रह्माचक्रीकर
श्चैवविष्णुश्चैवतदास्वयंत्रयोवयंयथाचात्रतथायंप्रतिपूज्यतां॥५३॥

वयंचप्राकृतासर्वेश्चायंप्राकृतःपूज्यएवचं॥एतत्सृजंपुराकृत्वापश्चात्पू
ज्यावयंनरैः॥५४॥वयंचपूजिताःपूर्वंनायंचपूजितोयदा॥तदाचफलहा
निःस्यात्तनात्रकार्याविचारणा॥५५॥शिवेनपूजितःपूर्वंब्रह्मणाचतथैवच
विष्णुनापूजितश्चैवपार्वत्याचप्रपूजितः॥५६॥सर्वैर्देववरैश्चैवपूजितःपर
यामुदा॥सर्वैर्मिलित्वातत्रैवसर्वाध्यक्षेनिवेदितः॥५७॥पुनश्चैवशिवेनैव
वरान्दत्वात्यनेकशः॥तन्नामविघ्नहर्तेतिश्रेष्ठंचैवभवतिति॥५८॥मम
सर्वगुणाध्यक्षोपूज्योवैत्वंभवाधुना॥एवमुक्त्वावरान्यानिपूजाविधिर
नेकशः॥५९॥आशिषश्चाप्यनेकाश्चकृताश्चतत्कृत्स्नधुवं॥ततश्चैवत
दादेवागीतंवार्चयन्नृत्यकं॥६०॥कारयामासतत्रैवप्रहर्षरसांगलोक्त

त्रिक०
६७

दा॥पुनश्चैवं वरो दत्तः शिवेनैव महात्मना॥६१॥ चतुर्थ्यां त्वं समुत्पन्नो
ऊर्जे मासि गणेश्वर॥ अस्मिंश्च तथा पक्षे चंद्रस्योदयने शुभे॥६२॥ प्रथमे
च तथा यामे जातां त्वं गिरिजा सति निर्मयामास ते रूपं॥ तस्माच्च व्रतमुत्त
मं॥६३॥ तस्मात्तद्दिनमारभ्य व्रतं कार्यं सुशोभनं॥ यावत्तु नः समायाति
वर्षांते च चतुर्थिका॥६४॥ तावद्व्रते च कर्त्तव्यं तवचैव मदाज्ञया॥ संसारे
सुखमिच्छंति यतुलं चाप्यनेकशः॥६५॥ ते पूजयंतु त्वां नत्वा चतुर्थ्यां
विधिपूर्वकं॥ मार्गशीर्षे तथा मासे रमायां वै चतुर्थिका॥६६॥ प्रातः स्ना
नं तदा कृत्वा विप्रं निमंत्रयेत्ततः॥ दूर्वाभिः पूजनं कार्यमुपवासस्तथा ६७
विधः॥६७॥ रात्रौ च प्रहरे जाते सुस्नात्वा पूजनं ततः॥ मूर्त्तिं धातुमयीं कृ

त्वा सवालसंभवां तथा॥६८॥ श्वेतार्कसंभवां वापि निर्मितां मार्दवीं पुनः॥
प्रतिष्ठाप्य तदा तत्र पूजयेत्सयतः पुमान्॥६९॥ गंधैर्नानाविधैर्दिव्यैश्च
दनैः पुष्पकैरपि व्यक्तिमात्रां च दूर्वां चिच्छाग्रां च मूलवर्जितां॥७०॥ दूर्वाङ्कु
रांदलानां तु शतमेकोत्तरं तथा। एकविंशतिर्वा दूर्वं पूजयेत्परमार्थतः
७२॥ धूपैर्दीपैश्च नैवेद्यैः पूजयेत्परमेश्वरं॥ तांबूलार्घ्यकैश्चैव वस्त्राणि
पात्रस्तवैस्तथा॥७३॥ पूजयित्वा च तं तत्र बालचंद्रं च पूजयेत्॥ पश्चाच्च
ब्राह्मणो पूज्य भोजयेत् मधुरं मुदा॥७४॥ स्वयं चैव तदा भोज्यं मधुरं च
वर्णां विना॥ विसर्जयेत्ततः पश्चात् नियमास्थाय तत्र हि॥७५॥ एवं कृते च
संपूर्णे वर्षे जाते नरस्तदा॥ उद्यापनविधिं कुर्यात् व्रतसंपूर्णहेतवे॥७६

द्वादश ब्राह्मणास्तत्र भोजनीया मदाज्ञया कुंभे चैके च संस्थाप्य मू
र्त्तिं तद्दीयकां ॥७७॥ अष्टदलं ततः कृत्वा दीपं कृत्वा विधानतः । होमश्चैवात्र
कर्त्तव्यो विनशाठ्येन कारयेत् ॥७८॥ स्त्रीद्वयं च तथाचार्यो वटुद्वयमथापि
वा । भोजयित्वा पूजयित्वा मूर्त्तिमग्रे विधिपूर्वकं ॥७९॥ ततो जागरणं कार्यं पुनः
प्रातः प्रपूजयेत् । विसर्जयेत्ततश्चैव पुनरागमनाय च ॥८०॥ तिलकं
चाशिषो ग्राह्याः स्वस्तिवाचनमेव च । पुष्पांजलिं प्रदद्याच्च व्रतसंपूर्णहेत
वे ॥८१॥ नमस्कारं ततः कृत्वा नानाकार्यं प्रकल्पयेत् ॥ एवं व्रतं कृतं येन ल
ब्धं मनसेप्सितं ॥८२॥ यो वै नित्यं तदीयां च पूजां चैव स्वशक्तितः । सिं
दूरचंदनैश्चैव तंदुलैश्चैव केतकैस्तथा ॥८३॥ उपचारैरनेकैश्च पूजेत्तांश्च ये

नराः । तेषां सिद्धिर्भवेन्नित्यं विघ्ननाशो न वै दिह ॥८४॥ सर्ववर्णैः प्रकर्त्त
व्यं विविधेच्छापरायणैः । उदयाभिमुखैश्चैव राजभिश्च तथैव च ॥८५॥
यं यं कामयते यो वै तं तं न सव्यः सदा भवान् । शिवेनैवं सदा प्रोक्तं गणेशाय
महात्मने ॥८६॥ तदानीं देवताश्चैव सर्वैश्च ऋषिसत्तमैः । तथेत्युक्ता तु तैः
सर्वैर्गणाय स्वप्रकल्पितं ॥८७॥ ततश्चैव गणाः सर्वे प्रणेमुस्तं गणेश्वरं
गिरिजायाः समुत्पन्नो यो हर्षः कथं ब्रुवे ॥८८॥ देवदुंदुभयो नेदुः पुष्पव
र्षं पपात ह । जगत्स्वास्थ्यं तदा प्राप देवा घोरे प्रतिष्ठिते ॥८९॥ तच्छ्रुत्वा सर्वपा
पेभ्यो मुच्यते नात्र संशयः ॥९०॥ ॥इति श्रीशिवपुराणे गणेशमहिमाव
र्णनं नाम चतुस्त्रिंशोऽध्यायः ॥ ॥सूत उवाच॥ ॥श्रूयतामृषयः श्रेष्ठाः

ये

शिव० १३९ किं जातं तु ततः परं ॥ येन श्रवणमात्रेण सर्वपापक्षयो भवेत् ॥ १ ॥ ततो देव
गणाः सर्वे [illegible]षीणां च गणास्तथा ॥ समागताश्च तत्र जन्मसुखे तु शिवाज्ञया ॥
२ ॥ अंशांसं तत्र शिवां तत्र गणेशं च ततः परं ॥ शिवं चैव तथा स्तुत्वा कीदृशं युद्धमे
व च ॥ ३ ॥ जगत्स्वास्थ्यं तथा लेभे शिवोपि च गणास्तदा ॥ यदा च गिरिजा देवी
कोपहीना बभूव ह ॥ ४ ॥ शिवोपि गिरिजां तत्र प्रसाद्य पूर्ववत्तदा ॥ चकार वि
विधं सौख्यं लोकानां हितकाम्यया ॥ ५ ॥ विष्णुश्च शिवमाश्वास्य ब्रह्मापि च त
थैव च ॥ जगाम भवनं स्वं च कृत्वा कार्यं सुदुष्करं ॥ ६ ॥ नारदोपि गतवांस्तत्र
यत्रास्ते गिरिजा तदा जगाम गतवांस्तत्र गायन्नृत्यञ्शिवानुत्तमं ॥ ७ ॥ एतत्ते १३९
सर्वमाख्यातं यत्पृष्टोहं मुनीश्वर ॥ एतस्मिन्नंतरे तत्र षण्मुखपयस्त

श्री दा ॥ गणेशस्य श्रुतं वृत्तं पुनः किंचिन्निवेद्यतां ॥ सूत उवाच ॥ साधु पृष्टं
भवद्भिश्च श्रूयतां ऋषिसत्तमाः ॥ ९ ॥ शिवा चैव शिवश्चैव परं प्रेमसमावृ
तः पित्रो [illegible] लयतोस्तत्र सुखं वै विवर्धितं ॥ १० ॥ तावपि च तयोस्तत्र परि
चर्यापरायणौ ॥ षण्मुखश्च गणेशश्च पित्रोरधिकतरं तदा ॥ ११ ॥ स्नेहं
चैव व्यवर्धतां शुक्लपक्षे यथा शशी ॥ कदाचित्तौ स्थितौ तत्र विचारश्च परा
यणौ ॥ १२ ॥ विवाहश्च कथं कार्यस्तनयोः पुत्रयोः पुनः षण्मुखश्च प्रियतमा
गणेशश्च तथैव च ॥ १३ ॥ अहं च परिणेष्यामि अहं चैव पुनः पुनः ॥ पर
स्परं च नित्यं वै वादं च तसरावुभौ ॥ १४ ॥ तच्छ्रुत्वा वचनं तौ च विस्मयं पर
मं गतौ ॥ किं कर्तव्यं कथं कार्यो विवाहविधिरेतयोः ॥ १५ ॥ निश्चित्येति

शिव०
१४०

यतोतत्रयुक्तिश्चरचितातदा॥कस्मिंश्चित्तुसमयेस्थित्वासमाहूयस्वपु
त्रकौ॥१६॥कथयामासतुस्तत्रपुत्रयोपितरौतदा॥अस्माभिर्नियमःपू
र्वंकृतस्तच्छ्रूयतांपुनः॥१७॥द्वावपिचसमौपुत्रौविशेषोनात्रलभ्यते॥
तस्माच्चैवंकृतंयेनपुत्रयोरुभयोरपि॥१८॥तस्यवैप्रथमंकार्योविवा
होश्शुभलक्षणः।यश्चैवपृथिवींसर्वांक्रांत्वापूर्वमुपाव्रजेत्॥१९॥त
योरेवंवचःश्रुत्वाशरजन्मास्वयंतदा॥जगाममंदिरात्तूर्णंपृथिवींक्रम
णायवै॥२०॥गणपतिश्चतत्रैवविचार्यचपुनःपुनः।किंकर्तव्यंक्वगंत
व्यंलंघितुंनैवशक्यते॥२१॥क्रोशमात्रंगतंस्यादेनगम्यंतमयापुनः १४०
किंपुनःपृथिवीमेतांक्रांत्वासुखमचिंतकं॥२२॥इतिविचार्यविघ्नेशः

श्रूयतांतदनंतरं॥विचार्यैवंगणेशश्चयच्चकारपरंशुभं॥२३॥स्नानंकृ
त्वायथान्यायंसमागत्यस्वयंगृहे॥उवाचपितरंतत्रमातरंपुनरेवच॥२४
आसनेस्थापितेह्यत्रपूजार्थंभवतोरिह॥इतिश्रुत्वावचस्तस्यपार्वतीप
रमेश्वरौ॥२५॥आस्थितौचासनेतत्रपूजायागृहणाय॥तेनैवपूजि
तौतौचप्रक्रांतौचपुनःपुनः॥२६॥एवंचकृतवान्सप्तकृत्वःप्रक्रमंतु
सः॥बद्धांजलिस्तदोवाचपितरौप्रेमलालसौ॥२७॥भोमातर्भोपितस्त्वं
चश्रृणुध्वंपरमंवचः॥शीघ्रंचैवात्रकर्तव्योविवाहःशोभनोमम॥२८॥
इत्येवंवचनंश्रुत्वापितरौवूचतुस्तदा॥प्रक्रमस्वभवान्सम्यक्पृथि
वींचसकाननां॥२९॥कुमारोगतवांस्तत्रत्वंचापिपुनरेवच॥गच्छशीघ्रं

शिव०
१४१ तथा कृत्वा गच्छ पूर्वं तीर्थे वै हि ॥ ३० ॥ इत्येवं वचनं श्रुत्वा वचनं क्रोधसं
युतः ॥ उवाच श्रूयतां सम्यक् वचनं मम सत्तमौ ॥ ३१ ॥ मया तु पृथिवी
क्रांता सप्तवारं पुनः पुनः ॥ एवं कथं समुच्येतां पुनश्चापि पितराविह ॥ ३२ ॥
तद्वचस्तु तदा श्रुत्वा पितरावूचतुस्तदा ॥ कदा क्रांता त्वया पुत्र पृथिवी
गहनैर्युता ॥ ३३ ॥ तयोरेवं वचः श्रुत्वा गणेशो वाक्यमब्रवीत् ॥ भवतोः पू
जनं कृत्वा प्रक्रांता च मया पुनः ॥ ३४ ॥ सप्तवारं च यद्येवं तत्किं प्रक्रमणेन
हि ॥ इत्येवं वचनं वेदशास्त्रेषु वा धर्मसंचये ॥ ३५ ॥ वर्त्तते किं च तत्तथ्यं न हि
किं सत्यमेव च ॥ पित्रोश्च पूजनं कृत्वा प्रक्रांतिं च करोति यः ॥ ३६ ॥ तस्य १४१
वै पृथिवीजन्यफलं भवति निश्चितं ॥ अपहाय गृहे यो वै पितरौ तीर्थ

पित्रोश्चरणपंकजं ॥ ३७ ॥ अन्यतीर्थं तु दूरे वै गत्वा प्राप्नोति तत्पुनः ॥ इदं
संनिहितं तीर्थं सुलभं धर्मसाधनं ॥ ३९ ॥ पुत्रस्य च स्त्रियश्चैव तीर्थं गेहे सु
शोभनं ॥ पुत्रस्य पितरौ प्रोक्तौ स्त्रियो भर्त्तैडदाकृतं ॥ ४० ॥ इदं शास्त्रं तया
वेदो भाषते यन्निरंतरं ॥ भवद्भ्यां च कथं प्रोक्तं मसत्यं पुनरेव च ॥ ४१ ॥ भव
द्भ्यां त्विदं रूपमसत्यं च भवेदिह ॥ तदा वेदोऽप्यसत्यो वै भवेदिति न सं
शयः ॥ ४२ ॥ शीघ्रं च भवितव्यं वै विवाहः क्रियतां शुभः ॥ अथवा वेदशा
स्त्रं च व्यलीकं कथ्यतां पुनः ॥ ४३ ॥ द्वयोश्श्रेष्ठतमं यच्च कर्त्तव्यं तत्तथैव
हि ॥ इति श्रुत्वा वचस्तस्य विस्मयं परमं गतौ ॥ ४४ ॥ ॥ इति श्रीशिवपु
राणे गणेशाबुद्धिविचक्षणं नाम पंचत्रिंशोध्यायः ॥ शिवश्च गिरिजा चेपिपु
॥ कृतोवावा ॥

शिव १
१४२

त्वंबुद्धिविचक्षणौ।ऊचतुस्तावृषिश्रेष्ठाययथार्थंभाषणंश्रवं॥१॥पुत्रौतवि
मलाबुद्धिःसमुत्पन्नामहात्मनः।त्वयोक्तंयद्वचश्चैवतत्तथैवनचान्यथा
२॥समुत्पन्नेचदुःखेवैयस्यबुद्धिर्विशिष्यते।तस्यदुःखंविनश्येतसूर्ये
दृष्टेययातमः॥३॥वेदशास्त्रपुराणेषुयदुक्तंनत्वयाकृतं पित्रोःप्रक्रमणं
जातंपृथिव्याश्चक्रांतंभवेत॥४॥इतिवेदपुराणेषुशास्त्रेषुविविधेषुच
सम्यक्कयाकृतंयच्चतत्केनापिनवेदितं॥५॥आवाभ्यांमानितंतच्चना
न्यथाक्रियतेधुना।इत्युक्त्वातुसमाश्वास्यगणेशंबुद्धिसागरं॥६॥विवा
हकरणेतौचमतिंचक्रतुरुत्तमां।एतस्मिन्नंतरेतत्रविश्वरूपसुतेउभे १४२
७॥सिद्धिबुद्धिइतिख्यातेसर्वांगसुंदरेशुभे।ताभ्यांचैवगणेशस्यवि

वाहंचक्रतुर्मुदा॥८॥संतुष्टादेवताःसर्वाविवाहेसमुपागमन्।यथा
चैवशिवस्यैवगिरिजायामनोरथः॥९॥तथाचविश्वकर्मासौविवाहंकृत
वांस्तदा।यथाचरूपयोर्देवालेभिरेपरमांमुदं॥१०॥गणेशोपितदाता
भ्यांसुखंचैवाप्यचिंतकं।प्राप्तवांश्चतदातत्रवर्णितुंनैवशक्यते॥११॥कि
यताचैवकालेनतस्यपुत्रौबभूवतुः।सिद्धेर्लक्षस्तथाबुद्धेर्लाभःपरम
शोभनौ॥१२॥एवंसुखममितंवैतुंजानेचगणेश्वरे।आजगामगुहश्चा
पक्रांत्वाचपृथिवींतथा॥१३॥तावन्नारदेनैवकैलासेप्रतिबोधितः
त्वयाचकृपतांसर्वंपितृभ्यांतुकृतंहियत॥१४॥निःकास्यत्वांतुतापी
र्यंमिषमुत्साद्यवेश्मनिगणेशस्यकृतोविवाहोलब्धवान्स्त्रीद्वयंतथा॥१५

शिव० १४३ पुत्रद्वयंतथालब्ध्वासुखंभुंक्तेनिरंतरंनवतापृथिवीक्रांतातातस्यैवकृत
मुत्तमं॥१६॥पितृभ्यांक्रीयतेचैवअन्यःकिंनकरोतिचअसम्यक्चकृतंता
भ्यांमद्वितेनसुखंमतं॥१७॥ददाघदिगरंमातापिताविक्रीयतेयदि।राज्ञा
कौ ४ चैं यतेसर्वंकस्मैकिंचक्रावामहे॥१८॥यैनैवंचकृतंस्याद्वैतन्मुखंन
विलोकयेत॥इतिनीतिर्नवेदघययथेच्छसितथाकुरु॥१९॥इत्युक्त्वाना
रदस्तस्मैअंतर्धानमुपागतः॥स्कंदोपिपितरौनत्वाकोपाग्निज्वलि
तस्तदा॥२०॥जगामपर्वतेक्रौंचेपितृभ्यांवारितोपिसन्॥वाग्दानंच
कृतंतेघकथंचगम्यतेत्वया॥२१॥इत्येवंचनिषिद्धोपिएवमुक्त्वाजगा
मसः॥नस्थातव्यंमयात्रयघैवंकपटंकृतं॥२२॥एवमुक्त्वागतस्त १४३

त्रअद्यापिपर्वतेश्रुतो॥वर्ततेदर्शनेनैवलोकानांपापहारकः॥तद्दिनं
हिसमारभ्यकुमारंतेप्रतिष्ठितं॥तन्नामश्रुतदेलोकेप्रसिद्धंभुवनत्रये
२४॥कार्त्तिक्यांचसदादेवाकुर्वयश्चसतीर्थकाः॥दर्शनार्थंकुमारस्यगछं
तिचमुनीश्वराः॥२५॥कार्त्तिक्यांकृत्तिकायोगेयःकुर्यात्स्वा[?]दर्शनं॥त मि
स्यपापंदहेत्सर्वंमनेप्सितंफलंलभेत्॥२६॥काउमापिदुःखमापन्नास्कं
दस्यविरहेसति॥तत्सुखार्थंस्वयंशंभुरंशेनपर्वतेगतः॥२७॥मल्लिका
र्जुननामासीतज्योतिर्लिंगंसुखावहं॥अद्यापिदृश्यतेतत्रशिवया
सहितःशिवः॥२८॥तमागतंसविज्ञायतत्तोगंतुंसमुत्सुकः॥देवैश्च
प्रार्थितःसोपिदूरतोयोजनत्रयं॥२९॥पर्वणिपर्वणितत्रदर्शनार्थंचग

च्छति ॥ अमावास्यादिने शंभुः स्वयं गच्छति तत्र ह ॥ ३१ ॥ पार्वती गच्छ
ते तत्र पूर्णमासि दिने शुभे ॥ एतत्तस्य च वृत्तांतं दृष्टं च कथितं मया ॥ ३२
॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते सर्वथा नरः ॥ ॥ इति श्रीशिवपुराणे गणे
शापरिणये नैकाद्रिकागमनो नाम षट्त्रिंशोऽध्यायः ॥ ॥ ऋषय ऊचुः
॥ सूत जानासि सकलं नाज्ञातं विद्यते तव शिवमाहात्म्यं विशेषेण
कथनीयं त्वया पुनः ॥ १ ॥ धन्याः स्म कृतकृत्याः स्म सार्थकं देहधारणं
जातं तवैव संयोगात् किं पुनर्वर्णयामहे ॥ २ ॥ इत्येवं वचनं तेषां श्रुत्वा
सूतोऽब्रवीदिदं ॥ सूत उवाच ॥ ॥ साधु पृष्टं भवद्भिश्च लोकानां हितका
रकैः ॥ ३ ॥ भवंतश्च तथा धन्यास्तु विप्राः कुलभूषणाः । येषां चैव शि

वः साक्षात् देवतं परमं शुभं ॥ ४ ॥ सदाशिवकथा लोके वल्लभा नाम व
तां यदि ते धन्याश्च कृतार्थाश्च सफलं देहधारणं ॥ ५ ॥ उद्धृतं तु कुलं तै
स्तु ये शिवं समुपासते ॥ यस्य वक्त्रे शुभं नाम सदाशिव शिवेति च ॥ ६ ॥
पापानि न स्पृशंतीह खदिरांगारकं यथा ॥ श्रीशिवाय नमस्तुभ्यं मुखं
व्याहरते यदा ॥ ७ ॥ तन्मुखं च तदा यो वै पश्यति न कृपो नरः । तीर्थज
न्यं फलं तस्य भवतीति सुनिश्चितं ॥ ८ ॥ यत्र त्रयं सदा तिष्ठेदेतच्छुभ
तरं नरैः ॥ तस्य दर्शनमात्रेण वेणीस्नानफलं भवेत् । ९ शिवनाम
विभूतिश्च रुद्राक्षास्त्रितयं शुभं ॥ एतत्त्रयं शरीरे च यस्य तिष्ठति नि
त्यशः ॥ १० ॥ तस्यैव दर्शनं लोके दुर्लभं पापहारकं ॥ तद्दर्शनं यथा वेणी

शिव॰ १४५

नाम्नयोरं नरं स्मृतं ॥११॥ एवं यो न विजानाति तस्यैव दर्शनादिह ॥ नरो वा
प्यथवा नारी पापिष्ठो भवति क्षणात् ॥१२॥ विभूतिर्यस्य नो भाले नांगे
रुद्राक्षधारणं ॥ नहि वाणी शिवमयी तं त्यजेदंत्यजं यथा ॥१३॥ एवं ना
मत्रयं गंगा विभूतिर्यमुना मता ॥ रुद्राक्षा विधिजा प्रोक्ता सर्वपापवि
नाशिनी ॥१४॥ शरीरे च त्रयं यस्य तत्फलं चैकतः स्मृतं ॥ एकतो वेणि
काया स्नु दर्शनेन फलं तु यत् ॥१५॥ न देवतुलितं पूर्वं ब्रह्मणा हितका
रिणा ॥ समतां चैव तज्ज्ञात्वा तस्माद्धार्यं सदा बुधैः ॥१६॥ तद्दिनाहि समा
रभ्य ब्रह्मादिभिः पुरातनैः ॥ धार्यते त्रितयं तच्च दर्शनात्पापहारकं ॥ १४५
१७॥ किं दर्शनस्य च फलं किं पुनर्धारणस्य च ॥ ऋषय ऊचुः ॥ ॥ दर्

शं हि फलं प्रोक्तं रुद्राक्षासंभवं त्वया ॥१८॥ तन्माहात्म्यं विशेषेण वक्तु
मर्हसि सुव्रत ॥ इत्येवं वचनं श्रुत्वा सूतो वचनमब्रवीत् ॥१९॥ सूत उवा
च ॥ ॥ सम्यक्पृष्टमृषिश्रेष्ठाः कथयामि पुरातनं ॥ रुद्रसंख्याशतं ध
त्वा रुद्ररूपो भवेन्नरः ॥२०॥ एकादशशतानीह धृत्वा यः फलमाप्नुते
तत्फलं शक्यते नैव वक्तुं वर्षशतैरपि ॥२१॥ पंचभिश्च शतैश्चैव शा
तार्द्धेन तथा पुनः ॥ रचित्वा मुकुटं यो वै धारयेत्स शिवस्तथा ॥२२॥ त्रि
भिश्चैव शतैः प्रोक्तं षष्ट्या युक्तैर्मुनीश्वराः ॥ उपवीतं तथा तस्य त्रिरा
वृत्तं तथा पुनः ॥२३॥ शिखायां च तथा प्रोक्तं त्रयं च मुनिसत्तमाः ॥ क
र्णयोः पंच षट् चैव दक्षिणोत्तरयोस्तथा ॥२४॥ शतमेकोत्तरं कंठे वा

शि०व०
१५६

हवोऽश्च रुद्रसंख्यया। कण्ठे वै धारयेत्तत्रमणिं बंधेत्तथा पुनः॥२५॥ उप-
वीतेत्रयं धार्यं मुक्तिकामी नवेन्नरः॥ ~~अव्वीतेत्रयं धार्यं मुक्तिकामी नवेन्न~~
॥ शेषाश्चार्वरिताश्चैवयं चाशान्मुनिसत्तमाः॥२६॥ कटिसूत्रे तथा कृत्वा ता-
निश्च धारयेद्बुधः॥ एवं संस्थाधृतायेन तद्रूपं रुद्रसंमतं॥२७॥ ध्यानं कृत्वा
यदा तेनास्थितं स्यादासनेशुने॥ शिवेति व्याहरंतं च दृष्ट्वा पापैः प्रमुच्यते
॥२८॥ एकासनेयदा तेन लक्षाणां पंचकं ध्रुवं॥ मंत्रजाप्य यथोक्तं च त्रा-
पानुग्रहतां व्रजेत्॥२९॥ तद्दर्शनं तदा कृत्वा गंगास्नानफलं लभेत्॥ त्रि-
पुंड्रेणयुक्तं च रुद्राक्षाभिः समन्वितं॥३०॥ महेशं जपंतं च दृष्ट्वा रुद्र-
फलं लभेत् कंठे वापि तथा धृत्वा सर्वपापैः प्रमुच्यते॥३१॥ रुद्राक्षमा- १५६

लया यो वै मंत्रं जपति निसत्तमः॥ तस्य नाम्नां शतेनापि सहस्रस्य फलं लभे-
त॥३२॥ शिवस्येव तथा विष्णोः सूर्यस्येव तथा पुनः॥ चंद्रमाश्च तत्तुत्रस्य
मंत्रः स्यादृषिसत्तमः॥३३॥ सर्वेषां चैव देवानां जाप्ये ह्येता प्रकीर्तिताः॥
यस्य कस्यापि मंत्रो पि रुद्राक्षाभिः फलं लभेत्॥३४॥ मुक्तिकामी नवे-
द्यो वै मुक्तिकामस्तथा पुनः॥ पुत्रार्थी च धनार्थी च विद्यार्थी तु विशेष-
त॥३५॥ कन्याकामो नवेद्यो वै यशस्कामस्तदा पुनः॥ यं यं काममपे-
क्ष्यैव जपं कुर्यान्निरंतरं॥३६॥ तं तं कामं च रुद्राक्षाय छंति नात्र संश-
यः॥ रुद्रमंत्रो विशेषेण धारयेन्मालिकां सदा॥३७॥ विदिनो रपि च
मंत्रस्य जपं कुर्यात्तथैव च॥ वस्तुतः सर्वदेवानां जाप्ये मुख्या उदाहृता

३९॥ सुवर्णगुलिकाभिस्तु लक्ष्मीकामो जपेन्नरः॥ मुक्ताभिस्तु यशस्का
मः कुर्याज्जपमनुत्तमं॥ ४०॥ स्फाटिकैः पुत्रकामस्तु प्रवालैर्वश्यतां व्रजेत्
वा तु नाथी जपेद्योऽपि रुद्राक्षा मुक्तिदा स्मृता॥ ४१॥ मुक्तिदाश्च तथा प्रोक्ताः
सर्वकामफलप्रदाः॥ देवतांतरभेदेन माला नानाविधा स्मृताः॥ ४२॥
क्षा शिवस्य च तथा विष्णो रुद्राक्षमालिकाः शुभाः॥ सूर्यस्य स्फटिका प्रोक्ता
जाप्ये शक्तेः पुरातने॥ ४३॥ मुक्ताभिश्च प्रवालैश्च चंडी तुष्टिमवाप्नु
यात्॥ गणेशश्च तथा तैस्तु संतुष्टो भवति क्षणात्॥ ४४॥ रुद्राक्षा
भिर्विशेषेण हरस्तुष्टिकरः स्मृतः॥ मुक्ताभिर्वापि युक्ताभिः रुद्रा १८७
क्षाभिर्[illegible]रिः स्वयं॥ ४५॥ नानोपासनभेदेन फलं नानाविधं

स्मृतं। इदृक्षं न फलं नैव रुद्राक्षाभिरवाप्यते॥ ४६॥ सुवर्णमालिका
प्रोक्ता लक्ष्मीजाप्ये शुभावहा॥ सर्वैश्वर्यप्रसिद्ध्यै च यथा सा दृष्टिपुरात
ने॥ ४७॥ शास्त्राणि च विचार्यैव रुद्राक्षाः शुभदाः स्मृताः॥ रुद्राक्षा विवि
धा प्रोक्तास्तासां भेदं वदाम्यथ॥ ४८॥ एकमुखी भवेदाद्या सर्वसिद्धिप्र
दायिनी॥ सिद्धयोऽष्टौ च तत्रैव यत्र स्यात्तत् शुभदा च सा॥ ४९॥ द्विमुखी च
भवेद्या च लक्ष्म्या हरतराणहा॥ त्रिमुखी च भवेद्यत्र विद्याः सर्वाः प्रति
ष्ठिता॥ ५०॥ चतुर्मुखी च या स्याद्वै चतुर्वर्गफलप्रदा॥ पंचमुखी च यत्रैव
तत्र स्यात्तापनाशनं॥ ५१॥ एकमुखी च रुद्राक्षा दुर्लभा ऋषिसत्तमाः
बदरीफलमात्रा च या स्याद्वै दृशि सत्तमाः॥ ५२॥ तथापि फलदा लो

केसुखसौभाग्यवर्द्धिनी ॥ आमलसदृशी यास्यात्सर्वारिष्टविनाशिनी
५२ ॥ गुंजयासदृशी यास्यात्सर्वार्थफलसाधिनी ॥ यथायथा लघुः स्या
त्तथातथाधिकप्रदा ॥ ५४ ॥ एकैकतः फलं प्रोक्तं दशांशैरधिकं बुधैः ॥ य
थावद्दृश्यते लोके रुद्राक्षाफलदास्तु ना ॥ ५५ ॥ तथा न दृश्यते न्याच मा
लिका ऋषिसत्तमाः ॥ रुद्राक्षाधारणं प्रोक्तं पापनाशनहेतवे ॥ ५६ ॥
तस्माद्धारणीया वै सर्वपापनाशिनी ह्यघं ॥ यस्यांगे नैव रुद्राक्षा जायं
चक्रुतेनच ॥ ५७ ॥ तद्देहं न स्पृशेत्प्राज्ञो दृष्ट्वा हरतरो व्रजेत् ॥ रुद्रनेत्र
विशेषेण धारणीया शुभाय च ॥ ५८ ॥ यश्चैवं न नवैश्चैव धारयेद्भक्तिमा
न्सदा ॥ सर्वे(ष्व)पि च बीजेषु दृश्यते विविधांकुराः ॥ ५९ ॥ रुद्राक्षाबीज

केदृष्टाद्दृश्यते मुक्तिरुत्तमा ॥ अन्यानि चापि दृश्यंते फलानि ऋषि
सत्तमाः ॥ ६१ ॥ तदहं कथयाम्यद्य धारकाणां हिताय वै ॥ रुद्राक्षमालि
नं दृष्ट्वा भूतप्रेतपिशाचकाः ॥ ६२ ॥ डाकिनी शाकिनी चैव ये चान्ये द्रोह
कारकाः ॥ कृत्रिमं चैव यत्किंचित् अभिचारादिकं च यत् ॥ ६३ ॥ तत्स
र्वं दूरतो याति दृष्ट्वा शंकितविग्रहं ॥ न पापं जायते तस्य संगादिक
मथापि यत् ॥ ६४ ॥ रुद्राक्षमालिकां दृष्ट्वा शिवो विष्णुः प्रसीदति ॥ वि
कारैस्तैः शुभा ज्ञेयाः प्रेक्षाविज्ञि मुनीश्वराः ॥ ६५ ॥ एकमुखी च या
स्यात्सैव प्रतिशूरं व्रजेदिह ॥ द्विमुखी च तदा ज्ञेया धारको नैव दह्यते ॥
६६ ॥ त्रिमुखी च यदा स्यात्सैव शस्त्रपातादिकं न हि ॥ चतुर्मुखी तदा

शिव०
१५९

तेयावैराश्यांधाभवंतिहि॥६६॥जलेचमुच्यमानानांसामज्जनेनंतरे
दिह॥पंचमुखीचयाप्रोक्तासर्वानर्थनिवर्त्तिनी॥६७॥जलेनिमज्ज
तिमाचसर्वदाशुभदायिनी॥एवंज्ञात्वाफलंसम्यक्धार्याधर्मविद
द्भय॥६८॥एतत्सर्वंसमाख्यातंयत्पृष्टोहंमुनीश्वराः॥एवंयःशृणुया
न्नित्यंमाहात्म्यंपरमंशुभं॥६९॥रुद्राक्षमालिकायस्यशिवस्या
तिप्रियोभवेत॥ ॥इतिश्रीशिवपुराणेशिवनामविभूतिरुद्राक्ष
महिमावर्णनंनामसप्तत्रिंशोध्यायः॥ ॥ऋषयऊचुः॥ ॥सम्य
गुक्तंत्वयासूतलोकानांहितकाम्यया॥पुनश्चकथ्यतांधेतत्सू १५९
शिवमात्म्यमुत्तमं॥१॥श्रुत्वैतत्त्वन्मुखांभोजान्नतृप्तास्मवयं

प्रभो॥पृथिव्यांयानिलिंगानितीर्थेतीर्थेभवंतिहि॥२॥अन्यत्रवास्थले
यानिप्रसिद्धानियथाप्रभोः॥यत्रयत्रभवेल्लिंगंतत्रसर्वंनिवेद्यतां
३॥इतिश्रुत्वावचस्तेषांवचनंचेदमब्रवीत॥सूतोवाच॥ ॥यत्पृष्टंहि
ऋषिश्रेष्ठालिंगानिकथयाधुना॥४॥सर्वेषांचैवलिंगानांसंख्याच
विद्यतेऋत॥सर्वलिंगमयीभूमिःसर्वलिंगमयंजगत॥५॥लिंग
मयानितीर्थाणिसर्वलिंगेप्रतिष्टितं॥संख्यानविद्यतेतेषांतत्किं
चैवब्रवीमिह॥६॥यत्किंचित्दृश्यतेदृश्यंवर्ण्यतेस्मर्यतेचयत
तत्सर्वंशिवरूपंचनान्यदस्तीतिकिंचन॥७॥तथापिश्रूयतांधेन
तत्कथयामियथाश्रुतं॥लिंगानिचऋषिश्रेष्ठाःपृथिव्यांयानिता

शिव॰ निह ॥ ८ ॥ पाताले चापि वर्तंते स्वर्गे चापि तथैव ह ॥ सर्वैश्च पूज्यते शंभुः
१५० सदेवासुरमानुषैः ॥ ९ ॥ तथापि शंभुना व्याप्तं सदेवासुरमानुषं ॥ अनु
ग्रहाय लोकानां लिंगानि च महेश्वरः ॥ दधाति विविधान्यत्र तीर्थे चै
वस्थले पुनः ॥ यत्र यत्र यदा शंभुर्भक्त्या नक्कैश्च संस्मृतः ॥ ११ ॥ तत्र त
स्थि त्रावतीर्याथ कार्यं कृत्वाथ संस्थितः ॥ लोकानामुपकारार्थं लिंगं
चैवाप्यकल्पयत् ॥ १२ ॥ तल्लिंगं पूजयित्वा च सिद्धिं समधिगच्छति ॥
तेषां चापि न विद्यते संख्या च ऋषिसत्तमाः ॥ १३ ॥ तथापि प्रकटं तां स
म्यग् यथाज्ञानं यथाश्रुतं ॥ पृथिव्यां यानि लिंगानि तेषां संख्या न १५०
विद्यते ॥ १४ ॥ तत्रापि च प्रधानानि कथ्यंते च मया पुनः ॥ यत्स्मृ

त्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ १५ ॥ प्रधानेषु च यानीह
मुख्यानि च वदाम्यहं ॥ लिंगानि ज्योतिषां चात्र विद्यंते ऋषिसत्तमाः ॥ १६
तान्यहं कथयाम्यद्य श्रुत्वा पापं व्यपोहति ॥ सौराष्ट्रे सोमनाथं च श्री
शैले मल्लिकार्जुनं ॥ १७ ॥ उज्जयिन्यां महाकालमोंकारममरेश्वरं ॥
केदारं हिमवत्पृष्ठे डाकिन्यां भीमशंकरं ॥ १८ ॥ वाराणस्यां विश्वेश्वरं
त्र्यंबकं गौतमीतटे वैद्यनाथं चिताभूमौ नागेशं दारुकावने ॥ १९ ॥
सेतुबंधे तु रामेशं घुश्मेशं च शिवालये ॥ द्वादशैतानि नामानि प्रात
रुत्थाय यः पठेत् ॥ २० ॥ सर्वपापविनिर्मुक्तः सर्वसिद्धिफलं लभेत्
यं यं काममपेक्ष्यैव पठिष्यंति नरोत्तमाः ॥ २१ ॥ तस्य तस्य फला

शिव० १५१ वाग्निर्नविष्यतिनसंशयः॥एतेषांदर्शनादेवपातकंनैवतिष्ठति॥२२
॥कर्मक्षयोनवेत्तस्यतुष्टोयस्यमहेश्वरः॥ज्योतिषांचैवलिंगानिदृ
ष्टानिकृषिसत्तमाः॥२३॥तेषांचजननीगर्भवासोनैवभवेत्पुनः॥एते
षांपूजनेनैववर्णानांदूषणंस्मृतं॥नैवेद्यंचैवसंग्राह्यंभोजनीयंप्र
यत्नतः॥भुंक्तेसर्वाणिपापानितस्यनाशंयांतितत्क्षणात्॥२५॥ज्यो
तिषांचैवलिंगानांफलंवक्तुंनशक्यते॥एकंचपूजितंयेनषण्मा
संच[illegible]निरंतरं॥२६॥तस्यदुःखंनजायेतमातृगर्भसमुद्भवं॥छा
नयोनौयदाजातोज्योतिर्लिंगंचपश्यति॥२७॥तस्यजन्मभवेत्तत्र
विमलेसुकुलेपुनः॥सुकुलेजन्मसंप्राप्यधनाढ्योवेदपारगः १५१

२८॥शुभंकर्मततःकृत्वामुक्तिंयात्यनपायिनीं॥म्लेच्छोवाप्यंत्यजो
वापिषंढोवापिमुनीश्वराः॥२९॥द्विजोभूत्वालभेन्मुक्तिंतस्माद्दर्श
नंचरेत्॥ अतःपरंचतीर्थेषुस्थलेचैवाथकापुनः॥३०॥प्रधानानि
चवर्त्ततेतेषांनामानिवैतथा॥ज्योतिषांचोपलिंगानिश्रूयतांम
षिसत्तमाः॥३१॥सोमेश्वरस्ययल्लिंगमंधकेशमुदाहृतं॥मह्याः
सागरसंयोगेतल्लिंगमुपलिंगकं॥३२॥मल्लिकार्जुनसंभूतं
भृगुकच्छेथरूपकं॥महाकालस्ययल्लिंगंदुग्धेशमितिविश्रुतं
३३॥उँकारस्यतुयल्लिंगंकर्दमेशमितिस्वयं॥केदारेश्वरसंजा
तंभूतेशंयमुनातटे॥३४॥भीमशंकरसंभूतंभीमेश्वरइतिस्मृतं

शिव०
१५२

विश्वेश्वराद्वयज्ज्ञातं गुरवेश्वरविश्रुतं ॥ ३५ ॥ त्र्यंबकस्यचयश्चोक्तं
सिद्धेश्वर इति श्रुतं ॥ वैद्यनाथेश्वराज्ज्ञातं वैजनाथ इति स्वयं ॥ ३६ ॥
नागेश्वरसमुद्भूतं भूतेश्वरमुदाहृतं ॥ त्रिधिकासरस्वतीतीरे
दर्शनात्पापहारकं ॥ ३७ ॥ रामेश्वराद्वयज्ज्ञातं गुप्तेश्वरमुदाहृतं ॥
घुश्मेशाद्वैवयज्ज्ञातं व्याघ्रेश्वर इति स्मृतं ॥ ३८ ॥ एतानिचप्रधाना
निमुख्यतांचगतानिच ॥ अन्यान्यपिचमुख्यानिश्रूयतांमुनिस
त्तमाः ॥ ३९ ॥ गंगातीरेचमुख्यं तं घ्रास्तं केन विमुक्तकं ॥ कृतवासेश्व
रः साक्षाद्वतलुब्धोद्धदारकं ॥ ४० ॥ तिलभांडेश्वरश्चैवदशाश्वमे १५२
धएवच ॥ गंगासागरसंयोगे संगमेश्वर इति स्मृतः ॥ ४१ ॥ यमु

नातीरके यच्च गोधूमेश्वरएवच ॥ नीलेश्वर इति ख्यातो वृंदावनस
मीपगः ॥ ४२ ॥ भूतेश्वरोयथाप्रोक्तः सर्वार्थसाधकोनृणां ॥ नारीश्व
र इति ख्यातः ॥ कौशिक्यास्तुसमीपतः ॥ ४३ ॥ कटुकेश्वरनामासीत
वर्ततेगण्डकीतटे ॥ पूर्वेश्वर इति ख्यातः पुष्करस्यसमीपतः ॥ ४४ ॥
मंडकेश इति ख्यातः फल्गुतीरेसदाप्तुतः ॥ सिद्धनाथेश्वरश्चैव
दर्शनात्सिद्धिदोनृणां ॥ ४५ ॥ दूरेश्वर इति ख्यातः पतनेचोत्तरेतथा
मृगेश्वरश्चनाम्नावै वैजनाथस्तथैवच ॥ ४६ ॥ नर्मदातीरके संति
तेषांसंख्यानविद्यते ॥ साचरुद्रस्वरूपाहि दर्शनात्पापहारकाः
४७ ॥ तत्रस्थितास्त्वयेकेचित्पाषाणाःशिवरूपिणः ॥ तथापि

रे०
१५३ पि संप्रवक्ष्यामि यथा तानि मुनीश्वराः ॥ ४८ ॥ आवर्त्तेश्वरनामा हि वर्त्ते
तेपापहारकः ॥ पद्मेश्वर इति ख्यातः सिद्धेश्वरस्तथैव च ॥ ४९ ॥ कुसुमे
श्वरश्च तत्रैव कुमारेश्वर एव च ॥ पुंडरीकेश इति ख्यातो मंडपेश्वर ए
व च ॥ ५० ॥ तीक्ष्णोग्रा नाम तत्रासीत् दर्शनात्पापहारकः ॥ धुंधुरेश्वर
नामापि वर्त्तते नर्मदातटे ॥ ५१ ॥ शूलेश्वर इति ख्यातः कुंभेश्वरस्तथा
पि च कुबेरेश्वर नाम्ना वै विख्यातो नु वनत्रये ॥ ५२ ॥ ततः सोमेश्वरो
देवो नीलकंठ इति स्वयं ॥ मंगलेशू इति प्रोक्तो मंगलाय ततं नमः
तः ॥ ५३ ॥ ततश्च नंदिको देवो ड स्याकोटिनिवारकः ॥ नंदिकेशं च य १५३
श्चैव पूजयेत्परया मुदा ॥ ५४ ॥ तस्य तस्याखिला सिद्धिर्भविष्यति

न संशयः ॥ तत्र तीरे च यः स्नाति तस्य पापं विनश्यति ॥ ५५ ॥ ऋषय ऊ
चुः ॥ एवं माहात्म्यं कथं तत्र कथ्यतां वत्स याधुना ॥ सूत उवाच ॥ सम्य
गुक्तं त्वया विप्राश्च कथयामि यथा श्रुतं ॥ ५६ ॥ पुरा युधिष्ठिरेणैव पृष्टश्च
ऋषिसत्तमः ॥ रेवायाः पश्चिमे तीरे कर्णिकी नाम वै पुरी ॥ ५७ ॥ तत्र द्वि
वरः कश्चित्तत्रत्यकुलसंभवः ॥ काश्यपागतश्च पुत्राभ्यां अर्प्पयि
त्वा सपत्निकां ॥ ५८ ॥ कदाचित्स मृतस्तत्र पुत्राभ्यां च कृतं तदा ॥ त
दा यं चैव कृत्यं च संपाद्य पुत्रकावुभौ ॥ ५९ ॥ पत्नी च पालयामास
पुत्रौ पुत्रहितैषिणी ॥ पुत्रौ परिणायित्वा वै वित्तं किंचिद्धनं तदा ॥ दे
स्त्रीयं च रक्षितं किंचित्क्रियत्कालं स्थिता तदा ॥ कदाचित्स्त्रियणा

सापुण्यंचविविधंतया॥५१॥कृत्वाप्राणान्नमुच्येतकष्टंदृष्ट्वाथपुत्र॰
कोऽभवत्तुमतिरंतत्रकिंनूनंविद्यतेतव॥५२॥यन्न्यूनंप्रियतांमात
स्तदावांकरवावहै॥इत्युक्तंचतयातत्रन्यूनंविद्यतेवक॥५३॥तदेव
क्रीयतेचदेवसुखेनमरणंभवेत्॥ज्येष्ठपुत्रश्चयश्चासीत्तेनोक्तंक
थ्यतेतया॥५४॥तयाचप्रार्थितंह्येनतत्पुरामेमनसस्थिता॥कारणं
गंतुंतथानासीदिदानींमीयतेपुनः॥५५॥ममास्थिनित्वयापुत्र
क्षेपणीयान्यतंद्रितः॥गंगाजलेप्लुतंनेयत्नविप्यतिनसंशयः॥
इत्युक्तेचतयापुत्रवचनंवेदमब्रवीत्॥मातस्त्वयासुखेनैवप्राणा
स्त्याज्यानसंशयः॥५७॥नवकार्यंपुराकृतापश्चात्कार्यंमदीयकं

इतिहस्तेवचोदत्वायावत्सुतोगृहंगतः॥५८॥तावत्साचमृतातत्रहरि
स्मरणतत्परा॥तस्याश्चैववचयत्कृत्यंतत्सर्वंसंविधायवै॥५९॥मा
सिकंचैवकृत्वातुगमनायप्रचक्रमे॥द्वयोश्रेष्ठतमोयोवैसुवादो
नामविश्रुतः॥६०॥तदस्थीनिसमादायनिस्सृतस्तीर्थकाम्यया॥सं
गृह्यसेवकंकंचित्तेनैवसहितस्तदा॥६१॥आश्वास्यनार्यांपुत्रां
श्चमातुःप्रियचिकीर्षया॥श्राद्धदानादिकंसोऽन्यंकृत्वाविधिमनुत्त
मं॥६२॥मंगलस्मरणंकृत्वानिर्जगामद्विजःस्वयं॥तद्दिनंयोजनं
गत्वावसतिंग्रामकेऽस्तुते॥६३॥द्विजगेहेतदाकृत्वासंध्यादिविधि
पूर्वकं॥यामिनीचगतातत्रमूर्ध्नीनंवयसंमता॥६४॥सेवकेनत

त्रिव०
१५५

दायुक्तो ब्राह्मणः संस्थितस्तदा ॥ स्तवादि कृतवांस्तत्र हरेरद्भुतक
र्मणः ॥ ६५ ॥ एतस्मिन् समये तत्र वाह्यं यं वा न वत्सदा । गौश्चैवागव
तत्रस्थं गणो वध्वितां शुभा ॥ ६६ ॥ एवं वै ब्राह्मणस्तत्र ह्याऽगामव
दिगतिः । प्रियगो क्षुधानैव ऽस्तुक्ता वत्समानयत ॥ ६७ ॥ दोहनार्थं
समाहूय स्त्रियं शीघ्रतरं तदा ॥ वत्सं कीलेस्वयं बध्नुं यत्नं चैवाक
रोत्तदा ॥ ६८ ॥ वत्सोपि कर्पमालाश्च पादेन पादपीडनं । चकार ब्राह्म
णस्यैव ब्राह्मणः क्रोधमूर्छितः ॥ ६९ ॥ वत्सं च ताडयामास रूपेण
दृढतरं तदा ॥ वत्सोपि पीडितस्तेन नऽगंतश्चैवान वत्तदा ॥ ७० ॥ दुग्ध्वा १५५
तु मचिंतोनैव क्रोधेन च द्विजन्मना ॥ गोर्दुःखं तु महन्नात्रारोद

नं चाकरोत्तदा ॥ ७१ ॥ दृष्ट्वा वत्सरुदंतं तस्या वत्सो वाक्यमथाब्रवीत ॥ कथं च
रुघ्ते मातः किं दुःखं तेऽद्युपस्थितं ॥ ७२ ॥ पुत्रस्य वचनं श्रुत्वा गोश्च वाक्य
मुपाददे ॥ श्रूयतां पुत्र मे दुःखं वत्कुंभ क्रोम्यहं न हि ॥ ७३ ॥ दुष्टेन ताडितस्त्वं
च तेन दुःखं ममाप्यभूत ॥ तद्वचश्च तदा श्रुत्वा वत्सश्च वचनं पुनः ।
७४ ॥ किं कर्तव्यं धिगंतव्यं कर्म वध्नावयं यतः । कृतं चैव यथा पूर्वं भु
ज्यते च तथा पुनः ॥ ७५ ॥ एतद्देशे यथा जातायदि छसितयाऽऽकरु । ह
संश्चक्रीयते कर्मरुदंश्च परिभुज्यते ॥ ७६ ॥ दुःखदाता तदा नास्ति
सुखदाता न कश्चन ॥ अहं चापि करोम्यत्र मिथ्याज्ञानं न दुष्यते
७७ ॥ सुखं च जायते तेन दुःखं तेनापि संभवेत ॥ तस्माच्च पूज्य

तेकर्मसिर्वंचिकर्मणिस्थितं ॥७८॥ त्वंचैवाप्यहंचैवस्वमेजीवादयश्चये
तेसर्वेकर्मणावध्दानशोच्याःकर्हिचित्त्वया ॥७९॥ एवंवचस्तुपुत्रस्यश्रु
त्वागौरब्रवीदिदं ॥ वत्ससर्वंविजानामिकर्माधीनाःप्रजाःस्वयं ॥८०॥
तथापिमाययाग्रस्तादुःखंप्राप्नोम्यहंपुनःरोदनेचतथाकृत्वादुःख
शांतिर्नविन्दसि ॥८१॥ इत्येतद्वचनंश्रुत्वामातरंवाक्यमब्रवीत् ॥ यद्ये
वंचविजानासिपुनःश्चरोदनंकथं ॥८२॥ कृत्वाचसाध्यसेकिंचतस्मा
दुःखंत्यजाधुना ॥ एवंपुत्रवचःश्रुत्वामाताचैवाब्रवीदिदं ॥८३॥ मम
दुःखंनदृश्यतेह्यद्यदादुःखंनयाविधंनवेद्म्यत्रासिनास्येवदुःखदास्या
मिवेदहं ॥८४॥ यथाचब्राह्मणाश्चैवमननिमित्तास्यतेस्वयं ॥ पुत्रजन्मेच

यद्दुःखंईदृशंतद्भवेत्पुनः ॥८५॥ ज्ञातश्चैवंमयापुत्रश्रृंगेणैवहनिष्य
ते ॥ हतस्यजीवितंसद्योहास्यतेनात्रसंशयः ॥८६॥ इत्युक्तस्तुपुत्रर्वश्रो
मातरंवाक्यमब्रवीत् ॥ प्रथमंकृतंकर्मतत्फलंभुज्यतेधुना ॥८७॥ अ
स्यचब्रह्महत्यायामातःकिंप्राप्स्यसेपुनः ॥ मारितश्चसुतमातमार्यि
तांत्वंवृथाकृथाः ॥८८॥ श्रुत्वेनप्राप्यतेस्वर्गोदुष्टेनपततेपुनः ॥ समा
प्यांचनवेज्जन्मक्षयेमुक्तिरवाप्यते ॥८९॥ कदापिकर्मणोनाशोतस्य
भोगःप्रजायते ॥ तस्मात्त्वपुनरेवत्वंमाकर्मकर्तुमुद्यता ॥९०॥ अहंकः
पुत्रत्वंतेद्यत्वंमाताकृतएवच ॥ कमाताकःपितावुद्धिःस्वामीकाचक
लेवरं ॥९१॥ नकोपिकस्यचास्तीहसर्वेपिस्वकृतंभुजः ॥ एवंज्ञात्वात्वं

शिव०
२५१

यामातदुःखंत्वात्यंश्रुत्वंकुरु ॥९२॥ पुत्रवाक्यंपुनःश्रुत्वावचनंचाब्रवी
दिदं ॥ एवंजानाम्यहंपुत्रमायाबलवतीप्रभोः ॥९३॥ अहंत्वजानामितां
मायांमायामांनःस्वजत्यसौ ॥ तदुःखंचमयादृष्टंतदुःखंदृष्टंममपु
नश्चब्रह्मस्वरूपायानाम्नायत्रमवेदिह तल्लिलंचमयादृष्टंहत्वाचैव
गमिष्यति ॥९५॥ द्विजपुत्रंतदाहत्वात्वयाममंगंनविष्यति ॥ पश्चाद्वै
वपुनःश्वेतमानिज्ञातमिदंध्रुवं ॥९६॥ इत्येतद्वचनंश्रुत्वावसेनो
क्तंनकिंचन ॥ तयोस्तदद्भुतंश्रुत्वापांथोद्विजस्तया ॥९७॥ इ
दंदृष्टमयाप्रातर्गंतव्यंपुनरेवहि ॥ ॥ इति २५१

प्रातःकालेतदाजातेगृहस्वामीसमुत्थितः ॥ किमर्थंसुप्यतेपांथप्राप्त
कालोत्रवेदिह ॥१॥ तेनोक्तंश्रूयतांब्रह्मन्नुत्थितामुहूर्तेचगम्यते ॥ व्य
थाचपरिवर्त्तेतन्नारीरेसेवकस्यच ॥२॥ इत्येवंचमिषंकृत्वासुप्तापपु
रुषस्तदा ॥ होहनस्यतदाकालेब्राह्मणःपुत्रकेप्रति ॥३॥ मयात्वगम्य
तेपुत्रकार्यार्थंकुत्रचित्पुनः ॥ पुत्रःसमुत्थितस्तत्रवत्संचमुक्तवांस्त्व
दा ॥४॥ मातावचतस्यदेहार्थमाजगामस्वयंतदा ॥ द्विजपुत्रस्तदावत्सं
बध्वंतुकीलेतताडयत् ॥५॥ बंधनार्थंयदानीचैर्जातोयंद्विजबालकः
पुनर्गौश्चितदाकुद्धाश्रृंगेणताडयच्चतं ॥६॥ मर्मणिताडितःसोपिमृ
त्युंप्राप्यपपातह ॥ लोकाश्चमिलितास्तत्रगवाबालोपिहंसितः ॥७॥
ता

शिव०
१५८

जलं जलवदं तस्तेपि श्रद्धायेच संस्थिताः ॥ यत्नश्चकीति यावत्तावद्दी
लोमतस्ततः ॥ ८ ॥ मृते च बालके तत्र हाहाकारो महानभूत ॥ किंकरोति
तदागां च ताडयित्वा प्रमोचसा ॥ ९ ॥ गौश्चैव श्वेतवर्णाभूत्तदा रूपमाद्य
दृश्यत ॥ अहो च दृष्ट्वा तां लोकाश्चुकुशुश्च परस्परं ॥ २० ॥ ब्राह्मणश्च तदा
पांथः दृष्ट्वाश्चर्यं विनिर्गतः ॥ यत्र गौश्च गता तत्र तामनु ब्राह्मणो गतः
२१ ॥ ऊर्ध्वपुच्छं तदा कृत्वा शीघ्रगा नर्मदां प्रति ॥ आगत्य नंदिकस्यास्य
समीपे नर्मदाजले ॥ २२ ॥ त्रिवारं मज्जयित्वा तु श्वेतत्वं च गता हि सा ॥ य
थागतं गता सा च ब्राह्मणो विस्मयं गतः ॥ २३ ॥ अहो धन्यतमं तीर्थं १५८
ब्रह्महत्यानिवारकं ॥ स्वयं च मज्जितस्तत्र ब्राह्मणः सेवकस्तदा ॥ २४

मज्जयित्वागतौ तौ च प्रशंसंतौ नदीं तदा ॥ मार्गे च मिलिता काचित्सु
दरी रूपणान्विता ॥ २५ ॥ तयोक्तं त्वं कुतो यासि सत्यं ब्रूहि ममाग्रतः ॥
एवं वचस्तदा श्रुत्वा द्विजेनोक्तं यथातथं ॥ २६ ॥ पुनश्चायं द्विजस्तत्र त
योक्तः स्थीयतां त्वया ॥ तयोक्तं च समाकर्ण्य स्थितः । किं कथ्यते वद ॥ २७
सावाद पुनरेवाह ब्राह्मणं सुंदरी तदा ॥ त्वया दृष्टं स्थलं यच्च तत्रास्थिनि
क्षिपाधुना ॥ २८ ॥ साक्षाद्दिव्यमयं देहं यत्त्वया प्राप्स्यसि सद्गतिं ॥ वैशाखे
चैव संप्राप्ते सप्तम्यां च दिने शुभे ॥ सितपक्षे सदा गंगा आयाति द्वि
जसत्तम ॥ अद्यैव सप्तमी सा च गंगाहं यामि तत्र वै ॥ २९ ॥ इत्युक्त्वांत
र्दधे देवी द्विजोपि परिवर्जितः ॥ आगत्यास्थि क्षिपेद्यावत्तावन्माता

शिव० १५० मद्दृश्यत ॥ २१ ॥ दिव्यदेहत्वमापन्ना दत्वाशिषं दिवं गता ॥ धन्यासि कृत
कृत्यासि पावितं च कुलं त्वया ॥ २२ ॥ धनधान्यं तथा चायुर्वंशश्च वर्द्ध
तां तव ॥ इत्याशिषं पुनर्दत्वा गता सा स्वसुतं मां गती ॥ २३ ॥ ब्राह्मणश्च पु
नश्चात्र क्षिप्यास्थीनि गह्वरे गतः ॥ तद्दिनं हि समारभ्य प्रसिद्धं तीर्थ
मुत्तमं ॥ २४ ॥ नंदिकेशसमीपे तु कृत्वा स्नानं तु तत्फलं ॥ प्राप्यते नात्र
संदेहा मरुतांव वनादिह ॥ २५ ॥ ब्राह्मणी ऋषिका नाम बाला वैधव्य
मागता ॥ पार्थिवं पूजयित्वा तु तपस्तेपे सुदारुणं ॥ २६ ॥ तद्दानंदी
समायातः पार्थिवः ॥ शंकरः स्वयं ॥ प्रसन्नश्च तया नत्र ह्यंशेन स्था १५०
पितस्तदा ॥ २७ ॥ गंगापि च प्रसन्नासीत् प्राह साध्वी नराधुना मद्वर्थं

चैव वैशाखे दिने मे कं त्वया पुनः ॥ २८ ॥ सामीप्यं करणीयं वै तथेनि च स्व
यं वचः ॥ तद्दिनं हि समारभ्य इदं शं तीर्थमुत्तमं ॥ २९ ॥ तत्र स्नातो नरः स
कू म्यक्पापैश्च मुच्यते ध्रुवं ॥ एतत्ते च समाख्यातं यत्पृष्टोहं ऋषिश्वराः
३० ॥ ६

पुनश्च कथ्यतां सूत लिंगानि सन्नमानि
च ॥ सूत उवाच ॥ व्यासेश्वरश्च विख्यातः शुकेशश्च तथैव च ॥ १ ॥ नंदीश्व
र विख्यातो ॐकारेशस्तथैव च ॥ सुरेश्वरश्च विज्ञेयो भूतेश्वर ईति स्वयं
२ ॥ संगमेश्वरस्तथा प्रोक्तो महापातकनाशनः ॥ तश्चतम्निकातीरे कु
मारेश्वर एव च ॥ ३ ॥ सिद्धेश्वरश्च विख्यातो नरेश्वरस्तथैव च ॥ रामेश्वर

त२

पुनः प्रोक्तो दर्शनात् पापहारकः ॥४॥ हुंडेश्वरस्तथा प्रोक्तो कोकंनकेश्व
रपरो मतः । नंदेश्वरस्तथा पंचपुंजेशश्च तथापि हि ॥५॥ पूर्णायां पूर्ण
को नाम वीरेश्वरस्तथा पुनः ॥ गोदातीरे कपालेशाव केचनाश्च तथैव च
६॥ धौतपापेश्वरः साक्षाद्दर्शनपरमेश्वरः ॥ भीमेश्वर इति प्रोक्तः स्वयं
श्वरस्तथापि हि ।७ नंदेश्वरश्च विज्ञेयो ज्ञानदो लोकपूजितः ॥ त्र्यंबके
स्तत्रिकायां तु गोकर्णेशस्तथापि च ॥८॥ नारुकेश्वर महापुण्यो रामे
श्वरस्तथापि हि । विमलेश्वरनामायः कंटकेश्वर एव च ॥९॥ पूर्वसाग
रसंयोगे धनुकेशस्तथैव च चंद्रेश्वरश्च विज्ञेयश्च इंद्रकांतिफलप्रदः
१०॥ पश्चिमसागरे चैव सिद्धेश्वरः स्वयं स्थितः विल्वेश्वरश्च विख्या

तो ऽंधकेशस्तथैव च ॥११॥ यत्र वैवांधको दैत्यहतश्च शंकरेण च ॥
स्वयं स्वरूप मंत्रेश नधृत्वा सच पुरः स्थित ॥१२॥ आरण्येश्वर विख्यातो
लोकानां सुखदः सदा कर्दमेश्वः परः प्रोक्तः कोटीशश्चार्बुदाचले
१३॥ अचलेश्वरश्च विज्ञेयो बहूनां दुःखहा मतः ॥ नागेश्वरश्च कौ
शक्याः तीरे तिष्टति नित्यशः ॥१४॥ अनंतेश्वरः संप्रोक्तः कल्याण
सुखभाजनं योगेश्वरश्च विख्यातो नंद नामा हरः स्वयं ॥१५॥ वंडी
श्वरश्च यः प्रोक्तः संगमेश्वर एव च तस्यैव पश्चिमतीरे गोतमेश्वर
एव च ॥१६॥ पूर्वस्यां दिशि यानीह तानीह कथयामि ते दक्षिणस्यां
दिशि काश्विरत्नेश्वर इति स्वयं ॥१७॥ लोकानामुपकारार्थमनुस्व

श्रि०द० यामुखायचश्रादुर्भूतः स्वयंदेवसहनाद्दृष्ट्वा सुजीविते ॥१८॥ सएवत्रोक
१६१ रः साक्षादृष्टेन स्वयमेव हि ऽस्येवं वचनंतस्य श्रुत्वातु परमर्षयः ॥१९॥
ऊचुश्च वचनंतत्र कथयमत्रीश्वरोहरः ॥ उत्पन्नः परमा देवस्त्वं कथय
सुव्रत ॥२०॥ सूत उवाच ॥ साधु पृष्टमृषिश्रेष्ठाः कथयामि शृणुतां कथां
यां कथां परमां श्रुत्वा पातकैर्मुच्यते ध्रुवं ॥२१॥ दक्षिणस्यां दिशि यत्र
काम्यदं नाम वैवनं ॥ विख्यातं च मुनिश्रेष्ठाः तपसो हितदं नृणां ॥२२॥ तत्र
चब्रह्मणः पुत्रोह्यत्रिर्नामा ऋषिः स्वयं ॥ तपस्तपति यः साक्षादनुसू
यासमन्वितः ॥२३॥ पूर्वं कदाचिद्दैवेव घना वृष्टिर्न भूत्तदा ॥ शतवा १६१
र्षिकी तु दैवाच्च दुःखिताः प्राणिनस्तदा ॥२४॥ जलेनैव पृथिव्यां तु

दृश्यते मुनिसत्तमाः ॥ वृक्षाः शुष्कास्तदा सर्वे पल्लवानफलानि ह
स ॥ नीसार्थं न जलं क्वापि दृश्यते दुःखितो ऋषि ॥ सार्द्रपर्णानि लब्ध्वै
तरवरा वातादिशीर्णा दृश्या ॥२६॥ आवर्त्तं चैव भूतानां दृष्ट्वा च ऋषिस
त्तमः ॥ साध्वी चैवाब्रवीद्देवि मया दुःखं न सह्यते ॥२७॥ समाधौ च विली
नोऽभूदासने संस्थितः स्वयं ॥ प्राणायामं त्रिरावृत्तं कृत्वा मुनिवरस्त
दा ॥२८॥ ध्यायती स्म परंज्योतिरात्मस्थमात्मना वसः ॥ स्वामिनिध्या
नलीने च त्रिशाव्यास्तं दृष्ट्वा तो गताः ॥२९॥ अन्नं विना तदानेतुमुत्का
ते चगताः ॥ क्षणान्ते ॥ तदैकाकिनी जाता सा सेवयामास तं मुदा ॥३०
पार्थिवं सुंदरं कृत्वा मंत्रेण विधिपूर्वकं ॥ मानसे रूपचारैश्च पूजयि

शिव.
१६२

त्वाच्छिवंपुरः॥३१॥संस्थाप्यस्वामिनंचैवसेवयामाससैवतदा।बद्धांज
लिपुटोभूत्वाप्रकम्प्यस्वामिनंशिवं॥३२॥दंडवत्प्रणिपातेनप्रतिप्र
क्रमणेनतदा।दैत्याश्चदानवाःसर्वेदृष्ट्वातुसुंदरींतदा॥३३॥विकलाश्च
भवंस्तत्रतेजसादूरतःस्थिताः॥अत्रेश्चतपसश्चैवअनुसूयाविशि
ष्यते॥३४॥यावत्कालंतुसादेवीपरिचर्यांचकारसा॥तावद्दंपतीतदात
चनान्यःकश्चित्पुरःस्थितः॥३५॥एवंजातेतदाकालेअत्रिश्चऋषि
सत्तमः॥ध्यानेनचपरमेणैवनाबुध्यतकिंचन॥३६॥अनुसूया
पिसाध्वीस्वामिनंवाशिवंतथा॥नेजनान्यत्परंकिंचिज्जानतीवस्म
सासती॥३७॥तस्यैवतपसासर्वेतस्याश्चभजनेनच॥देवाश्चऋषय १६२.

श्चैवगंगाद्याःसरितःस्तदा॥३८॥विस्मयंपरमंगतादर्शनार्थंसमाय
युः॥तयोस्तदद्भुतंदृष्ट्वाह्यूचुस्तेचपरस्परं॥३९॥उभयोःकिंविशिष्टंचत
पसोभजनस्यच॥अत्रेश्चैवतपःप्रोक्तमनुसूयाभजनंतथा॥४०॥
एतत्सर्वंचतद्दृष्ट्वाऊचुर्वैभजनंवरं॥ईदृशंचऋषिभिश्चैवदुःकरंतुतपः
कृतं॥४१॥एतादृशंतुकेनापिननवेत्स्यन्तदृश्रुवन्॥धन्यायंचतथाध
न्याआवाभ्यांक्रियतेपुनः॥४२॥एतादृशंश्रुतंचैवक्रियतेकेनसांप्रतं
तयोरेवंप्रशंसांचकृत्वातेतुयथागतं॥४३॥गतास्तेचतदातत्रगंगांप
गिरिशंविना॥गंगाचभजतेप्रीतासाध्वीधर्मविमोहिता॥४४॥एनांचै
वोपकारंचकृत्वागच्छाम्यहंपुनः॥शिवोपिध्यानवशोवेगतोनेवकृ

शिव० १६ पांविना ॥४५॥ एवंवक्रियमालोच्य यज्ञातंस्कयतामितिपंचाशत्वत्तथावा
त्रचत्वारिंऋषिसत्तमाः ॥४६॥ वर्षाणिचगतान्यासन् वृष्टिर्नैवाभवत्त
दाथावश्याप्यत्रिगोत्रेवंतपसाध्यानमाश्रितं ॥४७॥ अनुसूयातदानै
वगृह्णामीतीपणाकृता ॥ कदाचिच्चऋषिश्रेष्ठोह्यत्रिर्ब्रह्मविदांवरः
४८ ॥ जाग्रतश्चजलंदेहीत्युवाचचप्रियांप्रति ॥ सापिसाध्वीस्वयंपंच
गृहित्वाथकमंडलुं ॥४९॥ जगामवचनेतत्रजलंचनीयतेकुतः ॥ किंक
रोमिक्कगच्छामिकुतानीयतवैजलं ॥५०॥ इतिविस्मयमापन्नांदृष्ट्वा
गंगासरिद्वरा ॥ तामनुव्रजतेयावत्साब्रवीत्तदाहितां ॥५१॥ प्रसन्ना १६
स्मिचतेदेविनवाज्ञांचकरोम्यहं ॥ तद्वचश्चतदाश्रुत्वाऋषिपत्नीव

चःस्वयं ॥५२॥ कात्वंकमलपत्राक्षिकुतोवात्वंसमागता ॥ इत्युक्तेचवत
यातत्रगंगावाक्यमथाब्रवीत् ॥५३॥ गंगा उ० ॥ स्वामिनःसेवनंदृष्ट्वा
शिवस्यचतथैवच ॥ साध्विधर्मंचितेवीक्ष्यस्थितास्मितववसंनिधौ ॥५४
अहंगंगासमायाताज्जनात्रेश्रुचिस्मितेवरंवृणुतावदहंज्ञातायदि
च्छसिवृणुयत्तत् ॥५५॥ इत्युक्तेगंगयासासाध्वीनमस्कृत्वापुरःस्थिता ॥ उ
वाचचजलंदेहिप्रसन्नासिममाधुना ॥५६॥ इत्येतद्वचनंश्रुत्वागर्त्तं
कुर्वितिसाब्रवीत् ॥ शीघ्रंतयाचतत्कृत्वास्थितंचक्षणमात्रतः ॥५७॥
तत्रसाहिप्रविष्टाचजलरूपमनुत्तदा ॥ आश्चर्यंपरममत्वाजलंच
गृहितंतया ॥५८॥ उवाचवचनंह्येतत्लोकानांसुखहेतवे ॥ यदित्वंच

शिव० १६४ प्रसन्नामेक्षया च वर्त्ते त्वमयि ॥ ५९ ॥ तावत्त्वया च स्थातव्यं यावत्तत्स्वामी स
मागच्छेत ॥ गंगोवाच तदा तां च मया च स्थीयतेत्तदा ॥ ६० ॥ यदा त्वं मा समा
गस्य फलदास्यसि मेनघ ॥ इत्युक्ते च तया तत्र ह्यनयापि कृतं तथा ॥ ६
गृहीत्वा च जलं तत्र दुर्लभं सर्वदेहिनां ॥ आनीय स्वामिने दत्तं दत्वा च
पुरतः स्थिता ॥ ६२ ॥ ऋषिश्चापि जलेनैव बह्वाचम्य विधिपूर्वकं ॥ पपौ ज
लं शुभं तच्च पीत्वा सुखमवाप ह ॥ ६३ ॥ सुखमासंतिकं लब्ध्वा परं विस्म
यमागतः ॥ अहो नित्यं जलं यच्च पीयते तज्जलं न हि ॥ ६४ ॥ इत्थं विचा
र्य तेनैव परितश्चावलोकितं ॥ शुष्कान्वृक्षांस्तथा लोक्य दिशो रू १६४
क्षतरास्तथा ॥ ६५ ॥ उवाच तामृषिश्रेष्ठ नजातं वर्षणं पुनः ॥ तत्कुतः

४तं८

त्वत्समाकल्पनाथेनेति प्रियात्तदा ॥ ६६ ॥ तामुवाच पुनः सोपि जलं नीतं
तस्त्वया इत्युक्ते च तदा तेन विस्मयं परमं गता ॥ ६७ ॥ निवेद्यते मया चेद्दे
तदोलक्षणं भवेन्मम ॥ निवेद्यते यदा नैव व्रतं भंगो भवेन्मम ॥ ६८ ॥ नोभयं
च यथा स्यात्तन्निवेद्यं तत्तथा मया ॥ इति यावद्विचार्यैव तावत्स प्राह पुनः
पुनः ॥ ६९ ॥ उवाच श्रूयतां स्वामिन्यज्जातं कथयामि ते ॥ अनुसूया उ
वाच ॥ शंकरस्य प्रतापाच्च तवैव पुण्यतस्तथा ॥ ७० ॥ गंगा समागता त्रैव
तदीयं तु जलं शुभं ॥ एवं वचस्तदा श्रुत्वा मुनिर्विस्मितमानसः ॥ ७१ ॥ उ
वाच सुंदरि त्वं च सत्यं वायव्यकीमकं ब्रवीषि च यथार्थं त्वमन्यं न दुर्ल
भं त्विदं ॥ ७२ ॥ असाध्यं योगिभिर्यच्च देवैरपि सदा शुभे ॥ तत्त्वैवाच

श्रीव०
१६५

कथंजातंविस्मयोपरमोमम॥७३॥ यद्येवंदृश्यतेदेवैतन्मन्येहंनचा
न्यथाइतितस्यवचःश्रुत्वास्वामिनोवचनेपुनः॥७४॥ आगम्यतोत्वया
नाथदृष्टुमिछानवेद्यदिइत्युक्तातुममादायगतायत्रसरिद्वरा॥७५॥
दर्शयामासतोतत्रगर्त्तेचसंस्थितास्वयंतत्रगत्वाऋषिश्रेष्टाः॥गर्त्ते
चजलपूरिते॥७६॥ आकंठंसुंदरंदृष्ट्वाधन्येयमितिचाब्रवीत्तर्किमदी
यंतपश्चैवकिमन्येषांपुनस्तया॥७७॥ स्तुत्वास्तुत्वाचसंस्नातःसुन
गदुर्लभेजलेआचम्यपुनरेवात्रस्तुतिंचक्रेपुनःपुनः॥७८॥ अनुसूया
पिसस्नापन्नासुंदरेचजलेतदानित्यंकृत्वापुनःसापिस्मापिचैवतथा १६५
पुनः॥७९॥ तदोवाचपुनर्गंगागम्यतेचमयाधुनाइत्युक्तेचपुनःसा

ध्वीतामुवाचसरिद्वरां॥८०॥ यदिप्रसन्नादेवेशोयदास्तिचकृपामयिमह
तांचस्वगावश्चनांगीकृत्यपरित्यजेत्॥८१॥ यद्यपित्वांसम्यक्कृत्वाअ
सम्यकुर्वाणवेदिहतथात्वंचकृपांकर्त्तुमर्हसिमेसरिद्वरे॥८२॥ इत्युक्त्वा
प्रणिपत्यैवस्तुत्वास्तुत्वापुनःपुनः।अत्रिरेवाथगत्वासुंकृत्वास्तवनमु
त्तमं॥८३॥ यथाचेचपुनर्गंगांकृपांकुरुममोपरितामुवाचपुनःसाध्वी
त्वयोस्थेयंतपोवने॥८४॥ ऋषिश्चापितथाचात्रस्थेयंचैवसरिद्वरेतदी
यंतद्वचःश्रुत्वागंगावाक्यमथाब्रवीत्॥८५॥ शंकरार्चनसंभूतंफलंवर्ष
५४॥ सुरुचिर्वरुचिर्वंद्यो वाचस्पतिरहर्पतिः। रविर्विरोचनः स्कंदः शास्ता
वैवस्वतो यमः ॥५५॥ युक्तिरुन्नतकीर्तिश्च सानुरागः परंजयः। कैलासाधि
पतिः कांतः सविता रविलोचनः ॥५६॥ विश्वोत्तमो वीतभयो विश्वभर्त्तानि
वारितः। नित्यो नियतकल्याणः पुण्यश्रवणकीर्त्तनः ॥५७॥ दूरश्रवा विश्व
सहो ध्येयो दुःस्वप्ननाशनः ॥ उत्तारणो दुःकृतिहा विज्ञेयो दुःसहोभवः
५८॥ अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः। विश्वगोप्ता विश्वक

र्त्ता सुवीरो रुचिरांगदः ॥५९॥ जननो जनजन्मादिः प्रीतिमान्नीतिमान्ध
वः ॥ वसिष्ठः कश्यपो भानुः। भीमो भीमपराक्रमः ॥६०॥ प्रणवः सत्पथाचा
रो महाकोशो महाधनः। जन्माधिपो महादेवः सकलागमपारगः ॥६१॥
तत्वं तत्वविदेकात्मा विभूर्विष्णुर्विभूषणः ॥ ऋषिर्ब्राह्मण ऐश्वर्यजन्मम्
त्युजरातिगः ॥६२॥ यज्ञवाहनः पंचब्रह्मसमुत्पत्तिः। विश्वेशो विमलोदयः
आत्मयोनिरनाद्यंतो वत्सलो भक्तलोकधृक् ॥६३॥ गायत्रीवल्लभः प्रां
शुः विश्वावासः प्रभाकरः। शिशुर्गिरिरतः सम्राट् सुषेणः सुरशत्रुहा ॥
६४॥ अमोघोरिष्टनेमिश्च मुकुंदो विगतज्वरः ॥ स्वयंज्योतिस्तनुज्योतिरा
त्मज्योतिरचंचलः ॥६५॥ पिंगलः कपिलः श्मश्रुर्भालनेत्रस्त्रयीतनुः ॥

ज्ञानस्कंदोमहानितिःविश्वोत्पत्तिरुपप्लवः॥६६॥भगोविवस्वानादि
त्योयोगापारोदिवस्पतिः॥कल्याणःगुणनामाचपापहापुण्यदर्शनः६७
उदारकीर्तिरुद्योगीसद्योगीसदसन्मयः।नक्षत्रमालिनोकेशःस्वाधि
ष्ठानपदाश्रयः६८॥पवित्रोपापनाशःकमणिपूरोनभोगतिः॥हृत्पुंडरी
कमासीनःशक्रःशांतोवृषाकपि॥६९॥उष्णोगृहपतिःकृष्णःसमर्थोन
र्थनाशनः।अधर्मशत्रुरज्ञेयःपुरुहूतःपुरुश्रुतः॥७०॥ब्रह्मगर्भोबृहद्ग
र्भोधर्मधेनुर्धनागमः॥जगद्धितैषीसुगतःकुमारःकुशलागमः॥
७१॥हिरण्यवर्णोज्योतिष्मान्नानाभूतरतोध्वनिः॥अरोगोनयनाध्यक्षो
विश्वामित्रोधनेश्वरः॥७२॥ब्रह्मज्योतिर्वसुधामिमहाज्योतिरनुत्तमः॥

मातामहोमातरिश्वानभस्वान्नागहारधृक्॥७३॥पुलस्त्यःपुलहोगस्त्यो
जातुकर्ण्यःपराशरःनिरावरणःनिर्वारोवैरंचोविष्टरश्रवाः॥७४॥आत्म
भूरनिरुद्धोत्रिःज्ञानमूर्तिर्महायशाः।लोकवीराग्रणीवीरश्चंडःसत्य
पराक्रमः॥७५।व्यालकल्पोमहाकल्पोकल्पवृक्षःकलाधरः॥अलंकरि
ष्णुरचलोरोचिष्णुर्विक्रमोन्नतः॥७६॥आयुःशब्दपतिर्वेगीप्लवनःशि
खिसारथिः॥असंसृष्टोतिथिःशक्रःप्रमाथिःपाद्मासनः॥७७॥वसु
श्रवाकव्यवाहःप्रतप्तोविश्वभोजनः॥जप्योजरारिःशमनोलोहिता
त्मातनूनपात॥७८॥बृहदश्वोनभोयोनिःसुप्रतीकस्तमिस्रहाः।नि
दाघस्तपनोमेघःपक्षःपरपुरंजयः॥७९॥मुखानिलःसुनिष्पन्नः

शिव॰ सुरतिः शिशिरात्मकः ॥ वसंतो माधवो ग्रीष्मो नभस्यो बीजवाहनः ॥ ८० ॥
२९२ अंगिरागुरुरात्रेयो विमलो विश्ववाहनः ॥ पावनः पुरुजिच्छक्रस्त्रिविधो
नरवाहनः ॥ ८१ ॥ मनो बुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ॥ जमदग्निर्जल
निधिर्विगालो विश्वगालवः ॥ ८२ ॥ अघरोनुत्तरो यज्ञः श्रेष्ठो निश्रेयसा
लयः ॥ शैलो गगनकुंदाभो दानवारिररिंदमः ॥ ८३ ॥ चामुंडीजनकश्चारु
निःशल्यो लोककल्पधृक् ॥ चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः ॥ ८४ ॥
आम्नायोथ समाम्नायस्तीर्थदेवशिवालयः ॥ बहुरूपो महारूपः स
र्वरूपश्चराचरः ॥ ८५ ॥ न्यायनिर्मायको न्यायो न्यायगम्यो निरंजनः सह २९२
स्रमूर्द्धरिवेद्रः सर्वशास्त्रप्रभंजनः ॥ ८६ ॥ मुंडो विरूपो विक्रांतो दंडी नांदो

गुणोत्तमः ॥ पिंगलाक्षो वज्राक्षो नीलग्रीवो निरामयः ॥ ८७ ॥ सहस्रबा
हुः सर्वेशः शरण्यः सर्वलोकधृक् ॥ पद्मासनः परंज्योतिः परंपारंपरं फलं
८८ ॥ पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ॥ चराचरज्ञो वरदो वरे
शस्तु महास्वनः ॥ ८९ ॥ देवासुरगुरुर्देवो देवासुरनमस्कृतः ॥ देवासुर
महामात्रो देवासुरमहाश्रयः ॥ ९० ॥ देवादिदेवो देवाग्निर्देवासुरवरप्रदः
देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ॥ ९१ ॥ देवदेवमयोऽचिंत्यो देवता
त्मात्मसंभवः ॥ सद्योनिरसुरव्याघ्रो देवसिंहो दिवाकरः ॥ ९२ ॥ विबु
धाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तमः ॥ शिवः ज्ञानरतः श्रीमान् शिखि
श्रीपर्वतः प्रियः ॥ ९३ ॥ वज्रहस्तः सिद्धिखड्गी नारसिंहनिपातनः ॥ ब्र

प्रचारी लोकचारी धर्मचारी धनाधिपः ॥ ७४ ॥ नंदी नंदीश्वरो नत्तोलयव्रतस
धरः शुचिः ॥ लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः ॥ ७५ ॥ सघा
सः स्वगतः स्वर्गः स्वरः स्वरमयः स्वनः ॥ बीजाध्यक्षो बीजकर्ता धर्मकृद्ध
र्मसंभवः ॥ दंभो लोभोर्थवित्शंभुः सर्वभूतमहेश्वरः ॥ श्मशाननिलयस्त्र्य
क्षः सेतुरप्रतिमाकृतिः ॥ लोकोत्तरस्फुटालोकस्त्र्यंबको नागभूषणः ॥
अंधकारिर्मखद्वेषी विष्णुकंधरपातनः ॥ हीनदोषोक्षयगुणो दक्षा
रिः पूषदंतहृत् ॥ धूर्जटिः खंडपरशुः सकलो निष्कलोनलः ॥ अकाल
सकलाधारः पांडुराभो मृडो नटः ॥ पूर्णः पूरयिता पुण्यः सुकुमारः सु
लोचनः ॥ सामगेयः प्रियकरः पुण्यकीर्तिरनामयः ॥ मनोजवस्तीर्थ २८३

करो जटिलो जीवितेश्वरः ॥ जीवितांतकरो नित्यो वसुरेता वसुप्रदः ॥ स
द्गतिः सत्कृतिः सिद्धिः सज्जातिः कालकंटकः ॥ कलाधरो महाकालभूतसत्य
परायणः ॥ लोकलावण्यकर्ता च लोकोत्तरसुखालयः ॥ चंद्रः संजीव
नः शास्ता लोकगूढो महाधिपः ॥ लोकबंधुर्लोकनाथः कृतज्ञः कृतिभू
षणः ॥ अनपायोक्षरः कांतः सर्वशास्त्रभृतांवरः ॥ तेजोमयो द्युतिध
रो लोकानामग्रणीरणुः शुचिस्मितः ॥ प्रसन्नात्मा दुर्जेयो दुरतिक्रमः ॥
ज्योतिर्मयो निरोजो गौगंधाढ्यो मजलेश्वरः ॥ तुंबवीणो महाकोपो विशो
कः शोकनाशनः ॥ त्रिलोकपस्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ॥ अव्य
क्तलक्षणो देवो व्यक्तो विशांपतिः ॥ परः शिवो वसुर्नासासारो मानं

धनोपमः। ब्रह्मा विष्णुः प्रजापालो हंसो हंसगतिर्वयः। वेधा विधाता धाता
च स्रष्टा हर्त्ता चतुर्मुखः। कैलासशिखरावासी सर्ववासी सदागतिः। हि
रण्यगर्भो द्रुहिणो भूतपालोऽथ भूपतिः। सद्योगी योगविद्योगी वरदः
ब्राह्मणप्रियः। देवप्रियो देवनाथो देवज्ञो देवचिंतकः। विषमाक्षो वि
शालाक्षो वृषदो वृषवर्धनः। निर्ममो निरहंकारो निर्मोहो निरुपद्रवः।
दर्पहा दर्पदो दृप्तः सर्वर्तुपरिवर्तकः। सहस्रजित्सहस्रार्चिः स्निग्धः
प्रकृतिदक्षिणः। भूतभव्यभवन्नाथः प्रभवो भूतिनाशनः। अर्थोऽनर्थो
महाकोशः परकार्यैकपंडितः। निष्कंटकः कृतानंदो निर्व्याजो व्याज
मर्दनः। सत्त्ववान् सात्त्विकः सत्यः कीर्तिस्तंभः कृतागमः। अकंपि

तो गुणग्राही नैकात्मा नैककर्मकृत्। सुप्रीतः सुमुखः सूक्ष्मः सुकरो
दक्षिणानिलः। नंदिस्कंधधरो धुर्यः प्रकटः प्रीतिवर्धनः। अपराजितः स
र्वसत्त्वो गोविंदः सत्त्ववाहनः। अधृतः स्वधृतः सिद्धः पूतमूर्तिर्यशोध
नः। वाराहशृंगधृक्शृंगी बलवानेकनायकः। श्रुतिप्रकाशः श्रुतिमा
न्नैकबंधुरनेककृत्। श्रीवत्सलः शिवारंभः शांतभद्रः समो यशः। भू
शयो भूषणो भूतिर्भूतकृद्भूतिभावनः। अकंपो भक्तिवरदो वि वि
ध्यतु विशारदः। शुभदः शुभकर्ता च शुभनामा शुभः स्वयं। अनर्थि
तो गुणग्राही ह्यकर्ता कनकप्रभः। स्वभावभद्रो मध्यस्थः शिवघ्नो वि
घ्ननाशनः। शिखंडी कवची शूली जटी मुंडी च कुंडली। अमृत्युः स

शिव० २८५

र्वदकसिंहस्तेजोराशिर्महामणिः॥असंख्येयोप्रमेयात्मावीर्यवान्
वीर्यकोविदः॥वेद्यश्चवियोगात्मापरावरमुनीश्वरः।अनुत्तमोदुरा
धर्षोमधुरःप्रियदर्शनः॥सुरेशःशरणंसर्वःशब्दःपतपतांगतिः।का
लःपक्षंकालकारीसुकृतीःकृतवासुकीः।महेष्वासोमहीभर्तानिष्क
लंकोविशृंखलः।द्युमणिस्तरणीर्धन्यःसिद्धिदःसिद्धसाधनः॥विश्व
तःसंवृतस्तुत्योव्यूढोरस्कोमहाभुजः॥सर्वयोनिर्निरातंकोनरनाराय
णःप्रियः।निर्लेपोनिःप्रपंचात्मानिर्व्यंगोव्यंगनाशनः॥स्तव्यःस्तवप्रि
यःस्तोताव्यासमूर्तिर्निराकुलः॥निरवद्यपदोपायोविद्याराशिरसंत्रितः
प्रशांतबुद्धिरक्षुण्णःसंग्रहोनित्यसुंदरः॥वैयाघ्रधुर्योधात्रीशःशाक २८५

ल्यःशर्वरीपतिःपरमार्थगुरुर्दृष्टिर्गुरुराश्रितवत्सलः॥सोमोर
सज्ञोरसदःसर्वसत्वावलंबनः।एवंनाम्नांसहस्रेणतुष्टाववृषभध्व
जं॥स्नापयामासचशंभुंपूजयामासपंकजैः॥परिक्षार्थंहरेःपूजाकम
लेषुमहेश्वरः।गोपयामासकमलंतदैकंभुवनेश्वरः॥हृदिविचारितं
तेनकृतोवैकमलंगतं॥यातयातुसुखेनैवनेत्रंकिंकमलंनहि॥ता
त्वातुनेत्रमुद्धृत्यसर्वसत्वावलंबनं॥पूजयामासभावेनस्तवयामास
तेनच॥मामेतिव्याहरन्नेवप्रादुरासीज्जगद्गुरुः।ततस्तवमयोदृष्ट्वा
तथाभूतंहराहरिः॥तस्माद्वततारांशुमंडलात्पार्थिवस्यसः॥यथा
करूपिणंशंभुंतेजोराशिसमुत्थितं॥इत्थंभूतंहरिर्दृष्ट्वाकोटिनास्का

शिव०
२९६

रन्यूषितं॥ नमस्कृत्य पुरःस्थित्वा स्तुतिकृत्वा स्तुतिकृत्वा विशेषतः
प्रसन्नवदनो भूत्वा शंभुस्तस्य सन्मुखः स्थितः॥ प्रणमामीश्वरं शंभुं देवदे
वं जनार्दनः॥ तदा प्राह महादेवं प्रहसन्निव शंकरः॥ संप्रेक्ष्यमाणवि
ष्णुं कृतांजलिपुटं स्थितं॥ श्लोक २७०॥ ज्ञातं मया देव सकलं देवकार्यं ज
नार्दनं॥ सुदर्शनाख्यं चक्रं वददामि तव शोभनं॥ यद्रूपं भवता दृष्टं स
र्वलोकसुखावहं॥ हितायतव देवेश कृतं नाव्यय सुव्रतः॥ रणाजिरे पि
सम्मसदेवानां दुःखनाशनं॥ इदं चक्रमिदं रूपमिदं नामसहस्रकं॥
ये स्मरंति तदा नत्वा सिद्धिः स्यादनपायिनी॥ एवमुक्त्वा ददौ चक्रं सू २९६
र्यायुतसमप्रभं॥ विष्णुरपि व संस्नात्वा जग्राह ह्योदृष्टुरवल्लदा॥ नम

स्कृत्य तदा देवं पुनर्वचनमब्रवीत्॥ शृणु देव मयाधोयं पवनीयं च कि
प्रभो॥ दुःखनाशनार्थाय हि वदत्वं लोकसंकर॥ इति दृष्टस्तदा तेन संतुष्ट
स्तु शिवोब्रवीत्॥ रूपधेयं मदीयं देव सर्वानर्थविनाशनं॥ अनेकदुःख
नाशार्थं पद्यनामसहस्रकं॥ धार्यं चक्रं सदा मेघ सर्वानर्थप्रशांतये
अन्ये च ये पविशंति स्मरावतो हि निसशः॥ तस्य दुःखं न स्वप्नेपि जा
यते नात्र संशयः॥ राज्ञां च रंटके चाप्येशाता रत्रिं च रेघदा॥ सांगां च वि
धिपुक्तां हि कल्याणं लभते नरः॥ रोगनाशकरं ह्येतत् विद्यादायक
मुत्तमं॥ यमुद्दिश्य फलश्रेष्ठं पठति फलमुत्तमं॥ लभते नात्र संदेहः
सत्यमेव वरुतं मम॥ प्रातः समुत्थाय यश्चैव पूजां कुर्यात् मदीयकां॥

शिव० पवतेमत्समक्षंवैनित्यसिद्धेनहरतः ॥ इहिकासिद्धिमासाद्यपरलो
२७ कसमुद्भवां ॥ प्राप्नोतिपावकोनित्यंमत्प्रसादात्सुरेश्वरः ॥ सायुज्यांमु
क्तिमायातिनात्रकार्याविचारणा ॥ एवमुक्त्वातदाविष्णुंशंकरःप्रीति
मानसः ॥ उपस्पर्शकराभ्यांवैउवाचशंकरःपुनः ॥ वरदोस्मिसुरश्रे
ष्ठवरान्वरयेप्सितान् ॥ भक्त्यारक्षीकृतोनंस्तवेनानेनदेहुनः ॥ इ
त्युक्तोदेवदेवेनदेवदेवंप्रणम्यतं ॥ यदेदानींकृपादेवक्लीपयेवास्य
तःपरं ॥ कार्यविवाहिद्वेषिणाकूपाच्युत्वाख्ययाप्रभो ॥ त्वयिभक्तिर्मह
हिवप्रसीदवरमुत्तमं ॥ मान्याहिष्ठामिनक्लानाआत्रयोमेवयस्य २७
नो ॥ तच्छ्रुत्वावचनंतस्यदयावानमुतरांभवः ॥ यस्यस्मरातिदातस्मै

अहांसीतंस्थुलक्षणः ॥ आहत्वनेमहादेवःपरमानंदमच्युतं ॥ मयिभक्ति
श्चवंद्यश्चपूज्यश्चैवसुरैरपि ॥ विष्णुमरतदायांवैनामपापहरंपरं ॥ नवि
ध्यातिनसंदेहोमत्प्रसादात्सुरोत्तम ॥ इत्युक्त्वांतर्दधेरुद्रोभगवान्नीललो
हितः ॥ जनार्दनोभगवानवचनाच्छंकरस्यच ॥ प्राप्यचक्रंशुभंध्यानेस्तो
त्रमेतन्निरंतरं ॥ पपाठध्यायपामासमनकेन्यस्तदुपादितात ॥ अन्येषि
येपठिष्यन्तितंविदंचुतथाफलं ॥ इतिप्रश्नंसमाख्यातंश्रवणंनांपापहार
कं ॥ अतःपरंचकिंश्रोतुमिच्छथवेपुनः ॥ ॥ इतिश्रीशिवपुराणे
विष्णुप्रीतिकरेशिवसहस्रनामैकसप्ततितमोध्यायः ॥७१॥ ॥ऋष
यऊचुः ॥ ॥ धन्योसिकृतकृत्योसिजीवितंसफलंतव ॥ वहून्यश्रव

षिभ्यश्च श्रुतं यच्च पितॄणां गतः॥१॥ स देहश्च नवा नद्य पृच्छ्यते हित मि
ष्णुभिः। कुशलः शिव कृतैेष्णुत स्माच्छ्रुत्वा महेश्वरं॥२॥ केन व्रतेन संतुष्टः
शिवो यस्तुति तस्सुखं। यदनंतं प्रवक्ष्ये तत्तत्त्वं ब्रूहि विशेषतः॥३॥ भुक्ति
मुक्तिफलमेतयेन वैयाम शिष्यकः॥ एतच्च स्कंद ईयं हि श्रुत्वा वचन
मादरे॥४॥ स्कंद उवाच॥ सम्यक्पृष्टं ऋषिश्रेष्ठाः कथयामि यथाश्रुतं॥
यथा नंदिः पृष्ठेन तथा पृष्टं च वेधसा॥५॥ हरिणा च शिवाये च शिवया
च तथा पुनः। कस्मिंश्चित्समये तैस्तु पृष्टं च परमात्मने॥६॥ केन व्रतेन सं
तुष्टो भुक्तिमुक्तिं च यच्छति॥ इति पृष्टस्तदा तैस्तु यदुक्तं तेन वै तदा २९८
७॥ तदहं कथयाम्यद्य शृणुध्वं पापहारकं॥ शिवोवाच॥ शृणु विष्णो

प्रवक्ष्यामि व्रतानामुत्तमं व्रतं॥८॥ वेदानामुपवेदानां स्मृतीनां च तथा पु
नः॥ पुराणानां च सर्वेषां धर्माणां देवसत्तमाः॥९॥ गुह्यानां चैव सर्वेषां सा
रमेकं समुद्धृतं। व्रतानां चैव सर्वेषामेतदेव हितं मम॥१०॥ शिवउ०॥
मुक्तेश्च पापकं ह्येतत्सत्तुष्टय मुदाहृतं। शिवार्चनं रुद्रजपः उपोष्यं शिव
दिनत्रये॥११॥ वाराणस्यां च मरणं मुक्तिरेषां चतुर्विधा॥ अष्टमी सोमवा
रश्च कृष्णपक्षे चतुर्दशी॥ शिवतुष्टिकरं ह्येतन्नात्र कार्या विचारणा च
तुर्थपि बलिष्टं हि शिवरात्रिव्रतं हरे॥१३॥ तस्मात्तदेव कर्त्तव्यं भुक्तिमुक्ति
फलेप्सुभिः॥ एतस्माच्च व्रतादन्यं नास्ति हितं नरं हरे॥१४॥ इत्येतद्व
चनं श्रुत्वा हरिराह शिवं प्रति॥ देवदेव महादेव कथयस्व ममाधुना॥१५॥

शिव॰
२९९

कथंकार्यंव्रतंह्येतत्कस्मिन्मासेयथवापुनः॥ केनैवविधिनादेवकथयत्वं
विशेषतः॥१६॥ लोकानामुपकारायपृच्छामित्वांसदाशिव॥ एतत्सर्वंत्व
यादेवकथनीयंहितायवै॥१७॥ एतत्तुवचनंश्रुत्वाशिवोवचनमब्रवीत्॥॥
शि॰ उवाच॥ इदंव्रतंचसर्वेषांधर्मसाधनमुत्तमं॥१८॥ माघस्यैवासितेपक्षे
याकृष्णावैचतुर्दशी निशीथव्यापिनीग्राह्यापापकोटिविनाशिनी॥१९
तद्दिनेवैवयत्कार्यंश्रूयतांकथयामिते॥ प्रातश्चैवसमुत्थायआनंदं
परमंगतः॥२०॥ दुर्लभंमानुषंजन्मलब्धमसारंचंचलंपुनः॥ सार्थकंचकरो
म्यघव्रतेनानेनवैपुनः॥२१॥ इतिनिश्चित्यमनसाअन्यान्संप्रेरयेन्नरः २९९
शिवरात्रिव्रतंह्येतत्कर्त्तव्यंहितमिच्छुभिः॥२२॥ स्नानंचदंतकाष्टंचकर्त्तव्यंका
त्व

र्यंनरेणच॥ नद्यादौस्नानमात्रंहिदेशकालाविरोधतः॥२३॥ स्वीयंकर्म
प्रकुर्यैवयत्कृतंतद्दिनेतकं॥ तस्माद्वसंनिधिंगछेदनंतफलहेतवे॥
२४॥ पूजांचप्रथमंकृत्वासुपचारैर्यथाक्रमं॥ नमस्कृत्यशिवंपश्चात्
प्रीतिपूर्वंनरोत्तम॥२५॥ देवदेवमहादेवनीलकंठसदाशिव॥ कर्तुमि
च्छाम्यहंदेवशिवरात्रिव्रतस्यच॥२६॥ तवप्रभावाद्देवेशनिर्विघ्नेनन
वित्विति॥ कामाद्याःशत्रवोमांवैपीडांदद्तुवापुनः॥२७॥ दुरालापंचदु
स्पर्शंवासनांविविधांपुनः॥ दिवास्वापंगृहेदेवजलंनैवव्रतावधि॥२८
करिष्यामिचदेवेशप्रतापात्तवसुव्रत॥ इत्येवंनियममास्थायपू
जांद्रव्यंसमाहरेत्॥२९॥ सुस्थलेरचयेल्लिंगंप्रसिद्धंह्यागमेषुच॥

शिव०
३००

रात्रौ तत्र स्वयं गत्वा संपाद्य विधिमुत्तमं ॥ ३० ॥ शिवस्य पश्चिमे भागे दक्षि
णे वा स्थलं शुभं ॥ विधाय चैव तद्द्रव्यं निधाय शिवसंनिधौ ॥ ३१ ॥ पुनः स्ना
त्वा तदा तत्र विधिपूर्वं नरोत्तम ॥ यो वै व्रती भवेत्सद्यः कृत्वा स्नानादिकं
मुदा ॥ ३२ ॥ परिधाय शुभे वस्त्रे अंतर्वासं शुभं तथा ॥ आचम्य च त्रिवारं
हि पूजारंभं समाचरेत् ॥ ३३ ॥ लिंगपूजां प्रयत्नेन ह्युपचारैः समंत्रकैः ॥
अमंत्रकं न कर्तव्यं पूजनं तु हरस्य च ॥ ३४ ॥ यस्य द्रव्यस्य यो मंत्रस्तेन पू
जां समाचरेत् ॥ गीतैर्वाद्यैस्तथा नृत्यैर्भक्तिभावसमन्वितं ॥ ३५ ॥ पू
जनं प्रथमे यामे कृत्वा मंत्रं जपेद्बुधाः ॥ पार्थिवं च तदा श्रेष्ठं विधाय मं
त्रवान् यदि ॥ ३६ ॥ नित्यं च क्रियते चैव तदा च पार्थिवं चर्ययेत् ॥ प्रथमं पा

राम०
३००

र्थिवस्यैव पश्चात्स्थापितं चर्चयेत् ॥ ३७ ॥ पार्थिवं च विधानं हि कर्तव्यं हि न
मिच्छता ॥ स्तोत्रैर्नानाविधैर्देवं तोषयेद्वृषभध्वजं ॥ ३८ ॥ महात्म्ये व्रतसं
भूतं श्रोतव्यं व्रतकारिणा ॥ चतुर्ष्वपि च यामेषु मूर्तीनां च चतुष्टयं ॥ ३९
कृत्वावाहनपूर्वं वै विसर्जनावधि क्रमात् ॥ कार्यं जागरणं तत्र महोत्स
वसमन्वितं ॥ ४० ॥ प्रातःकाले पुनः स्नात्वा स्थापितं पूजयेच्छिवं ॥ पुनः स्ना
त्वा शिवस्यैव नियमांश्च विमोचयेत् ॥ ४१ ॥ अद्य नियमो मया देव कृ
तश्चैव तवाज्ञया ॥ विसृजे तं मया स्वामिन् जातं व्रतमनुत्तमं ॥ ४२ ॥
अनेनानेन देवेश यथाशक्तिकृतेन च ॥ संतुष्टो भव शर्वाद्य कृपां कु
रु ममोपरि ॥ ४३ ॥ पुष्पांजलिं शिवे दत्वा नियमं च विसृज्य च ॥ नमस्का

रं शिवायैव दत्वा दानं यथाविधि ॥ ४४ ॥ संकल्पं च ततः कृत्वा जलं धारां ध्रु
ततः परं ॥ यामे यामे यथा पूजा तां चैव कथयाम्यहं ॥ ४५ ॥ प्रथमे चैव यामे
पुष्पादपि तं पार्थिवं मुने । पूजयेत्परया भक्त्या ह्युपचारैरनेकशः ॥
४६ ॥ प्रयोगादि विधायैव कामनां विनियुज्य च । पंचद्रव्यैश्च प्रथमं पू
जनीयो हरः पुनः ॥ ४७ ॥ दुग्धं दधि मधु सर्पिः शर्कराणां क्रमेण च ॥ त
स्य तस्य च मंत्रेण तत्तद्द्रव्यं समर्पयेत् ॥ ४८ ॥ तत्तद्द्रव्यं तु समर्प्यैव च ज
लधारां प्रदापयेत् ॥ पश्चाज्जलधारानिःद्रव्याणि पुनरर्पयेत्पुनः ॥ ४९
शतमष्टोत्तरं मंत्रं पठित्वा जलधारया ॥ पूजयेच्च शिवं तत्र निर्गुणं गु
णरूपिणं ॥ ५० ॥ गुरुदत्तेन मंत्रेण पूजयेद्वृषभध्वजं ॥ अन्यथा नाम

मात्रेण पूज्यश्चायं सदाशिवः ॥ चंदनेन विचित्रेण तंदुलैश्चाप्यखंडकैः
ततश्चैव तिलैः पूजा कार्या तस्य महात्मनः । ५२ ॥ पुष्पैश्च शतपत्रैश्च कल
वीरैस्तथा पुनः ॥ अष्टभिर्नाममंत्रैश्च पुष्पाण्यारोपयेच्छिवे ॥ ५३ ॥ भव
शर्वस्तथा रुद्रः पुनः पशुपतिस्तथा ॥ उग्रश्चैव ततः प्रोक्तस्ततं परं । ५४
भीमश्चैव तथेशानः श्रीपदं पूर्वकं तदा ॥ चतुर्थ्यंतपदैर्नैव पूजयेत्तं च व
क्रकं ॥ ५५ ॥ पश्चाद्धूपं च दीपं च नैवेद्यं तु ततः परं ॥ प्रथमे चैव नैवेद्यं प
क्वान्नं कारयेत्तदा ॥ ५६ ॥ अर्घं च श्रीफलं दत्वा तांबूलं विनिवेदयेत् ॥ न
मस्कारं ततो ध्यानं जपः प्रोक्तस्ततः परं ॥ ५७ ॥ गुरूपदिष्टमंत्रेणातो य
येत्परमेश्वरं ॥ जपं कृत्वा ततः पश्चात् धेनुमुद्रां प्रदर्शयेत् ॥ ५८ ॥ प

श्राद्धतर्पणं तत्र ब्राह्मणांश्च स्वशक्तितः ॥ एकस्त्वावरूपकं प्रोक्तः यति
रेकस्तथा पुनः ॥ ५० ॥ संकल्पं च तदा कृत्वा गीतं वाद्यं तथा पुनः ॥ नृत्यं चै
व तथा चात्र गानं च विविधं तथा ॥ ६० ॥ कर्तव्यं या ममात्रेण यावद्यामो भ
वेदिह ॥ तत्र तत्पूजाफलं तस्मै निवेद्य परमात्मने ॥ ६१ ॥ नमस्कारं ततः कृ
त्वा संकल्पं संविधाय च ॥ पुनश्च द्वितीये यामे विसृज्यान्यां समाचरेत्
६२ ॥ अथ वैकस्मिन्पार्थिवे द्वितीये प्रहरे पुनः ॥ कुर्यात्पूजां तथा विद्वा
न्भुक्तिमुक्तिफलाप्तये ॥ ६३ ॥ द्रव्यैः पूर्वं तथा पूजां कृत्वाधारां समर्पयेत्
पूर्वतो द्विगुणां मंत्रमुच्चार्य पूजयेच्छिवं ॥ ६४ ॥ चंदनेन ततः पूजां तंदुलैः
पूजने पुनः ॥ जवैश्चैव ततः पूजा कर्तव्या शंकरस्य हि ॥ ६५ ॥ पुष्पैश्चैव च प्र

कर्तव्या कमलैः पूजयेच्छिवं ॥ बिल्वीपत्रैस्तथा वा च कर्तव्यं पूजनं शि
व ॥ ६६ ॥ एवं कृतं व्रतं येन तज्जन्म सफलं भवेत् ॥ भुक्तिं दत्वा च मुक्तिं च
यच्छाम्यत्र न संशयः ॥ ६७ ॥ अर्घं च बीजपूरेण कुर्याद्यामे द्वितीयके ॥ म
या सर्वं तथा पूर्वं कथितं तत्तथैव हि ॥ ६८ ॥ धूपं दीपं च नैवेद्यं पायसान्नं
प्रकल्पयेत् ॥ दत्वा तांबूलकं तत्र दक्षिणां च समर्चयेत् ॥ ६९ ॥ ध्यानं चै
व पुनस्तत्र कृत्वा जाप्यं ततः पुनः ॥ मंत्रानुवर्ति द्विगुणां पूर्वतो पि जना
हृलः ॥ ७० ॥ ततश्च ब्राह्मणानां हि भोज्यं संकल्पमाचरेत् ॥ पूर्ववच्च नम
स्कारं गीतं नृत्यं तथा पुनः ॥ ७१ ॥ कुर्याद्दानं द संयुक्तं यावच्च द्वितीया
वधि ॥ यामे च द्वितीये जाते तृतीये च समागते ॥ ७२ ॥ विसृज्य च शिवं त

शिव
३०३

च पुनर्मूर्तिं प्रकल्पयेत् । स्थापितेवा ततः कुर्यात् पुनः पूजाविधिं हरे
७३ ॥ द्रव्यैः पूजां पुरा कृत्वा पश्चाद्धारां प्रदापयेत् ॥ पूर्ववद्द्विगुणं कुर्या
न्मंत्रेण विधिपूर्वकं ॥ ७४ ॥ ततश्चचंदनेनैव संपूज्य तंडुलैस्तथा । गोधूमैः
पूजनं कुर्याच्छिवप्रीणनतत्परः ॥ ७५ ॥ पुष्पैश्चैवार्कसंभूतैः पूर्वोक्तमंत्र
समन्वितैः ॥ धूपैश्च विविधैस्तत्र दीपैर्नानाविधैरपि ॥ ७६ ॥ नैवेद्यं पूपकै
स्तत्र शाकैर्नानाविधैरपि कृत्वा चैवाथ कर्पूरैरारात्रिकविधिं चरेत् ॥
७७ ॥ अर्घं च दाडिमेनैव दद्याद्वै शंकराय च । नमस्कारं ततो ध्यानं कृ
त्वा मंत्रं जपेत्ततः ॥ ७८ ॥ ततोपि द्विगुणं जाप्यं कृत्वा च ब्रह्मभोजनं । संक
ल्पं दक्षिणां दत्वा कृत्वा दानेन स्वशक्तितः ॥ ७९ ॥ गीतं नृत्यं तथा कृत्वा या ३०३

वद्यामावधिर्भवेत् ॥ यामे च तृतीये जाते चतुर्थे च समागते ॥ ८० ॥ विसर्ज्य
च पुनः पूजां कृत्वा च पार्थिवीं हरे । प्रयोगादि पुनः कृत्वा पूजाविधिं समाचरे
त् ॥ ८१ ॥ द्रव्यैश्च पूजनं कृत्वा जलधारां प्रदापये ॥ पूर्ववद्द्विगुणेनैव मंत्र
जाप्येन वा पुनः ॥ ८२ ॥ चंदनादानसंभूतां पूजां च तंदुलैस्तथा ॥ माषैश्चैवा
य मुद्गैश्च प्रियंगुभिश्च वा पुनः ॥ ८३ ॥ अथवा सप्तधान्यैश्च पूजयेत्पर
मेश्वरं ॥ पुष्पैश्च प्रथमं पूज्यं जातिजैः प्रतियामकं ॥ ८४ ॥ कमलैर्द्वितीयप
त्रैश्च शौरिवपुष्पैस्तथा पुनः ॥ चंपकैर्वा विधानेन बकुलैस्सहितं मिश्रिता ॥
८५ ॥ पूर्वोक्तमंत्रवर्यैश्च नामभिर्वा विशेषतः ॥ संपूज्य शंकरं देवं धूपदी
पक्रमेण च ॥ ८६ ॥ नैवेद्यं तत्र दद्याद्वै माधुर्यैर्विविधैरपि ॥ अथवा चैवमा
पात्रैस्तोषयेच्च सदाशिवं ॥ ८७ ॥ अर्घं दद्यात्कदल्याश्च फलेनैवाथवा

+ वि २

शि० ३०४ यथा हरे ॥ विविधैश्च फलैस्तत्र दद्यादर्घं शिवाय च ८८ ॥ नमस्कारं ततो
ध्यानं कृत्वा जाप्यं समाचरेत् ॥ पूर्ववत्तोषिगुणं तत्र कुर्यात्तूर्ष्यं नरोत्तम ८९ ॥
नमस्कारं ततश्चैव संकल्पं पूर्ववत्तया ॥ गीतवाद्यं पुनश्चैव यावत्स्यादरुणो
दयः ९० ॥ उदयेन्च तदा जाते संप्रार्थ्य शंकरं पुनः ॥ स्नात्वा पूजां पुनः कृत्वा
नानापुष्पाक्षतैरपि ९१ ॥ नानाधूपार्घनैवेद्यैरनिषेकोयथानवेत्तु
सर्वं नावेन तं पूज्य तोषयेच्छंकरं मुदा ॥ ९२ ॥ नानाविधानि दानानि भो
ज्यं च विविधं तदा ॥ ब्राह्मणानां यतीनां च कर्तव्यं प्रहरसंख्यया ॥ ९३ ॥
शंकराय नमस्कृत्य स्तुतिं नानाविधां तदा ॥ पुष्पांजलिं तदा तत्र मंत्रैरे
तैः सुरोत्तम ॥ ९४ ॥ दद्याच्च दाहि नार्घ्याय शिवाय परमात्मने ॥ नावक ३०४
स्तकृता प्राणं त्वयि स्थितो हं सदामृड ॥ ९५ ॥ कृपानिधि इति ज्ञात्वा यथा

योग्यं तथा कुरु ॥ अज्ञानाद्यदि वा ज्ञानाज्जपः पूजादिकं मया ॥ ९६ ॥ कृयां
नि धर्मनिज्ञाता ॥ न्तत ना प्रयमीदमे अनेनैवोपवासेन यज्जातं फलमेव
च ९७ ॥ तेनैव प्रीयतां देव शंकरः सुखदायकः ॥ अनेनैव च पुष्पाणां मंज
लिना प्रतो मम ९८ ॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादेन चैव महेश्वर ॥ पुष्पांजलि
समर्प्यैवं तिलकाशिषमेव च ९९ ॥ गृहीत्वा या ब्राह्मणेभ्यः स्वस्त्ययनं तातं शं
कराय च ॥ विसर्जयेच्छिवं पश्चात्पुनरागमनाय च ॥ १०० ॥ मम कुले सदा
देवनजनंत्स्तु सर्वदा ॥ मानसान्मम देवेश दूरे नैव कदाचन ॥ १०१ ॥ अ
हर्निशं क्षणं वापि विना च स्मरणं तव ॥ स्वसनेन न वै देव सदास्तु हृद
येमम ॥ १०२ ॥ इत्येवं च नमस्कृत्य विसृज्य शंकरं मुदा ॥ जलं नोज्यं तदा कु

शिव० ३०५ त्वासर्वपापक्षयोभवेत् ॥१०३॥ एवंकृतंव्रतंयेननतस्मात् हरोहरोनहि ॥
फलंवक्तुंनशक्येतंनादेयंविद्यतेमम ॥१०४॥ अनेनयासतयाचैदेकृतंव्रत
मनुत्तमं ॥ तस्यैवैमुक्तीबीजंचजातेनात्रविचारणा ॥१०५॥ व्रतमेतत्प्रति
मासंकर्तव्यंऋषिसत्तमा ॥ उद्यानेपेविधिंपश्चात्कृत्वासांगफलंभवे
त् ॥१०६॥ व्रतस्यकरणात्सततंशंकरः सर्वदुःखहा ॥ भुक्तिंदत्वाचमुक्तिं
हिददातेनात्रसंशयः ॥१०७॥ इतिशिववचनं निशम्यविष्णुर्हितत्त
रमद्भुतमागगामधाम ॥ तदनुव्रतमनुत्तमंचविष्णुर्व्यचरतसर्व
हितेप्सुरेनदेव ॥१०८॥ कदाचिन्नारदायैवकथयामासवैहरिः ॥ इ
तिव्रतफलंश्रुत्वादेवाविष्णुमुखात्सदा ॥१०९॥ आनंदंपरमंप्रा ३०५

ऋषय ऊ

प्यसुखंसंधामयमुत्तदा ॥ ॥इतिश्री शिवपुराणेशिवरात्रिमहिमानिरू
पणं नामद्विसप्ततितमोध्यायः ॥ उद्यापनविधिंब्रूहिशिवरात्रिव्रतस्यच
यत्कृत्वाशंकरःसाक्षात्प्रसन्नोभवतिध्रुवं ॥१॥ इतितेषांवचःश्रुत्वासू
तोवचनमाददे ॥ सूतउवाच ॥ श्रृणुतांऋषयःश्रेष्ठाविधिंवक्ष्येयथाश्रु
तं ॥२॥ शिवरात्रिदिनेप्राप्तेनित्यंसंपाद्यवैतदा ॥ शिवालयंततोगत्वा
पूजांकृत्वायथाविधि ॥३॥ गृहीत्वानियमंसोवैव्रतस्यविधिवन्नरः
रात्रौजागरणंकृत्वापूजांयामचतुष्टये ॥४॥ लिंगेचपार्थिवेवापिकृ
त्वाचविधिपूर्वकं ॥ प्रातःकालेसमुत्थायसंकल्प्यशिवसंनिधौ ॥५॥
कुर्यात्तत्रवप्रसादाद्व्रतकरिष्येव्रतमुत्तमं ॥ प्रतिमासंचकर्तव्यंमया

शिव० ३०६ देवत्वदाज्ञया ॥ ६ ॥ निर्विघ्नेनव्रतंह्येतद्भूयतांकृपयानघ ॥ इतिनियमंशिव
स्याग्रेकृत्वाथोह्याह्निकंचरेत् ॥ ७ ॥ विप्राञ्छिवंततोगृह्यनियमंपरिसमा ॥
प्य च ॥ पश्चाच्चतुर्दशींप्राप्यकृष्णपक्षसमुद्भवां ॥ ८ ॥ प्रातःकालेसमुत्था
य तीर्थादौवागृहेपुनः ॥ स्नानादिसर्वंनिःशेषंसमाप्यनियमंचरेत् ॥ ९ ॥
शिवस्यसंनिधिंकृत्वापूजांकृत्वायथाविधिः ॥ अद्यव्रतंमयादेवकर्तव्यं
चत्वदाज्ञया ॥ १० ॥ निराहारतयादेवनिर्जलंविधिवत्प्रभो ॥ कर्तुमिच्छा
मिवदधैर्यंरक्षममप्रभो ॥ ११ ॥ नमस्कृत्यतदाशंभुंकामक्रोधविवर्जि
तः ॥ दिनेदीप्त्वातथारात्रौपूजांयामसमुद्भवां(?) ॥ १२ ॥ कृत्वाजागरणंतत्रप्रा
तःकालावधिस्वयं ॥ जपमंत्रवरैश्चैवगीतनृत्यैस्तथापुनः ॥ १३ ॥ कृत्वा ३०६

पुनस्तदास्नानंपूजांचैवशिवस्यच ॥ विधायब्राह्मणोभोज्यंचभोजयेत्स्वा
मिनंतदा ॥ १४ ॥ अशक्तोचेत्तदाभोज्यंस्वयंभोज्यंततःपरं ॥ तदाशिर्प(?)
त्वागृहेनानाकार्यंसमाचरेत् ॥ १५ ॥ एवंचप्रतिमासंवैकृत्वाव्रतम
नुत्तमं ॥ यावत्त्वशिवरात्रिर्वैपुनरायातिसत्तमाः ॥ १६ ॥ तस्मिन्दिनेस्व
यंकार्यं उद्यापनविधिंचरेत् ॥ ब्राह्मणांश्चतदाहृष्टाञ्छाश्चा(?)
दिपरिशोध्यच ॥ १७ ॥ कर्तव्यंयच्चतत्रैवसर्वंयाकारयेद्ध्रुवं ॥ तदहं
कथयाम्यद्यविधानंविधिपूर्वकं ॥ १८ ॥ उद्यापनदिनेतेनकर्तव्यंश्र
यतात्मना(?) ॥ प्रातर्नित्यंचसंपाद्यमंडलंतत्रकारयेत् ॥ १९ ॥ गौरीति
लकनाम्नावैप्रसिद्धंभुवनत्रये ॥ कर्णास्तत्रप्रकर्त्तव्याप्राजापत्यवि(?)

संज्ञया ।२०। सवस्त्राः सफलास्तत्र दक्षिणासहिताः शुभाः ॥ मंडलस्य च
पार्श्वे वै मोचनीयाः प्रयत्नतः ।२१। मध्ये चैकं घटं संस्थाप्य तत्रोमासहितः
शिवः । दीपश्च दक्षिणे भागे कृत्वा रात्रौ प्रपूजयेत् ॥२२॥ जागरं च ततः कृ
त्वा पूजां याम उद्भवां नरः । रात्रिमाकामयेत्तत्र नृत्यगीतादिना व्रती ॥२३॥
संपूज्य विधिना देवं ॥ वेदोक्तविधिना देवं संतोष्य प्रातरेव च पुनः पू
जां ततः कृत्वा ब्राह्मणान्भोजयेत् ध्रुवं ॥२४॥ दानानि च विचित्राणि कुर्यात्त
शिवाज्ञया ॥ यथाशक्ति विधानेन हि प्राजापत्यविधिं चरेत् ॥२५॥ ब्राह्मणा
न्भोजयित्वा तु शिवाय फलमर्पयेत् देवदेव महादेव शंभो शंकर चेश्व
रः ।२६। व्रतेनानेन देवेश कृपां कुरु ममोपरि । मद्भक्त्यानुसारेण व्रत

मेन कृतं शिव ॥२७॥ अज्ञानाद्यदि वा ज्ञानाज्जपपूजादिकं मया । कृतं तद
स्तु सफलं कृपया तव शंकर ॥२८॥ एवं पुष्पांजलिं दत्त्वा शिवाय परमात्मने
नमस्कारं ततः कृत्वा प्रार्थनां पुनरेव च ।२९। वरणीयस्त्वदीयो मे चिता हृदं
न कर्हिचित् । एवं व्रतं कृतं येन न्यूनं तस्य न किंचन ॥३०॥ मनेप्सितां च सिद्धि
वै लभते नात्र संशयः ॥ यथा तथा व्रतं ह्येतन्मुक्तिबीजं प्रशस्यते ॥३१॥ अ
ज्ञानाज्ज्ञानतो वापि व्रतेन तुष्यते शिवः ॥३२॥ ॥ इति श्री शिवपुराणे शि
वरात्रिविधिनिरूपणं नाम त्रिःसप्ततितमोध्यायः ॥ कृष्णपक्ष ॥
सूत ते वचनं श्रुत्वा ध्यानेदं परमं गताः ॥ प्रभावस्य व्रतस्यास्य श्रुतो विस्त
रात्पुनः ॥१॥ कथय त्वं महाबाहो केनेह फलमुत्तमं ॥ अज्ञानतश्च कृ

त्वादृशात्प्राप्तं किंचन वदाधुना ॥२॥ सूत उवाच ॥ श्रूयतां ऋषयः श्रेष्ठाः कथ
यामि पुरातन ॥ मितिहासं निषादस्य सर्वपापप्रणाशनं ॥३॥ पुरा कश्चिद्व
ने भिल्लो ह्यासीन्नाम्ना दुरुद्रुहः ॥ कुटुंबी बलवान् क्रूरः क्रूरकर्मपराय
णः ॥४॥ निरंतरं वने गत्वा मृगान् हन्यादनेकशः ॥ चौर्यं वा विविधं तत्र क
रोति स वनेचरः ॥५॥ बाल्यादारभ्यते नेह सुकृतं कृतवान किंचन ॥ महान्का
लो व्यतीयाय वने तस्य दुरात्मनः ॥६॥ कदाचिच्छिवरात्रिश्च ह्यासीत्तत्र सु
शोभना ॥ न दुरात्मा स जानाति महद्व्रतमनुत्तमं ॥७॥ तस्मिंश्चैव दिने नि
ध्वो ॥ मात्रा पित्रा स्त्रिया पुत्रैः प्रार्थितो क्षुधयार्दितो भक्ष्यं देहि व ३०८
नेचर ॥८॥ इति संप्रार्थितः सोऽपि धनुरादाय सत्वरं ॥ जगाम मृगहिंसा

र्थं बभ्राम सकलं वनं ॥९॥ दैवयोगात्तदा तेन न प्राप्तं किंचिदेव हि ॥ अस्तं प्रा
प्तस्तदा सूर्यः सोऽपि दुःखमुपागतः ॥१०॥ किं कर्तव्यं क्व गंतव्यं न प्राप्तं वर्त्तनं
मया ॥ बालाश्च ते गृहे ये वै पितरौ च किं नु भविष्यति ॥११॥ मदीयं च कलत्रं च त
स्या किं तु भविष्यति ॥ किंचिद्धृत्वा तु मया गंतव्यं नान्यथा व्रजे ॥१२॥ इ
ति विचार्य तत्रैव जलाशयसमीपगः ॥ जलावतरणं यत्र तत्र गत्वा स्वयं स्थि
तः ॥१३॥ अवश्यमत्र कश्चिद्धि जीवश्चैवागमिष्यति ॥ इति मत्वा तदा वृक्ष
मेकं बिल्वं विसंज्ञिकं ॥१४॥ समारुह्य स्थितस्तत्र जलमादाय वै तदा
रात्रौ तत्र तदा स्थित्वा दृष्टं बध्वा तु सत्वकं ॥१५॥ कदा यास्यति कश्चिद्वै क
दा हन्यामहं पुनः ॥ इति बुद्धिं समास्थाय स्थितो सो क्षुधयाकुलः ॥१६॥

शिव. ३०९ दिवसे चोपवासश्च नप्रामं देत्तने यदा ॥ प्रथमे चैव यामे च मृगी घैकास
मागता ॥ १७ ॥ तृषार्त्ता चकिता सा वै ॥ फल्फालं कुर्वती तदा ॥ तां दृष्ट्वा च तदा
तेन संदधे धनुषि शरः ॥ १८ ॥ तस्यैवं कुर्वतस्तत्र जलं बिल्वदलानि
च ॥ पतितानि ह्यधस्तत्र शिवलिंगमनुत्तबुधा ॥ १९ ॥ यामस्य प्रथमस्यैव
पूजाता शिवस्य च तन्महिम्ना वतस्यैव पातकं ज्वलितं तदा ॥ २० ॥ तत्र प्रसं
च तत्तु दृष्ट्वा सा हरणी भिया ॥ व्याकुला व्याधकं दृष्ट्वा हा बाणेन वधि
ष्यति ॥ २१ ॥ किं करोमि क्व गच्छामि उपायं रचयाम्यहं ॥ इति विचार्य सा त
त्र वचनं चेदमब्रवीत ॥ २२ ॥ मृगी ॥ उवाच ॥ किं कर्तुमिच्छसि व्याध श्रुत्वा व्या ३०९
धो ब्रवीदिदं ॥ व्याधो वाच ॥ कुटुंबं क्षुधितं मे च हत्वा त्वां तर्पयाम्यहं ॥ २३

दारुणं तद्वचः श्रुत्वा दुर्धरं नेव नेचरं ॥ तच्छ्रुत्वा सा मृगी दुष्टा धन्या हं व्या
ध सत्तम ॥ २४ ॥ मृग्युवाच ॥ मन्मांसात्तु सुखं स्याद्धि देहस्यानर्थकारिणः
उपकारकरस्यैवं च सुण्यं जायते त्विह ॥ २५ ॥ तत्तु एवं त्राक्षतेन ववकुं
वर्षशतैरपि ॥ असारस्य सरीरस्य सा फल्यं मे न विष्यति ॥ २६ ॥ परं तु शि
शावो मे गृह वर्त्तते ह्याश्रमे मम ॥ भगिनीं च समर्थैव स्वामिने विधिवत्त
दा ॥ २७ ॥ आयास्ये च पुनर्मांसार्थं निर्मसर्वं यास्तु ना ॥ इत्युक्तो पितदा
व्याधो न मेने वचनं ततः ॥ २८ ॥ व्याधो वाच ॥ संकटे समनुप्राप्ते सर्वे
मिथ्यापानि संशिनः ॥ इत्येवं वचनं श्रुत्वा मृगयोर्वचनं पुनः ॥ २९ ॥ स
त्येन सर्वं यादेवाः सत्येनेव समुद्रकाः ॥ सत्येन जलधाराश्च सत्ये सर्वं

शिव॰ ३१० प्रतिष्ठितं ॥ ३० ॥ नमे मिथ्यावचस्त्वं च जानासि सर्वयाचर ॥ इत्युक्तोपि नमे
नेतद्वचनं पुनरब्रवीत् ॥ ३१ ॥ शृणु व्याध प्रवक्ष्यामि पापं मे शिरसि न वेत् ।
यद्यहं नागमे ह्यत्र एतेषां पातकं मम ॥ ३२ ॥ ब्राह्मणो वेदविक्रेता संध्याही
न स्त्रिकालकं ॥ स्त्रियश्च स्वामिनो ह्याज्ञां समुल्लंघ्य न केच्छयत ॥ ३३ ॥
कृतघ्ने चैव यत्पापं कर्थयां विमुखे हरेः द्रोहिणि चैव यत्पापं यत्पापं ।
धर्मलघने ॥ ३४ ॥ तेन पापेन लिप्यामि यद्यहं नागमे पुनः ॥ इत्यादि
निघ्नेकानि कृत्वा मृगी स्थिता तदा ॥ ३५ ॥ व्याधोपि च स्वयं तत्र गच्छ
शीघ्रं वचो ब्रवीत् ॥ मृगी कृष्णाजलं पीत्वा गता स्वाश्रमंडलं ॥ ३६ ॥ ताव ३१०
च्च प्रथमो यामो गतो निद्रां विनाशुनाः ॥ तदीया न्नेगिनी या वै मृगी च

परिज्ञापिता ॥ ३७ ॥ तस्या मार्गं विचिन्वंति ह्याजगाम ललार्थिनी ॥ तां
दृष्ट्वा स्वयं निस्त्राकृष्टा वाणस्य कर्षणं ॥ ३८ ॥ पूर्ववज्जलपत्राणि पतितानि शि ति
वोपरि ॥ यामस्य द्वितीयस्यैव ह्यजायत महात्मन ॥ ३९ ॥ सा मृग्यपि च तं
दृष्ट्वा किं करोषि वनेचर ॥ पूर्ववत्कथितं तेन श्रुत्वा हर्षसमन्विता ॥ ४० ॥
धन्याहं श्रूयतां श्वेतसफलं देहधारणं ॥ अनित्येन शरीरेण ह्युपका
रोन विष्यति ॥ ४१ ॥ परं तु मम वालाश्च गृहे तिष्ठंति सर्पार्भकाः ॥ नेत्रे ध्ये
तान्मम पर्येवह्यागमिष्याम्यहं धुवं ॥ ४२ ॥ तेनोक्तं च न मन्येहं हन्यामि
ति न संशयः ॥ शृणु व्याध प्रवक्ष्यामि यद्यहं नागमे पुनः ॥ ४३ ॥ एतेषां पा
तकं मे ह्यनवत्ति ति न संशयः ॥ वाचा विचलिता यस्य सुकृतं तेन हारितं
ये

४४॥ मेदिनी सत्यपात्रेण रक्षिता तिष्ठति ध्रुवं। परिणीतां स्त्रियं हित्वा।
घन्यां गच्छति यः पुमान॥४५॥ तस्योपरि शिरसि मे घृयं घहं नागमे पुनः
वदधर्मान्समुद्दिश्य कस्यचित्तेन यद्याव्रजेत॥४६॥ विश्वासं नक्तिसमायुक्तो
शिवाने दत्तं करोति यः। पित्रोः क्षयाह मासाद्य श्रून्ये चैवाक्रमदिहं॥४७
दत्वा च परितापं हि करोति वचनं पुनः। तेन पापेन लिप्याणि यद्यहं नाग
मे पुनः॥४८॥ इत्युक्त्वा तदा व्याधः गच्छत्वं पुनरागमे॥ सा मृगी च जलं
पीत्वा दृष्टा सा च स्वमाश्रमं॥४९॥ जगाम च तावन्मृगः कृष्णमृग्यो विंतय
न्गतः। तावच्च क्षितीयो यामो गतो निद्रां विनाश्रुतिः॥५०॥ मृगोपि ३११
च मृगी पश्यन् जलमार्गे समागतः। पुष्टं मृगं च तं दृष्ट्वा हृष्टो व्याधो

रक्तदा॥५१॥ वक्रमांसे च विविधे तत्तमिः स्वादनपापिनी॥ मत्वा च बाण
मारूप्य पन्न कृतवान् यदा॥५२॥ तदा च जलमुक्तानि पत्राणि चाशि
वोपरि॥ तेनेव तत्तीया स्पैवयामस्य कृपि सत्रमाः॥५३॥ पूजाजाता शि
वस्यैव रूपालुत्वं च पश्यत॥ तदीयं चैव तं शब्दं किंकरोषि मृगोब्रवीत्
५४॥ ऊर्ध्वं दत्वार्थे तत्रहं त्वां व्याधोपि वचनं पुनः॥ तच्छ्रुत्वा हरिणः सोपि हृ
ष्टो वचनमाददे॥५५॥ धन्योहं पुष्टिवान्दायेन त्वं हि तेनवाद्दत्तां॥ यस्यांग
नोपकारार्थं गतेवे परमार्थतः॥५६॥ तस्य सर्वं च धर्मार्थं वनात्र कार्यावि
चारणा॥ यो वै सामर्थ्ययुक्तो हि नोपकारं करोति मः॥५७॥ तस्य सामर्थ्यं
नवेद्दार्थं नात्र कार्या विचारणा॥ सम्यग्ज्ञातं शरीरेण त्वमिवर्धनवि

शि० ३१२

ष्यति ॥ ५८ ॥ परं तु बालकांश्चाहं समर्प्य जननी पुनः ॥ आश्वास्याथ च तान्स
र्वान्नागमिष्याम्यहं ध्रुवं ॥ ५९ ॥ इत्युक्तो वै पुनस्तत्र व्याधो वचनमब्रवीत् ॥
ये ये समागता ह्यत्र ते ते सर्वे त्वयाऽयया ॥ ६० ॥ कथयित्वा तु गतास्ते वै नायातास्
ह्यापि वंचितः त्वं वापि संकटे कृत्वा व्यलीकं च गमिष्यसि ॥ ६१ ॥ ममैव
जीवनं चाद्य न विद्यति कथं मृग ॥ इत्येवं वचनं श्रुत्वा मृगो वाक्यमुपाद
द ॥ ६२ ॥ शृणु व्याध प्रवक्ष्यामि नानृतं विद्यते मयि ॥ सत्येन सर्वं ब्रह्मांडं
तिष्ठति सचराचरं ॥ ६३ ॥ यस्य वाणि व्यलीका हि तस्य पुण्यं च क्षितं क्षणा
त् ॥ तथापि मन्यते नैव प्रतिज्ञा मम निश्चयं ॥ ६४ ॥ संध्यायां मैथुनेनैव
शिवरात्रिभोजनेन कृत ॥ कूटसाक्ष्यान्महाहारे सेध्याहीने द्विजे यथा ॥ ३१२

६५ ॥ शिवहीनं मुखं यस्य नोपकारः स्मृतोऽपि सन् ॥ दिवा मैथुनकारि
च तस्यैव पातकं च यत् ॥ ६६ ॥ पर्वणि श्रीफलादौ व्रतस्यैव दिने न या ॥
अन्नस्य कारणे यच्च तन्मा पेत्शिरसि मम ॥ ६७ ॥ यद्यहं नागमे ह्यत्रं वंच
यित्वा त्वां पुनः ॥ इति वचस्तदा श्रुत्वा गच्छ शीघ्रं समागम ॥ ६८ ॥ व्या
धेनैव तु मुक्तस्तु जलं पीत्वा गतो मृगः ॥ ते सर्वे मिलितास्तत्र ह्याश्रमे
रूपितस्त्वमाः ॥ ६९ ॥ वृत्तांते वने सर्वं श्रुतं चैव परस्परं ॥ गंतव्यं निश्चये
नैव सत्यपाशेन यंत्रिता ॥ ७० ॥ आश्वास्य बालकांस्तत्र गंतुमुत्कंठि
तास्तदा ॥ मृगी ज्येष्ठा च याता तत्र स्वामिने वाक्यमब्रवीत् ॥ ७१ ॥ अनाथा
बालका ह्यत्र कथं स्थास्यंति वै मृग ॥ प्रथमं च मया तत्र प्रतिज्ञा च मया
कृता ॥ ७२ ॥

शि॰व्र॰ तस्मात्त्वया न गंतव्यं न वक्तव्यं स्थियतां त्विह ॥ इति वचस्तदा श्रुत्वा लोकनिष्ठा वा
३१२ क्यमब्रवीत् ॥७३॥ अहं च सेवकी वां चगच्छामि स्थियतां त्वया ॥ मृगोपि वचनं
श्रुत्वा गम्यतेव मया पुनः ॥७४॥ इति श्रुत्वा च वत्सस्य वैधव्यजीविते हि धिक्
बालानाथ्वा स्पतांस्तत्र समर्थं मह वासिनः ॥७५॥ गतास्ते सर्व एवात्र यत्रास्ते व्या श्री ४
धसत्तमः ॥ प्रतिज्ञां कीयमाणाश्च मार्गं चैव निरीक्षयन् ॥७६॥ तावज्जनाश्च
ते सर्वे सत्यपाश सुयंत्रिताः ॥ तान्दृष्ट्वा हर्षितो व्याधः धनुषि बाणमादधे
७७॥ ते बालाश्चापि ते सर्वे पित्रोरनुसमागताः ॥ एतेषां या गतिः स्यात् सैवा
स्माकं सा न वे स्तदा ॥७८॥ पुनश्च जल्पयन्नाणि पतिता निश्रिता वा परी ॥ ते ३१२
न जाता चतुर्थस्य हृज्ञाया मनस्य वै श्रुता ॥७९॥ नस्य पापं तदा सर्वं नस्म

सद्वनवस्कृणात् ॥ मृगी मृगी मृगश्चैव वत्सौ प्रंच व्याधसत्तम ॥८०॥ अस्मा
कं सार्थकं देहं कुरु त्वं व्याधसत्तम ॥ इति तेषां वचः श्रुत्वा व्याधो विस्मय
मागतः ॥८१॥ शिवपूजाप्रभावेन ज्ञानं तस्य समागतं ॥ धन्या एते मृगाश्चै
व ज्ञानहीनाः सुसम्मताः ॥८२॥ स्वीयेनैव शरीरेण परोपकारणे रताः ॥ मा
नुष्यं जन्म संप्राप्य साधितं किं मयाधुना ॥८३॥ परकायं च संपीड्य शरी
रं पोषितं मया ॥ कुटुंबं पोषितं मेघ दूर्वं च बहु पीडितं ॥८४॥ कृत्वा च पो
षितं सर्वं हा गतिर्मे न विद्यते ॥ कां च गतिं गमिष्यामि पातकं कृतः ज
कृतं ॥८५॥ इदानीं चेन याम्यह धिकारं जीवने मम ॥ इति ज्ञानं समापन्नो
बाणं संवरयं स्तदा ॥८६॥ गम्यतां च मृगश्रेष्ठाः धन्यास्थ इति चाब्रवी

शिव०
३२८

इत्युक्ते च तदा तेन प्रसन्नः शंकरस्तदा ॥ ८७ ॥ पूजितश्च ममत्वं हि दर्शि
यामास सत्पतेः ॥ पंचवक्त्रादिकं यच्च दशबाहूसमन्वितं ॥ ८८ ॥ मुनिभि
र्ध्यायते यच्च तद्रूपं रूपयातदा ॥ दर्शयित्वा वरं ब्रूहि जसन्तोस्मि व्रतेन
च ॥ ८९ ॥ व्याधोपि शिवरूपं च जीवन्मुक्तोनवेक्षणात् ॥ पपात शिवपा
दाग्रे सर्वं ज्ञातं मयाधुना ॥ ९० ॥ शिवोपि च गुरुं नाम स्थापयित्वा वरं ह्य
दात् ॥ श्रृणु व्याध इदानीं त्वं भुक्तिमुक्तिमनेप्सितां ॥ ९१ ॥ राजधानीं च मं
नुष्य वंश वृद्धिस्तदाष्टुना ॥ हनपायिनी नवेन्द्रित्वं श्लाघिनी देवतैरपि
॥ ९२ ॥ गृहे रामस्तव व्याधस्समायास्यत्स संशयं ॥ तत्स्पृजांतनक्तींचरू
त्वाधास्यस्य संशयः ॥ ९३ ॥ मुक्तिं सर्वजनैः स नोईर्लब्धं तां मुनीसत्तमैः ३२८

मम प्रजारतास्ते च वंशजाः स्युर्बलवत्तराः ॥ ९४ ॥ एतस्मिन्नंतरे तैस्तु शिव
स्य दर्शनेकृते ॥ सर्वज्ञास्ते तदा मुक्तिं मृगयोनेः अपेदिरे ॥ ९५ ॥ विमाने
च समारुह्य दिव्य देहाः गतस्तदा ॥ शिवदर्शनमात्रेण शापान्मुक्तादि
वंगता ॥ ९६ ॥ व्याधेश्वरः शिवोजातः पर्वते ह्यर्बुदाचले ॥ व्याधोपि तद्दिना
न्नूनं भुक्तिभुरसुभेसमः ॥ ९७ ॥ भुक्त्वा राम क्षपां प्राप्य शिवसायुज्यमा
प्नुयात् ॥ अज्ञातांचव्रतं ह्येनत् कृतं सायुज्य नागनृत ॥ ९८ ॥ किं पुन
र्भक्तिसंपन्नाः यांति तन्मयतां ध्रुवं ॥ विचार्य सर्व शास्त्राणि धर्मांश्चैवा
प्यनेकशः ॥ ९९ ॥ व्रतानि विविधान्यत्र तीर्थानि विविधान्यथ ॥ दानानि
च विविधानि चित्राणि ॥ विविधानि फलानि च ॥ १०० ॥ नैतेने समतां यांति शिव

रात्रिव्रतेनच ॥ तस्मात्तुनतरं स्वेन कर्त्तव्यं हितमिच्छता ॥ १०१ ॥ एतत्ते
वै समाख्यातं पुनश्च कथयाम्यहं ॥ इतिहासं ऋषिश्रेष्ठा व्रतं पापहरं परं
१०२ ॥ ॥ इति श्रीशिवपुराणे शिवरात्रिव्रतनिरूपणो नाम चतुःसप्तति
तमोऽध्यायः ॥ ॥ सूत उवाच ॥ ॥ अवंतिनगरे रम्ये दीक्षितो ऋषिवत्संज्ञः ।
सत्कुलीनः सदाचारः श्रुतकर्मपरायणः ॥ १ ॥ वेदे चैव शास्त्रेषु परिस्नातो
विचक्षणः । तस्य नार्या कुलीनासीत्पतिधर्मपरायणा ॥ २ ॥ कृत्वा च याज्ञया
मास नक्रियावसमन्वितः ॥ राज्ञो मान्य वती व्यासीत्प्राप्यते धनमुत्त
मं ॥ ३ ॥ तस्य पुत्र द्वयं ह्यासीत्सुनिधिर्वेदनिधिस्तथा ॥ ज्येष्ठश्चैव सुनिधि
र्योपितृधर्मपरायणः ॥ ४ ॥ वेदनिधिश्च यः प्रोक्तो वेदशास्त्रविशार

दः ॥ दुर्व्यसनेन च तस्यासीन्नत्र क्वाक्रीडनादिने । ये यं खादं च तत्रैव कर्तिति
सनिरंतरं ॥ पित्राज्ञानं निषिद्धोपि निवृत्तो न तदा तु सः ॥ ६ ॥ माता चापित
यान्नावाच निर्जितो पुनः पुनः । न त्यक्तं व्यसनं तेन पापिष्ठेन दुरात्मना ॥ ७ ॥
कदाचिद्दीक्षितायैव दत्तं राज्ञा स्वलंकृतं ॥ अंगुलिरक्षणं श्रेष्ठं प्रसन्नेन त
दा स्वयं । न दिजेन च गृहागतस्त्रियै दत्तं सुगोपितं स्त्रिया मुक्तं गृहे चैव वै
न दृष्टं दुरात्मना ॥ ८ ॥ रुत्वा वानो च तत्रैव नर्त्तकौ विनिवेदितं ।
कदाचिन्नर्तकी सा च राज्ञे नर्त्तं स्वर्यं दर्शयत् ॥ ९ ॥ तस्मिंश्च समये राजा दृष्ट
च नृपणं शुभं ॥ राज्ञा तस्यैव तदा हृष्टं कुतो लब्धं
त्वया शुभं ॥ १ ॥ तया व्रतारितः सोऽपि न स्वया मासनां पुनः ॥ अस्या गृहे न

यापस्य यथार्थं कथितं तया ॥१२॥ वलयं च ततो गृह्य प्रातर्विप्रं समकथय
त् ॥ समाहूयाब्रवीत्तां वै वलयं नीयतां पुन ॥१३॥ कार्यं च वर्त्तते किंचित्पुन
र्न्नीयतां त्वया । इत्युक्तश्च द्विजश्चैव गृहमागत्य तां पुनः ॥१४॥ उवाच रे
प्रिये दत्तं मया तन्निपतां त्वया । नयेति सा वचः श्रुत्वा गता नानुक्तवती यतः
१५। सापि गवेश्यामास न लब्धं वलयं तदा ॥ स्वामिने कथयामास लभ्यते
न मया प्रभो ॥१६॥ श्रुत्वा दुःखसमापन्नो राज्ञोग्रे तन्निवेदितं । न लब्धं तु मया
राजन् किं करोमि कुतो गतं ॥१७॥ तच्छ्रुत्वा च तदा राज्ञा सर्वं च विनिवेदितं
दुःखितो ब्राह्मणः श्रुत्वा गृहागत्य स्त्रियं तदा ॥१८॥ तया प्रयोजनं नैव ह्य
स्माकं कुलदूषणः । निष्कासितश्च पुत्रो वै नाम्ना वेदनिधिश्च यः ॥१९॥

गतो बहिस्तथा सोपि कुत्र चिद्दिनमावहत् ॥ क्षुधितो तृषितश्चैव नन्तका
पि तिरस्कृतः ॥२०॥ रात्रिर्जाता यदा तत्र क्षुधितो तृषितस्तदा । तद्दिने शिवरा
त्रिश्च लोकानां पापविनाशिनी ॥२१॥ कश्चिद्दासो बहुविधां पूजामादाय स
त्वरं नैवेद्यं विविधं गृह्य गतवान् शिवमंदिरं ॥२२॥ तं दृष्ट्वा च तदा दुष्टः भ
क्षयिष्याम्यहं पुनः ॥ इति विचार्य दुष्टोपि जगाम अनुपदं तदा ॥२३॥ शिवस्य
मंदिरं गत्वा पूजां लोकजनैः सह । ददर्श क्षुधयाविष्टः अन्नं भक्ष्यपराय
णः ॥२४॥ कदैते तु गमिष्यंति कदान्नं भक्षयाम्यहं ॥ यथा तथा समाचान्नं
गृहीतव्यं मयाधुना ॥२५॥ इति बुध्वा तदा तेन जागरंतं न परायणः । तेपि
लोकास्तदा तत्र पूजां याम समुद्भवां ॥२६॥ कृत्वा नृत्यं च गीतं च यामे च

शि० ३१७ निद्रिता। केचिन्नतागृहे तत्र सुप्ताः केचन मंदिरे ॥२७॥ निद्रितांश्च तथा दृ
ष्ट्वा विप्रो वेदनिधिस्तदा। अन्नं निवेदितं तत्र पक्वान्नं विविधं तथा ॥२८॥
जिघृक्षुस्तदा तत्र समीपं तु शिवस्य च। शनैः शनैः समागच्छदि
च्छायो दीपकस्तदा ॥२९॥ सम्यगन्नं न दृष्टेपि तद्दीपच्छाया शिवोपरि। ते
नैव वस्त्रखंडं हि शिववेष्टनजं तदा ॥३०॥ दीपश्च रोचितस्तत्र घृतार्थेन प
रार्थतः। अंधकारं शिवे यो वै दूरीभूतस्तदाशु मा ॥३१॥ संदीप दीपकस्त
त्प्रयत्नं दृष्टं सुसुंदरं। सर्वं नैवं गृहीत्वा च शनैः शने रूपारमत ॥३२॥
शयानेषु पदस्पृष्टः विकृता घुत्थितास्तदा। कोयं कोयं क्रवं तश्च चौ
रोयमिति चापरे ॥३३॥ तेषां तद्वचनं श्रुत्वा भीतो विप्रः पलायितः। ३१७

तेपि पश्चाद्रुतास्तत्र। राजश्च सेवकास्तदा ॥३४॥ पलायन्न तदा तं च बाणा
न्स्त्रमाक्षिपन् तदा। बाणास्तं च तदा लग्नास्तस्मात्सोपि पपात ह ॥३५॥ प
तितश्च मृतः सो वै श्रूयतां ऋषिसत्तमाः। अज्ञानतोपि व्रतं जागरो जाग
रणं तथा ॥३६॥ कृपालुत्वाच्छिवस्यैव सर्वं जातं सुशोभनं। तस्मिंश्च समये
प्राप्ताः हृतीः वैवस्वतस्य ह ॥३७॥ शंकरस्य गणास्तत्र ह्याजग्मुः बलव
त्तराः। तनयोर्वा तदा वादः समजायत वै तदा ॥३८॥ गणाः शिवस्य ये तत्र
वचनं चेदमब्रुवन्। कथं समागताः दूर्वंदेऊन घाट्टिता इति ॥३९॥ ते चो
चुर्नमवद्धाः कः सूर्ये कि च समागताः यमगणा अद्युना ॥ जन्मप्रभृ
ति पापं च न पुण्यं स्याणुमात्रकं ॥४०॥ पापे बहुतर ह्यासीदस्तादनव

कृणात् ॥ शिवस्यव्रते नैवदीपच्छायानिवारणात् ॥ ४१ ॥ अद्यापिपात
केति एतत्गतं सर्वं दुरासदं ॥ इत्येवं विवदं तस्य धर्मराजे गतास्तदा ॥
४२ ॥ धर्मेणोक्तं च सत्यं वै पापं च नस्मृतं गतं । नमस्कारं त्वा कृत्वा कलिं
गाधिपतिं तदा ॥ ४३ ॥ यातनां न चरासौ धम्रणस्य भागवानसि ॥ कलिंगा
धिपतिर्नत्वा शिवपूजापरायणा ॥ ४४ ॥ दीपपूजापरो नित्यं शिवरात्रि
व्रते रतः । स्वराज्ये शिवपूजां च दीपांश्चैव तदालये ॥ ४५ ॥ कारयित्वा त
दा मुक्तिं किं तत्र विस्मयः पुनः ॥ चौर्यार्थेन सुबुध्याहि दीपं तु कृतवा
न्मिमः ॥ ४५ ॥ ज्ञात्वा दीपं च ये कुर्युः तेलनं ते सुते पदं । एतस्मात्कारणा
त्सर्वेषां व्रतं ह्येतादृशं नहि ॥ ४६ ॥ शिवात्परोदयालुर्नपावनो न परं स्म

तः ॥ एतद्धर्मसमाख्यातं यत्पृष्टोहं ऋषीश्वराः ॥ ४७ ॥ यच्छ्रुत्वा सर्वपापे
भ्यो मुच्यते मानवः क्षणात् ॥ अतः परं तु नास्त्येव मुक्तिस्वादनपायिनी ॥
४८ ॥ शिव एव परो देवः शिव एव परं पदं । शिव एव परा मुक्तिः नातः परं त
रं व्रतं ॥ ४९ ॥ ॥ इति श्रीशिवपुराणे मुक्तिनिरूपणो नाम पंचमप्रतिन
मोध्यायः ॥ ॥ ऋषय ऊचुः ॥ ॥ मुक्तिर्नाम त्वया प्रोक्ता तस्यां किं तु नवे
दितं ॥ अवस्था कीदृशी सूत न वेदितिवदस्व नः ॥ १ ॥ सूत उवाच ॥ मुक्ति
चतुर्विधा प्रोक्ता श्रूयतां कथयामि वः । सारूप्या चैव सालोक्या सानि
ध्या च तथा पुनः ॥ २ ॥ सायुज्या च ऋषिश्रेष्ठाः व्रतेनानेन यान वेत्त ॥ किं च
क्षणं हितस्यैव श्रूयतां ऋषिसत्तमाः ॥ ३ ॥ यतः सर्वं सुमुद्घेतयेनैव

शिव० ३१९ पाल्यते हि ततः । यस्मिंश्च लीयते सर्वं येन सर्वमिदं ततं ॥ ४ ॥ तदेव शिवरू
पं प्रोच्यते च मुनीश्वराः । विष्णुना तच्च न ज्ञातं ब्रह्मणा न तथैव च ॥ ५ ॥
कुमारैर्नारदेनैव षण्मुखेन जनकेन च ॥ आसन्निष्येन चान्येन व्यासेनैवा
थवा पुनः ॥ ६ ॥ तत्स्वरूपं तदा वेदैः न ज्ञातं नेति नेति च ॥ सत्यज्ञानमनंत
स्व विज्ञानं स्वउदाहृतः ॥ ७ ॥ निर्गुणो निरुपाधिश्च निरंजनोऽव्ययस्तथा
न रक्तो न च पीतश्च न श्वेतो नील एव च ॥ ८ ॥ यतो वाचो निवर्तंते मन अप्राप्य
सा सह एव च । तदेव परमं प्रोक्तं ब्रह्मैव शिवसंज्ञितं ॥ ९ ॥ आकाशव्या
पकं यद्वत्तथा च व्यापकं त्विदं ॥ न स्थूलं न च सूक्ष्मं च द्वंद्वातीतं विम
त्सरं ॥ १० ॥ विकाररहितं तच्च द्वैहामि ह्यपरं तच्च ॥ तस्माच्छिवश्च न वेदस्व ३१९

शिव० ३२० ति विख्यातेः पचिप्रसत्तेन च । व्याप्तं च सकलं येन तेन सुप्रोहरिः स्वयं ॥ ५ ॥
नारायणोऽस्ति व्याख्यातं वदंति मुनयस्तथा ॥ नारायणो इति विख्यातो ब्रह्म
ति र्यपुरोऽजना ॥ ६ ॥ तन्नाभिकमले यो वै जातं स च पितामहः ॥ तेनैव तप
सा दृष्टः सोऽपि विष्णुः सनातनः ॥ ७ ॥ वैकुंठवासियः प्रोक्तो महाप्रलये
विलीयते । तत्र योर्वादनामनार्थं यद्रूपं दर्शितं बुधः ॥ ८ ॥ महादेवेति
विख्यातं । शिवाच्च निर्गुणादिह । तेन प्रोक्तं ह्यहं रुद्रो न विष्णानिकपो
लकः ॥ ९ ॥ रुद्रो नाम विख्यातो लोकानुग्रहकारकः ध्यानार्थं चैव सर्वे
षामरूपो रूपवान् हृतः ॥ १० ॥ स एव च शिवः साक्षात्तत्र कवासत्य ३२०
कारकः ॥ अन्येवये समुत्पन्ना यथानुक्रमतो लयं ॥ ११ ॥ यो तिनैव

शिवस्य तु जनार्दन ॥११॥ तस्माच्छिवं च तज्ज्ञेयं तत्सुखरूपं कृपासिन्धुमा
॥ इति दृष्टं न वाक्ति शिश्च तेदेव कथितं मया ॥१२॥ य श्रुत्वा सर्वपापेभ्यो मु
च्यते नात्र संशयः ॥ ॥ इति श्रीशिवपुराणे मुक्तिनिरूपणो नाम षट्
त्रिंशत्तमोऽध्यायः ॥ ॥ ऋषय ऊचुः ॥ शिवः को वा हरिः को वा रुद्रः को वा
समाहितः ॥ ब्रह्मा को वा न वेद्यो वै कर्त्ता च जगतः स्मृतः ॥१॥ एते च मुनि
गुणाः को वा संशयं छेत्तुमर्हसि ॥ निर्गुणः को गुणी चैव सर्वं च कथ्य
तां त्वया ॥२॥ सूत उवाच ॥ यतः सर्वं समुत्पन्नं तत्परमात्मनः ॥ तदेव शि निर्गुणं
वसंज्ञं हि वेदवेदान्तिनो विदुः ॥३॥ तस्मात्प्रकृतिरुत्पन्ना पुरुषेण स
मन्विता ॥ ताभ्यां तपः कृतं तत्र मूलस्थिव स्थले बुधाः ॥४॥ पंचक्रोशी

तथा रुद्रे शिवे रुद्रो विलीयते ॥ सर्वे रुद्रं मीलित्वा नयंति च प्राकृताद्
मे ॥१३॥ रुद्रो इमान् मिलित्वा नयं ती कृतिशासनं ॥ सर्वे रुद्रजं ते से
व रुद्रकं विद्धि जेन्ना हि ॥१४॥ अन्यं न जंति ये निस्तं तस्मिंल्लीनतां गताः
ते नैव सहनं प्राप्ताः कालेन महता पुनः ॥१४॥ रुद्र न क्रा स्तुये के चित्र
स्तपो शिवतां गताः ॥ अन्यापेक्षा न तेषां हि श्रुतिरेषा सनातनी ॥१५
अज्ञानं विविधं ह्येतत्तु विज्ञानं विविधं न हि ॥ ब्रह्मादितृणपर्यंतं य
त्किंचिद्दृश्यते त्विह ॥१६॥ तत्सर्वं शिव एवास्ति नात्र कार्या विचारणा
स्रष्टः पूर्वं शिवः प्रोक्तः सृष्टेर्मध्ये शिवस्तथा ॥१७॥ सृष्टेरंते शिवः प्रो
क्तस्तेन प्रोक्तः सदाशिवः तस्माच्च निर्गुणः प्रोक्तः शिव एव कृपाब्धि

शिव॰ रः॥१८॥ येनैव विश्ववेदत्वात्मा सेन वेदसंज्ञिता॥ वाणी मंत्रात्मने के
३२१ वध्यानं च पूजनं बुधाः॥१९॥ ईशानः सर्वविद्यानां श्रुतिरेषा सनात
नी॥ स एव शंकरः साक्षात्सर्वानुग्रहकारकः॥२०॥ कर्त्ता पालयिता सा
क्षी संहर्त्ता स उदाहृतः॥ अन्येषां कालमाने च कालस्य कलना तथा
॥२१॥ न स्यमेन कालस्य कालस्य कलना नहि॥ माहाकालः स्वयं साक्षा
त्महाकाली समाश्रिता॥२२॥ यथा च ब्रह्मणो रुद्रे तथा काली प्रचक्ष
ते॥ सर्वं तां स्यां तथा व्याप्तं इच्छयोत्पत्ति लीनता॥२३॥ नो स्यात्कस्य क
श्चिद् न हर्त्ता किंचन प्रियाः॥ स्वयं च कारणं नैवै कार्यं नृत्ता कृता द ३२१
य॥२४॥ स्वयं च कारणं कार्यं स्वस्य नैव कदाचन॥ एको नेकतां या

तः अनेको एकतां व्रजेत्॥२५॥ एकबीजं बहूनत्वा पुनर्बीजं च प्रजा
यते॥ वस्तुत्वेव स्वयं बीजं शिवरूपी महेश्वरः॥२६॥ जानाति मानवा नै
वं नान्यः कश्चिद्रूपी श्वराः॥ इत्येवं वचनं श्रुत्वा पुनस्ते चुर्मुनीश्वराः॥
२७॥ ज्ञानस्य लक्षणं ब्रूहि यज्ज्ञात्वा शिवतां व्रजेत्॥ कथं शिवस्य सर्वं वै
सर्वं च शिव एव च॥२८॥ एतत्सर्वं त्वया सूत कथनीयं हितायवै॥ सूतो
वाच॥ श्रूयतां ऋषयः श्रेष्ठाः कथयामि यथाश्रुतं॥२९॥ ब्रह्मनारदकुमा
राणां व्यासस्य कपिलस्य च॥ एतेषां च समाजे वै निश्चित्य समुद्धृतं॥३०॥
इत्युक्त्वा कथयामास नमस्कृत्य स गुरुं तदा॥ सूतोवाच॥ इति ज्ञाने तदा
ज्ञेयं सर्वं शिवमयं जगत्॥३१॥ आब्रह्मस्तृणपर्यंतं यत्किंचिद्दृश्यते
ल

शिव·
३२२

जगत् तत्सर्वं शिव एवास्ति नात्र कार्या विचारणा ॥३२॥ यदि ज्ञानस्य
जायेत तदा वक्रीयते त्विदं ॥ सर्वं स एव जानाति तं न जानाति कश्चन ॥
३३॥ रविस्ता च स्वयं चैव प्रविष्टः दूरतः स्थितः ॥ यथा हि ज्योतिषश्चैव ज
लादौ प्रतिबिंबता ॥३४॥ वस्तुतो न प्रवेशो वै न थैव च स्वयं शिवः ॥ वस्तु
तस्तु स्वयं सर्वकर्मो हि नासने शुना ॥३५॥ अज्ञानं च मते नेदो नास्त्य
न्यस्य द्वयं पुनः ॥ दर्शनेषु च सर्वेषु मतिभेदः प्रदृश्यते ॥३६॥ परं वेदां
तिनो नित्यं सर्वं द्वैतप्रतिपादिनः ॥ सम्यां शास्त्र सजीवो वै अविद्यामोहि
तो वशः ॥३७॥ अहं मन्यं च जानाति तया मुक्तो न वेष्टितः ॥ सर्वव्याप्य ३२२
शिवः साक्षात् व्यापकः सर्वजंतुषु ॥३८॥ चेतनाचेतने सो वै सर्व

त्र शंकरः स्वयं ॥ उपायं यः करोत्स स्पर्शने सोऽलने ध्रुवं ॥३९॥ य
थाग्निर्व्यापकश्चैव काष्ठे काष्ठे च तिष्ठति ॥ यो वै मथनीतः काष्ठे सो वै
पश्यपत्य संशयं ॥४०॥ न कर्मादिसाधनानीह कतिकृपिसत्तमा ॥ सो वै प
रूपत्वव शोवेनात्र कार्या विचारणा ॥४१॥ शिवश्शिवः शिवश्चैव नान्य
दस्तीति किंचन ॥ नानाजातिस्वरूपो हि नासते शंकरः सदा ॥४२॥ य
था समुद्रो मन्थैव सुवर्णमिव वा पुनः ॥ उपाधितो हि नाना त्वं लनते च
तथैव सः ॥४३॥ कारणकार्ययोर्भेदो वस्तुतो न प्रवर्त्तते ॥ यथा बीज
प्ररोहश्च नानाविधिः प्रकाशते ॥४४॥ अगोचरं बीजमेव स्यान्नात्र का
र्या विचारणा ॥ ज्ञानी बीजं प्रपश्येत् तद्यज्ञानी विविधं जगत् ॥४५॥

शिव॰ ३२३ सर्वंशिवःशिवःसर्वंनान्यन्नेहास्तिकश्चनः।कथंचविविधंप्रोक्त
एकत्वेनकथंपुनः॥४६॥यथैकंचैवसूर्यस्यज्योतिर्नानाविधंपुमा
न्॥जलादौतुविशेषेणदृश्यतेचतथैवसः॥४७॥सर्वत्रव्यापकःसोवै
स्पर्शोतेनविबध्यते।तथैवव्यापकोदेवबध्यातिचपुनःक्वचित्॥४८॥
अहंकारतया जीवन्मुक्तःशंकरःस्वयं।यथैकंचसुवर्णंहिताम्रे
णमिलितंयदा॥४९॥अल्पमूल्यंव्रजत्येनतथाजीवोप्यहंपुनेःत
द्वेवसुवर्णंहिक्षारादिशोधितंयदा॥५०॥पूर्ववन्मूल्यतांयातित
याजीवस्यसंमतं।यदाचगुरुसंप्राप्यनक्तिनावसमन्वितं॥५१॥ ३२३
शिवबुध्याकरोतुस्वैःपूजनंस्मरणंस्तुतं।ध्यानंस्तवंचतबुध्याप

पादिहरतोगतं॥५२॥तदाज्ञानंचनश्येतशरीरंचास्थिरंबुधः।मत्वा
चनित्यस्वरूपंहिशिवमेवसनातनं॥५३॥अज्ञानाद्धरतोमूलान्नेज्ञावा
न्जायतेयदा।तदाहंकारनिर्मुक्तोयातिशंकरतांतुसः॥५४॥यथाद
र्शस्वरूपंचस्वीयंचैवप्रदृश्यते।तथासर्वत्रगंशंभुंपश्यतीतिसुनि
श्चितं॥५५॥जीवन्मुक्तःसएवासौदेहशीर्णेशिवेलयेत।श्रुतंलब्ध्वा
नकृष्येतलब्ध्वाऽश्रुतंनकुप्यति॥५६॥द्वंद्वदुःखसमस्त्वायंज्ञानवा
न्जायतेतदा।अथवाआत्मयोगेनतत्वानांचविवेकतः॥५७॥यथे
च्छाचारीसोवैस्यात्शरीरंमुक्तिरिछया।तदाशिवविलीयतमुक्तोवि
रहमेवच॥५८॥ज्ञात्मलेतदाध्यात्म्यंतस्यनक्तिंशिवस्यच।नक्ते

श्वश्रेम संश्रोक्तं श्रेमणः सुश्रवणं तथा ॥५९॥ श्रवणस्य सतां संगः संगस्य
सद्गुरुर्बुधाः ॥ सयस्तेच तया ज्ञानं मुक्तो भवति निश्चितं ॥६०॥ इति वेदज्ञा
नवान् सा वै शंभुमेव सदा भजेत् ॥ अनन्यया च भक्त्या वै शंभुं प्राप्नोस्य संज्ञा
यः ॥६१॥ भक्त्यंतरायमत्तश्च वै पुनर्बीजेन संयुतः ॥ उत्पद्यते च भक्त्या युक्तो
शंभुर्नैमेसु नः ॥६२॥ अन्ये च मुक्तिमायांति नात्र कार्या विचारणा ॥ अ
तोधिको न देवोस्ति यं प्राप्य न निवर्त्तते ॥६३॥ सहस्त्रजन्मपर्यंतं तपोदा
नव्रतादिकं ॥ कृतेन पूर्वं भवेच्च वै शिवे भक्तिः प्रजायते ॥६४॥ जातायां च
तथा भक्तो जीवन्मुक्तो भवेन्नृपः ॥ इति मे विविधं वाक्यं ऋषीणां च स
मागमे ॥६५॥ निश्चिस्य च पुनश्चैतं कुमारे नारदादिभिः ॥ व्यासाग्रेक

थितं तेस्तत्तमहर्षं व्यासेन पाठितं ॥६६॥ प्रथमं विष्णवे दत्तं शिवेन लिंग
संभवे ॥ विष्णुना वेधसे दत्तं ब्रह्मणा सनकादिषु ॥६७॥ ततस्तैर्नारदायैव
कथितं नारदेन च ॥ व्यासाय च कृपिश्रेष्ठाः तेन मह्यं कृपालुना ॥६८॥ मया
चैव भवच्छ्रद्धशनवद्गिर्लोकहेतवे ॥ रक्षापनीयं प्रयत्नेन नाशिव प्राप्तिकरं
परं ॥६९॥ इति विश्वसमाख्याते यस्मै सोहं ऋषीश्वराः ॥ एतच्छ्रुत्वा च ते सर्वे
आनंदं परमं गताः ॥७०॥ हर्षगद्गदया वाचा प्रणेमुस्तं पुनः पुनः ॥ अस्मा
कं चेतसो भ्रांतिर्गता युष्मत्प्रसादतः ॥७१॥ तच्छ्रुत्वा च पुनर्वाक्यमुवाच कृ
णिसत्तमान् ॥ व्यासशिष्यस्तदुक्तिहि कथयामास तांस्तदा ॥७२॥ न ना
स्तिकाय वक्तव्यं श्रद्धाहीनाय वा पुनः ॥ अनक्तायन वाच्यं हि न वा सु

श्चपवेश्मुना ॥७३॥ अष्टादशपुराणानि ॥ इतिहासंननेकशः ॥ वेदार्थश्चा
प्यनेकश्चविचार्यचपुनःपुनः ॥७४॥ सारमेतत्समुधृत्यव्यासेनपरिभा
षितं ॥ अतःकोनभक्तिमायातिनकस्यभक्तिवर्द्धनं ॥७५॥ एकवारंतथाकृ
त्वापापानिनस्मतांव्रजेत् ॥ पुनःश्रुतेशिवःसाक्षात्प्रपश्यतितंमुनी
श्वराः ॥७६॥ पुनःश्रुतेनवंसोवैपश्यतीतिसुनिश्चितं ॥ तस्मात्पुनःपु
नःश्राव्यंभुक्तिमुक्तिफलेप्सुभिः ॥७७॥ पंचावृत्तिःप्रकर्त्तव्याग्व्याससत्य
वचनंतिदं ॥ यमुद्दिश्यफलंश्रेष्टाःतत्तत्प्राप्नोत्यसंशयः ॥७८॥ नदु
र्लभंतुतस्यैवयेनेदंश्रुतमुत्तमं ॥ इत्युक्तास्तेऋषिश्रेष्टाःसुसुबुः
परयामुदा ॥७९॥ पंचकृत्वःस्तदाश्रुत्वालब्ध्वेचशिवदर्शनं ॥ पुरात ३२५

नाश्चराजानःश्रुत्वासिद्धिंपरांगताः ॥८०॥ इदानींश्रोष्यतेयेवैसोवै
सिद्धिंपरांव्रजेत् ॥ इतितस्यवचःश्रुत्वाहानंदंपरमंगताः ॥८१॥ तेचै
वपूजयामासुर्नानावस्त्रैःसुशोभनैः ॥ चंदनैश्चविचित्रैश्चनाना
लंकरणैस्तथा ॥८२॥ नमस्कारैस्तवैश्चैवस्वस्तिवाचनपूर्वकं ॥ आ
शीर्भिर्विविधाभिश्चवर्द्धयामासुरंजसा ॥८३॥ संतुष्टाश्चैवतेसर्वे
संतुष्टस्तत्रएवच ॥ परस्परंचसंतुष्टाःशिवभक्तिपरायणाः ॥८४॥ ए
तद्देवपरंमत्वानमंतिवनंतिच ॥ एवंयःशृणुयान्नित्यंसर्वान्का
मानवाप्नुयात् ॥८५॥ अंतेमुक्तिंपरांप्राप्य ॥ भुक्तिंवैप्राप्नुयात्पुनः ॥
निखिलायस्तुदद्यात्वैपुराणंशिवसंज्ञिके ॥८६॥ हेमवृषसमायु

त्कं चतुर्वेदेश्वसंमतं ॥ तस्य वासो न वेत्तिस्वं शिवलोके न संशयः
८७ ॥ स तु शिवसमाकारं लभते पापसंयुतः ॥ तस्मात्सर्वप्रयत्नेन वी
यतां शैवकं द्विजा ॥ ८८ ॥ तत्रापि दक्षिणा देया सुवर्णानां चतुष्टं ॥ ए
वं ददाति यो नक्या शिवलोके महीयते ॥ ८९ ॥ तत्रस्थो नव्यवेत्ताऽपि
शिवसायुज्यमाप्नुयात् ॥ सत्यं सत्यं पुनः सत्यं ॥ नान्यथा मम भाषि
तं ॥ ९० ॥ इत्युक्त्वा विररामासौ सूतः पौराणिकोत्तमः ॥ ९१ ॥ ॥
॥ ॥ इति श्रीशिवपुराणे व्याससूतसंवादे ज्ञानप्रकरणनि
रूपणो नाम सप्ततितमोध्यायः ॥ ॥ ७१ ॥ ॥ छ ॥ ॥

संवत १८६६ वर्षे शाके १७३१ प्रमाने पोस सुदि १४ वार शुकरे ॥
लिखितं अवदीच ज्ञातीय ॥ रावल० सुखरामेण लिखितं ॥ ॥ इ
ति श्रीशिवपुराण संपूर्णं ॥ ॥ स्वस्तिरस्तु सर्वेषां ॥ लिखकपा
ठकयोः ॥ ॥ शुभं भवतु ॥ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखि
तं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥ ॥

शि॰व॰
३२१

॥ इतिशिवपुराणंसमाप्तं ॥

॥

३२१